# Śrī Kṛṣṇa Sandarbha

# Appendix

# Sanskrit Text

तौ सन्तोषयता सन्तौ श्रीलरूपसनातनौ ।
दाक्षिणात्येन भट्टेन पुनरेतद् विविच्यते ॥ १ ॥

तस्याद्यं ग्रन्थनालेखं क्रान्तव्युत्क्रान्तखण्डितम् ।
पर्यालोच्याथ पर्यायं कृत्वा लिखति जीवकः ॥ २ ॥

१ । अथ पूर्वं सन्दर्भत्रयेण यस्य सर्वपरत्वं साधितं तस्य श्रीभगवतो निर्धारणाय सन्दर्भोऽयमारभ्यते ।
अथ तत्र प्रथमस्य द्वितीये "वदन्ति" (भा० १।२।११) इत्यादिना तदेकमेव तत्त्वं ब्रह्मादितया शब्द्यत इत्युक्तम् । तदेव ब्रह्मादित्रयं तस्य तृतीये विविच्यते । ब्रह्म त्विह (भा० १।३।३३) —

यत्रेमे सदसद्रूपे प्रतिषिद्धे स्वसंविदा ।
अविद्ययात्मनि कृते इति तद् ब्रह्मदर्शनम् ॥ ३ ॥ इत्यादिना ।

तत्र विविक्तमप्येकाकाराविर्भावतया संशयाभावात् तत्तन्निर्धारणार्थं तत्तद्वचनं नोद्ध्रियते । श्रीभगवत्परमात्मनोस्तु नानाविर्भावत्वात् तानि वचनानि तत्तन्निर्धारणार्थमुद्ध्रियन्ते ।
तत्रेश्वरो नाम निराकारो नास्तीति प्राङ् निर्णीतम् । परमात्मशब्देन च सर्वान्तर्यामिपुरुषः प्रतिपादितस्तेष्वेव सन्दर्भेषु । तथा च सति तस्मिंस्तृतीयाध्यायारम्भ एवमाभास्यम् ।
ननु पूर्वं ब्रह्मादितया त्रिधैव तत्त्वमेकमुक्तम् । तत्र ब्रह्मणः किं लक्षणं भगवत्परमात्मनोर्वा, तत्र तत्र विशेषः कश्चिद्वा किमस्तीति श्रीशौनकादिप्रश्नमाशङ्क्य श्रीसूत उवाच (भा० १।३।१) —

जगृहे पौरुषं रूपं भगवान् महदादिभिः ।
सम्भूतं षोडशकलमादौ लोकसिसृक्षया ॥ ४ ॥

यः श्रीभगवान् पूर्णषडैश्वर्यत्वेन पूर्वं निर्दिष्टः स एव पौरुषं रूपं पुरुषत्वेनाम्नायते यद्रूपं तदेवादौ सर्गारम्भे जगृहे प्राकृतप्रलयेष्वस्मिन् लीनं सत् प्रकटतया स्वीकृतवान् ।
किमर्थम् ? तत्राह — लोकसिसृक्षया । तस्मिन्नेव लीनानां लोकानां समष्टिव्यष्ट्युपाधि-जीवानां सिसृक्षया प्रादुर्भावनार्थमित्यर्थः । कीदृशं सत्तद्रूपं लीनमासीत् ? तत्राह — महदादिभिः सम्भूतं मिलितमन्तर्भूतमहदादितत्त्वमित्यर्थः ।
"सम्भूयाम्भोधिमभ्येति महानद्यो नगापगाः" इत्यादौ हि सम्भवतिर्मिलनार्थः । तत्र हि महदादीनि लीनान्यासन्निति ।
तदेवम् "विष्णोस्तु त्रीणि रूपाणि" इत्यादौ महत्स्रष्टृत्वेन प्रथमं पुरुषाख्यं रूपं यच्छ्रूयते यच्च ब्रह्मसंहितादौ कारणार्णवशायिसङ्कर्षणत्वेन श्रूयते तदेव "जगृहे" इति प्रतिपादि-तम् ।
पुनः कीदृशं तद्रूपम् ? तत्राह — षोडशकलं तत्सृष्ट्युपयोगिपूर्णशक्तीत्यर्थः । तदेवं यस्त-द्रूपं जगृहे स भगवान् । यत् तु तेन गृहीतं तत् तु स्वसृज्यानामाश्रयत्वात् परमात्मेति पर्यवसितम् ॥

२ । तस्य पुरुषरूपस्य विसर्गनिदानत्वमपि प्रतिपादयितुमाह सार्धेन (भा० १।३।२–३) —

यस्याम्भसि शयानस्य योगनिद्रां वितन्वतः ।
नाभिह्रदाम्बुजादासीद् ब्रह्मा विश्वसृजां पतिः ॥ ५ ॥
यस्यावयवसंस्थानैः कल्पितो लोकविस्तरः ॥ ६ ॥

यस्य पुरुषरूपस्य द्वितीयेन व्यूहेन ब्रह्माण्डं प्रविश्य अम्भसि गर्भोदके शयानस्येत्यादि योज्यम् । यस्य च तादृशत्वेन तत्र शयानस्य अवयवसंस्थानैः साक्षाच्छ्रीचरणादिसन्निवे-शैर्लोकस्य विस्तारो विराडाकारः प्रपञ्चः कल्पितः ।
यथा तदवयवसन्निवेशास्तथैव "पातालमेतस्य हि पादमूलम्" (भा० २।१।२६) इत्यादिना नवीनोपासकान् प्रति मनःस्थैर्याय प्रख्यापितः । न तु वस्तुतस्तदेव यस्य रूपमित्यर्थः ।
यद्वा "चन्द्रमा मनसो जातः" (ऋग्वेद १०।९०।१३) इत्यारभ्य "पद्भ्यां भूमिर्दिशः श्रोत्रात् तथा लोकानकल्पयत्" (ऋग्वेद १०।९०।१४) इति श्रुतेस्तैर्हेतुभूतैर्लोकविस्तारो रचित इत्यर्थः ।
तथा च भारते मोक्षधर्मे नारायणीये गर्भोदके शयानस्य रूपान्तरेण श्वेतद्वीपपतेर्वाक्यम् (म० भा० १२।३३९।७२–७४) —

अस्मन्मूर्तिश्चतुर्थी या सासृजच्छेषमव्ययम् ॥ ७ ॥
स हि सङ्कर्षणः प्रोक्तः प्रद्युम्नं सोऽप्यजीजनत् ।
प्रद्युम्नादनिरुद्धोऽहं सर्गो मम पुनः पुनः ॥ ८ ॥

अनिरुद्धात् तथा ब्रह्मा तत्रादि कमलोद्भवः ।
ब्रह्मणः सर्वभूतानि चराणि स्थावराणि च ॥ ९ ॥

तत्रैव वेदव्यासः (म० भा० १२।३४०।२८-३१) —

परमात्मेति यं प्राहुः साङ्ख्ययोगविदो जनाः ॥ १० ॥
महापुरुषसञ्ज्ञां स लभते स्वेन कर्मणा ।
तस्मात् प्रसूतमव्यक्तं प्रधानं तद् विदुर्बुधाः ॥ ११ ॥
अव्यक्ताद् व्यक्तमुत्पन्नं लोकसृष्ट्यर्थमीश्वरात् ।
अनिरुद्धो हि लोकेषु महानात्मेति कथ्यते ॥ १२ ॥
योऽसौ व्यक्तत्वमापन्नो निर्ममे च पितामहम् ॥ १३ ॥ इति ।

तदेवं सङ्कर्षणस्य वैभवमुक्त्वानिरुद्धस्याप्याह — अनिरुद्धो हीति । लोकेषु प्रत्येकं ब्रह्माण्डेषु महानात्मा परमात्मा । व्यक्तत्वं प्राकट्यं प्रद्युम्नादिति शेषः ।
सूतेन त्वभेदविवक्षया प्रद्युम्नः पृथङ्नोक्तः "विष्णोस्तु त्रीणि रूपाणि" इतिवत् । सेयं प्रक्रिया द्वितीयस्य षष्ठे दृश्यते यथा "स एष आद्यः पुरुषः" (भा० २।६।३९) इत्यादिपद्ये टीका "स एष आद्यो भगवान् यः पुरुषावतारः सन् सृष्ट्यादिकं करोति" इत्येषा ।
एवम् "आद्योऽवतारः पुरुषः परस्य" (भा० २।६।४२) इत्यत्र टीका — परस्य भूम्नः, पुरुषः प्रकृतिप्रवर्तको यस्य "सहस्रशीर्षा" (ऋग्वेद १०।९०।१) इत्याद्युक्तो लीलाविग्रहः स आद्योऽवतार इत्येषा ।
तथा तृतीयस्य विंशे "दैवेन" (भा० ३।२०।१२) इत्यादिकं "सोऽनु" (भा० ३।२०।१७) इत्यन्तं सटीकमेव प्रकरणमत्रानुसन्धेयम् । तस्माद् विराट्त्वेन तद्रूपं न व्याख्यातम् । तस्माच्च वासुदेवस्थानीयो भगवान् पुरुषादन्य एवेत्यायातम् ॥

३ । अथ तस्य रूपद्वयस्य सामान्यत ऐकविध्येन स्वरूपमाह "तद् वै भगवतो रूपं विशुद्धं सत्त्वमूर्जितम्" (भा० १।३।३) इति ।
तत् श्रीभगवतः पौरुषं रूपं वै प्रसिद्धौ विशुद्धोर्जितसत्त्वाभिव्यक्तत्वाच्छक्तिस्वरूपयोरभेदाच्च तद्रूपमेवेत्यर्थः । उक्तं च द्वितीयं पुरुषव्यूहमधिकृत्य स्वरूपत्वं तद्रूपस्य "नातः परं परम यद् भवतः स्वरूपम्" (भा० ३।९।३) इत्यत्र ।
विशुद्धं जाड्यांशेनापि रहितं स्वरूपशक्तिवृत्तित्वात् । ऊर्जितं सर्वतो बलवत् परमानन्दरूपत्वात् "को ह्येवान्यात् कः प्राण्यात् यदेष आकाश आनन्दो न स्यात्" (तै० २।७।१) इति श्रुतेः । तस्मात् साक्षाद्भगवद्रूपे तु कैमुत्यमेवायातम् ॥

४ । तदेवं पुरुषस्य द्विधा स्थानकर्मणी उक्त्वा स्वरूपवदाकारं त्वेकप्रकारमाह (भा० १।३।४) —

पश्यन्त्यदो रूपमदभ्रचक्षुषा सहस्रपादोरुभुजाननाद्भुतम् ।
सहस्रमूर्धश्रवणाक्षिनासिकं सहस्रमौल्यम्बरकुण्डलोल्लसत् ॥ १४ ॥

अदः पौरुषं रूपमदभ्रचक्षुषा भक्त्याख्येन "पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया" (गीता ८।२२) इत्युक्तेः, "भक्तिरेवैनं नयति भक्तिरेवैनं दर्शयति" इत्यादि श्रुतेश्च ।
तत्र प्रथमस्य सहस्रपादादित्वं परमात्मसन्दर्भे व्यञ्जितम् । तृतीयस्याष्टमे तु द्वितीयपुरुषस्य व्यूहमुपलक्ष्य श्रीमैत्रेयेण "वेणुभुजाङ्घ्रिपाङ्घ्रेः" (भा० ३।८।२४) इति ।
"दोर्दण्डसहस्रशाखम्" (भा० ३।८।२९) इति "किरीटसाहस्रहिरण्यशृङ्गम्" (भा० ३।८।३०) इति च ।
तथा नवमस्य चतुर्दशे श्रीशुकेन (भा० ९।१४।२) —

सहस्रशिरसः पुंसो नाभिह्रदसरोरुहात् ।
जातस्यासीत् सुतो धातुरत्रिः पितृसमो गुणैः ॥ १५ ॥ इति ॥

५ । तत्र श्रीभगवन्तं सुष्ठु स्पष्टीकर्तुं गर्भोदकस्थस्य द्वितीयस्य पुरुषस्य व्यूहस्य नानावतारित्वं विवृणोति (भा० १।३।५) —

एतन् नानावताराणां निधानं बीजमव्ययम् ।
यस्यांशांशेन सृज्यन्ते देवतिर्यङ्नरादयः ॥ १६ ॥

एतदिति ब्रह्माण्डस्थमित्यर्थः । निधानं सरोवराणां समुद्र इव सदैवाश्रयः । अत एवाव्ययमनपक्षयं बीजमुद्गमस्थानम् । न केवलमवताराणां बीजं जीवानामपीत्याह "यस्यांशांशेन" इति ॥

६ । अथ प्राचुर्येण तदवतारान् कथयंस्तदैक्यविवक्षया तदंशांशिनामप्याविर्भावमात्रं गणयति विंशत्या (भा० १।३।६) —

स एव प्रथमं देवः कौमारं सर्गमाश्रितः ।
चचार दुश्चरं ब्रह्मा ब्रह्मचर्यमखण्डितम् ॥ १७ ॥

योऽम्भसि शयानो यश्च सहस्रपादादिरूपः स एव पुरुषाख्यो देवः । "एते चांशकलाः पुंसः" (भा० १।३।२८) इत्युपसंहारस्यापि संवादात् ।
कौमारं चतुःसनरूपम् । ब्रह्मा ब्राह्मणो भूत्वा ॥

७ । भा० १।३।७ —

द्वितीयं तु भवायास्य रसातलगतां महीम् ।
उद्धरिष्यन्नुपादत्त यज्ञेशः सौकरं वपुः ॥ १८ ॥

अस्य विश्वस्य उद्भवाय ॥

८ । भा० १।३।८ —

तृतीयमृषिसर्गं वै देवर्षित्वमुपेत्य सः ।
तन्त्रं सात्वतमाचष्ट नैष्कर्म्यं कर्मणां यतः ॥ १९ ॥

ऋषिसर्गमुपेत्य तत्रापि देवर्षित्वं श्रीनारदत्वमुपेत्य । सात्वतं वैष्णवम् । तन्त्रं पञ्चरात्रागमम् । कर्मणां कर्माकारेणापि सतां श्रीभगवद्धर्माणां यतस्तन्त्रान् नैष्कर्म्यं कर्मबन्धमोचकत्वेन कर्मभ्यो निर्गतत्वं तेभ्योऽभिन्नत्वं प्रतीयत इति शेषः ॥

९ । भा० १।३।९—

तुर्ये धर्मकलासर्गे नरनारायणावृषी ।
भूत्वात्मोपशमोपेतमकरोद् दुश्चरं तपः ॥ २० ॥

स्पष्टम् ॥

१० । भा० १।३।१०—

पञ्चमः कपिलो नाम सिद्धेशः कालविप्लुतम् ।
प्रोवाचासुरये साङ्ख्यं तत्त्वग्रामविनिर्णयम् ॥ २१ ॥

आसुरिनाम्ने विप्राय ॥

११ । भा० १।३।११—

षष्ठमत्रेरपत्यत्वं वृतः प्राप्तोऽनसूयया ।
आन्वीक्षिकीमलर्काय प्रह्लादादिभ्य ऊचिवान् ॥ २२ ॥

अत्रिणा तत्सदृशपुत्रोत्पत्तिमात्रं प्रकटं याचितमिति चतुर्थस्कन्धाद्यभिप्रायः । एतद्वाक्येनानसूयया तु कदाचित् साक्षादेव श्रीमदीश्वरस्यैव पुत्रभावो वृतोऽस्तीति लभ्यते । उक्तं च ब्रह्माण्डपुराणे पतिव्रतोपाख्याने—

अनसूयाब्रवीन् नत्वा देवान् ब्रह्मेशकेशवान् ।
यूयं यदि प्रसन्ना मे वरार्हा यदि वाप्यहम् ।
प्रसादाभिमुखाः सर्वे मम पुत्रत्वमेष्यथ ॥ २३ ॥ इति ।

आन्वीक्षिकीमात्मविद्याम् । श्रीविष्णोरेवावतारोऽयं दत्तः ॥

१२ । भा० १।३।१२—

ततः सप्तम आकूत्यां रुचेर्यज्ञोऽभ्यजायत ।
स यामाद्यैः सुरगणैरपात् स्वायम्भुवान्तरम् ॥ २४ ॥

स यज्ञस्तदा स्वयमिन्द्रोऽभूदित्यर्थः ॥

१३ । भा० १।३।१३ —

> अष्टमे मेरुदेव्यां तु नाभेर्जात उरुक्रमः ।
> दर्शयन् वर्त्म धीराणां सर्वाश्रमनमस्कृतम् ॥ २५ ॥

उरुक्रम ऋषभो जातः ॥

१४ । भा० १।३।१४ —

> ऋषिभिर्याचितो भेजे नवमं पार्थिवं वपुः ।
> दुग्धेमामोषधीर्विप्रास्तेनायं स उशत्तमः ॥ २६ ॥

पार्थिवं वपू राजदेहं पृथुरूपम् । दुग्ध अदुग्ध । उशत्तमः कमनीयतमः ॥

१५ । भा० १।३।१५ —

> रूपं स जगृहे मात्स्यं चाक्षुषोदधिसम्प्लवे ।
> नाव्यारोप्य महीमय्यामपाद् वैवस्वतं मनुम् ॥ २७ ॥

चाक्षुषमन्वन्तरे तदन्ते य उदधिसम्प्लवस्तस्मिन् । वैवस्वतमिति भाविनी सञ्ज्ञा सत्यव्रतस्य । प्रतिमन्वन्तरावसानेऽपि प्रलयः श्रूयते । श्रीविष्णुधर्मोत्तरे प्रथमकाण्डे "मन्वन्तरे परिक्षीणे कीदृशी द्विज जायते" (१।७५।१) इत्यादि । श्रीवज्रप्रश्नस्य "मन्वन्तरे परिक्षीणे" इत्यादि श्रीमार्कण्डेयदत्तोत्तरे (१।७५।५-६) —

> ऊर्मिमाली महावेगः सर्वमावृत्य तिष्ठति ।
> भूर्लोकमाश्रितं सर्वं तदा नश्यति यादव ॥ २८ ॥
> न विनश्यन्ति राजेन्द्र विश्रुताः कुलपर्वताः ।
> नौर्भूत्वा तु महीदेवी … ॥ २९ ॥ इत्यादि ।

एवमेव "मन्वन्तरेषु संहारः" इत्यादिप्रकरणं श्रीहरिवंशे तदीयटीकासु च स्पष्टमेव । ततश्चाक्षुषेत्युपलक्षणमेव ज्ञेयम् ॥

१६ । भा० १।३।१६ —

> सुरासुराणामुदधिं मथ्नतां मन्दराचलम् ।
> दध्रे कमठरूपेण पृष्ठ एकादशे विभुः ॥ ३० ॥

स्पष्टम् ॥

१७ । भा० १।३।१७ —

> धान्वन्तरं द्वादशमं त्रयोदशममेव च ।
> अपाययत् सुरानन्यान् मोहिन्या मोहयन् स्त्रिया ॥ ३१ ॥

बिभ्रदित्युत्तरेणान्वयः । द्वादशमं धान्वन्तरं रूपं बिभ्रत् । त्रयोदशमं च मोहिनीरूपं बिभ्रत् । सुरानपाययत् सुधामिति शेषः । केन रूपेण ? मोहिन्या स्त्रिया तद्रूपेणेत्यर्थः । किं कुर्वन् ? अन्यानसुरान् मोहयन् धन्वन्तरिरूपेण सुधां चोपहरन्निति शेषः । अजितस्यावतारा एते त्रयः ॥

१८ । भा० १।३।१८ —

> चतुर्दशं नारसिंहं बिभ्रद् दैत्येन्द्रमूर्जितम् ।
> ददार करजैरूरावेरकां कटकृद् यथा ॥ ३२ ॥

नारसिंहं रूपं बिभ्रत् ॥

१९ । भा० १।३।१९ —

> पञ्चदशं वामनकं कृत्वागादध्वरं बलेः ।
> पादत्रयं याचमानः प्रत्यादित्सुस्त्रिविष्टपम् ॥ ३३ ॥

कृत्वा प्रकटय्य ॥

२० । भा० १।३।२० —

> अवतारे षोडशमे पश्यन् ब्रह्मद्रुहो नृपान् ।
> त्रिःसप्तकृत्वः कुपितो निःक्षत्रामकरोन् महीम् ॥ ३४ ॥

अवतारे श्रीपरशुरामाभिधे ॥

२१ । भा० १।३।२१ —

> ततः सप्तदशे जातः सत्यवत्यां पराशरात् ।
> चक्रे वेदतरोः शाखा दृष्ट्वा पुंसोऽल्पमेधसः ॥ ३५ ॥

स्पष्टम् ॥

२२ । भा० १।३।२२ —

नरदेवत्वमापन्नः सुरकार्यचिकीर्षया ।
समुद्रनिग्रहादीनि चक्रे वीर्याण्यतः परम् ॥ ३६ ॥

नरदेवत्वं श्रीराघवरूपेण । अतः परमष्टादशे । अस्य साक्षात् पुरुषस्य स्कान्दे श्रीरामगीतायां विश्वरूपं दर्शयतो ब्रह्मविष्णुरुद्रकृतस्तुतिः श्रूयते ॥

२३ । भा० १।३।२३ —

एकोनविंशे विंशतिमे वृष्णिषु प्राप्य जन्मनी ।
रामकृष्णाविति भुवो भगवानहरद् भरम् ॥ ३७ ॥

भगवानिति साक्षात् श्रीभगवत एवाविर्भावोऽयं न तु पुरुषसञ्ज्ञस्यानिरुद्धस्येति विशेषप्रतिपत्त्यर्थम् । तत्र तस्य साक्षाद्रूपत्वात् श्रीकृष्णरूपेण निजांशरूपत्वाद् रामरूपेणापि भारहारित्वं भगवत एवेत्युभयत्रापि भगवानहरद् भरमिति श्लिष्टमेव । अतो रामस्याप्यनिरुद्धावतारत्वं प्रत्याख्यातम् । श्रीकृष्णस्य वासुदेवत्वात् श्रीरामस्य च सङ्कर्षणत्वाद् युक्तमेव च तदिति ॥

२४ । भा० १।३।२४ —

ततः कलौ सम्प्रवृत्ते सम्मोहाय सुरद्विषाम् ।
बुद्धो नाम्नाञ्जनसुतः कीकटेषु भविष्यति ॥ ३८ ॥

कीकटेषु गयाप्रदेशे ॥

२५ । भा० १।३।२५ —

अथासौ युगसन्ध्यायां दस्युप्रायेषु राजसु ।
जनिता विष्णुयशसो नाम्ना कल्किर्जगत्पतिः ॥ ३९ ॥

युगसन्ध्यायां कलेरन्ते ॥

२६ । अथ श्रीहयग्रीवहरिहंसपृश्निगर्भविभुसत्यसेनवैकुण्ठाजितसार्वभौमविश्वक्सेनधर्मसेतुसुधामयोगेश्वरबृहद्भान्वादीनां शुक्लादीनां चानुक्तानां सङ्ग्रहार्थमाह (भा० १।३।२६) —

अवतारा ह्यसङ्ख्येया हरेः सत्त्वनिधेर्द्विजाः ।
यथाविदासिनः कुल्याः सरसः स्युः सहस्रशः ॥ ४० ॥

हरेरवतारा असङ्ख्येयाः सहस्रशः सम्भवन्ति । हि प्रसिद्धौ । असङ्ख्येयत्वे हेतुः — सत्त्वनिधेः सत्त्वस्य स्वप्रादुर्भावशक्तेः शेवधिरूपस्य । अत्रैव दृष्टान्तः — यथेति । अविदासिनोऽपक्षयशून्यात् सरसः सकाशात् कुल्यास्तत्स्वभावकृता निर्झरा अविदासिन्यः सहस्रशः सम्भवन्तीति ।

अत्र येऽंशावतारास्तेषु चैष विशेषो ज्ञेयः । श्रीकुमारनारदादिष्वाधिकारिकेषु ज्ञानभक्तिशक्त्यंशावेशः । श्रीपृथ्वादिषु क्रियाशक्त्यंशावेशः । क्वचित् तु स्वयमावेशस्तेषां भगवानेवाहमिति वचनात् ।

अथ श्रीमत्स्यदेवादिषु साक्षादंशत्वमेव । तत्र चांशत्वं नाम साक्षाद्भगवत्त्वेऽप्यव्यभिचारितादृशतदिच्छावशात् सर्वदैवैकदेशतयैवाभिव्यक्तशक्त्यादिकत्वमिति ज्ञेयम् । तथैवोदाहरिष्यते "रामादिमूर्तिषु कलानियमेन तिष्ठन्" (ब्र० सं० ५।५०) इति ॥

२७ । अथ विभूतीराह (भा० १।३।२७) —

> ऋषयो मनवो देवा मनुपुत्रा महौजसः ।
> कलाः सर्वे हरेरेव सप्रजापतयः स्मृताः ॥ ४१ ॥

कला विभूतयः । अल्पशक्तेः प्रकाशाद् विभूतित्वं महाशक्तेस्त्वावेशत्वमिति भेदः ॥

२८ । तदेवं परमात्मानं साङ्गमेव निर्धार्य प्रोक्तानुवादपूर्वकं श्रीभगवन्तमप्याकारेण निर्धारयति "एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम्" (भा० १।३।२८) इति ।

एते पूर्वोक्ताः । चशब्दादनुक्ताश्च । प्रथममुद्दिष्टस्य पुंसः पुरुषस्यांशकलाः । केचिदंशाः स्वयमेवांशाः साक्षादंशत्वेनांशांशत्वेन च द्विविधाः । केचिदंशाविष्टत्वादंशाः केचित् तु कलाविभूतयः । इह यो विंशतितमावतारत्वेन कथितः स कृष्णस्तु भगवान् । पुरुषस्याप्यवतारी यो भगवान् स एष एवेत्यर्थः ।

अत्र "अनुवादमनुक्त्वैव न विधेयमुदीरयेत्" इति वचनात् कृष्णस्यैव भगवत्त्वलक्षणो धर्मः साध्यते न तु भगवतः कृष्णत्वमित्यायातम् । ततश्च श्रीकृष्णस्यैव भगवत्त्वलक्षणधर्मित्वे सिद्धे मूलावतारित्वमेव सिध्यति न तु ततः प्रादुर्भूतत्वम् । एतदेव व्यनक्ति "स्वयम्" इति । तत्र च स्वयमेव भगवान् न तु भगवतः प्रादुर्भूततया न तु वा भगवत्ताध्यासेनेत्यर्थः । न चावतारप्रकरणेऽपि पठित इति संशयः "पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवत्" इति न्यायेन । यथाग्निष्टोमे "यद्युद्गाता विच्छिद्याददक्षिणेन यजेत यदि प्रतिहर्ता सर्वस्वदक्षिणेन" इति श्रुतेः । तयोश्च कदाचिद् द्वयोरपि विच्छेदे प्राप्ते विरुद्धयोः प्रायश्चित्तयोः समुच्चयासम्भवे च परमेव प्रायश्चित्तं सिद्धान्तितं तद्वदिहापीति ।

अथवा "कृष्णस्तु" इति श्रुत्या प्रकरणस्य बाधात् । यथा शङ्करशारीरकभाष्ये "श्रुत्यादिबलीयस्त्वाच्च न बाधः" (ब्र० सू० ३।३।५०) इति सूत्रे ।

"ते हैते विद्याचित एव" इति श्रुतिः । मनश्चिदादीनामग्नीनां प्रकरणप्राप्तं क्रियानुप्रवेशलक्षणमस्वातन्त्र्यं बाधित्वा विद्याचित्त्वेनैव स्वातन्त्र्यं स्थापयति तद्वदिहापीति ।

अत एतत्प्रकरणेऽप्यन्यत्र क्वचिदपि भगवच्छब्दमकृत्वा तत्रैव "भगवानहरद् भरम्" (भा० १।३।२३) इत्यनेन कृतवान् । ततश्चास्यावतारेषु गणना तु स्वयं भगवानप्यसौ

स्वरूपस्थ एव निजपरिजनवृन्दानामानन्दविशेषचमत्काराय किमपि माधुर्यं निजजन्मादिलीलया पुष्णन् कदाचित् सकललोकदृश्यो भवतीत्यपेक्षयैवेत्यायातम् । यथोक्तं ब्रह्मसंहितायाम् (ब्र० सं० ५।३९) —

रामादिमूर्तिषु कलानियमेन तिष्ठन् नानावतारमकरोद् भुवनेषु किन्तु ।
कृष्णः स्वयं समभवत् परमः पुमान् यो गोविन्दमादिपुरुषं तमहं भजामि ॥ ४२ ॥

अवतारश्च प्राकृतवैभवेऽवतरणमिति ज्ञेयम् । श्रीकृष्णसाहचर्येण श्रीरामस्यापि पुरुषांशत्वात्ययो ज्ञेयः । अत्र तुशब्दोऽंशकलाभ्यः पुंसश्च सकाशाद् भगवतो वैलक्षण्यं बोधयति । यद्वा अनेन तुशब्देन सावधारणा श्रुतिरियं प्रतीयते । ततः "सावधारणा श्रुतिर्बलवती" इति न्यायेन श्रुत्यैव श्रुतमप्यन्येषां महानारायणादीनां स्वयं भगवत्त्वं गुणीभूतमापद्यते ।
एवं पुंस इति भगवानिति च प्रथममुपक्रमोद्दिष्टस्य तस्य शब्दद्वयस्य तत्सहोदरेण तेनैव शब्देन च प्रतिनिर्देशात् तावेव खल्वेताविति स्मारयति । उद्देशप्रतिनिर्देशयोः प्रतीतिस्थगिततानिरसनाय विद्वद्भिरेक एव शब्दः प्रयुज्यते तत्समवर्णो वा । यथा ज्योतिष्टोमाधिकरणे "वसन्ते वसन्ते च ज्योतिषा यजेत" इत्यत्र "ज्योतिः" शब्दो ज्योतिष्टोमविषयो भवतीति ।
अत्र तत्त्ववादगुरवस्तु चशब्दस्थाने स्वशब्दं पठित्वैवमाचक्षते — एते प्रोक्ता अवतारा मूलरूपी स्वयमेव । किं स्वरूपाः ? स्वांशकला न तु जीववद् भिन्नांशाः । यथा वाराहे —

स्वांशश्चाथ विभिन्नांश इति द्वेधांश इष्यते ।
अंशिनो यत् तु सामर्थ्यं यत् स्वरूपं यथा स्थितिः ॥ ४३ ॥
तदेव नाणुमात्रोऽपि भेदः स्वांशांशिनोः क्वचित् ।
विभिन्नांशोऽल्पशक्तिः स्यात् किञ्चित् सामर्थ्यमात्रयुक् ॥ ४४ ॥ इति ।

अत्रोच्यते — अंशानामंशिसामर्थ्यादिकं तदैक्येनैव मन्तव्यम् । तच्च यथाविदासिन इत्यादौ तस्याक्षयत्वेन तासामक्षयत्वं यथा तद्वत, अंशांशित्वानुपपत्तेरेव ।
तथा च श्रीवासुदेवानिरुद्धयोः सर्वथा साम्ये प्रसक्ते कदाचिदनिरुद्धेनापि श्रीवासुदेवस्याविर्भावना प्रसज्येत । तच्च श्रुतविपरीतमित्यसदेव । तस्मादस्त्येवावतार्यवतारयोस्तारतम्यम् ।
अत एव तृतीयस्याष्टमे (भा० ३।८।३-४) —

आसीनमुर्व्यां भगवन्तमाद्यं सङ्कर्षणं देवमकुण्ठसत्त्वम् ।
विवित्सवस्तत्त्वमतः परस्य कुमारमुख्या मुनयोऽन्वपृच्छन् ॥ ४५ ॥
स्वमेव धिष्ण्यं बहु मानयन्तं यद्वासुदेवाभिधमामनन्ति ।

इत्यादौ वासुदेवस्य सङ्कर्षणादपि परत्वं श्रूयते ।

यत् तु तेषां तथा व्याख्यानम् — अत्र "कृष्णस्तु" इत्यनर्थकं स्यात् "भगवान् स्वयम्" इत्यनेनैवाभिप्रेतसिद्धेः । किं च तैः स्वयमेव "प्रकाशादिवन् नैवं परः" (ब्र० सू० २।३।४५) इति सूत्रे स्फुटमंशांशिभेदो दर्शितः । "अंशत्वेऽपि न मत्स्यादिरूपी पर एवम्विधो जीवसदृशः — यथा तेजोऽंशस्यैव सूर्यस्य खद्योतस्य च नैकप्रकारता" इत्यादिना ।
तस्मात् स्थिते भेदे साध्वेव व्याख्यातम् "कृष्णस्तु भगवान् स्वयम्" (भा० १।३।२८) इति ।
"इन्द्रारि" इति पद्यार्धं त्वत्र नान्वेति । तुशब्देन वाक्यस्य भेदनात् । तच्च तावतैवाकाङ्क्षापरिपूर्तेः । एकवाक्यत्वे तु चशब्द एवाकरिष्यत । ततश्च "इन्द्रारि" इत्यत्रार्थात् त एव पूर्वोक्ता एव "मृडयन्ति" इत्यायाति ।। श्रीसूतः ।।

२९ । तदेवं श्रीकृष्णो भगवान् पुरुषस्तु सर्वान्तर्यामित्वात् परमात्मेति निर्धारितम् । तत्राशङ्कते — नन्विदमेकमंशित्वप्रतिपादकं वाक्यमंशत्वप्रतिपादकबहुवाक्यविरोधे गुणवादः स्यात् ?
तत्रोच्यते — तानि किं श्रीभागवतीयानि परकीयाणि वा ? आद्ये जन्मगुह्याध्यायो ह्ययं सर्वभगवदवतारवाक्यानां सूत्रं सूचकत्वात् प्राथमिकपाठात् तैरुत्तरत्र तस्यैव विवरणाच्च ।
तत्र च "एते चांशकलाः पुंसः" इति परिभाषासूत्रम् । अवतारवाक्येषु अन्यान् पुरुषांशत्वेन जानीयात् कृष्णस्तु स्वयं भगवत्त्वेनेति प्रतिज्ञाकारेण ग्रन्थार्थनिर्णायकत्वात् । तदुक्तम् "अनियमे नियमकारिणी परिभाषा" इति ।
अथ परिभाषा च सकृदेव पठ्यते शास्त्रे न त्वभ्यासेन । यथा "विप्रतिषेधे परं कार्यम्" इति । ततश्च वाक्यानां कोटिरप्येकेनैवामुना शासनीया भवेदिति नास्य गुणानुवादत्वम् । प्रत्युतैतद् विरुद्धायमानानामेतदनुगुणार्थमेव वैदुषी । न च परिभाषिकत्वात् तच्छास्त्र एव स व्यवहारो ज्ञेयो न सर्वत्रेति गौणत्वमाशङ्क्यम् । परमार्थवस्तुपरत्वाच्च छ्रीभागवतस्य तत्राप्यार्थिकत्वाच्च तस्याः परिभाषायाः ।
किं च प्रतिज्ञावाक्यमात्रस्य च दृश्यते परत्रापि नानावाक्यान्तरोपमर्दकत्वम् । यथाकाशस्यानुत्पत्तिश्रुतिः प्राणानां च तच्छ्रुतिः स्वविरोधिनी नान्या श्रुतिश्च "आत्मनि विज्ञाते सर्वमिदं विज्ञातं भवति" (बृ० ४।५।६) "इदं सर्वं यदयमात्मा" (बृ० २।४।६) इत्यादिनोपमर्द्यते । अत एव श्रीस्वामिप्रभृतिभिरप्येतदेव वाक्यं तत्तद्विरोधनिरासाय भूयो भूय एव दर्शितम् ।
तदेवं श्रीभागवतमते सिद्धे च तस्य वाक्यस्य बलवत्तमत्वे श्रीभागवतस्य सर्वशास्त्रोपमर्दकत्वेन प्रथमे सन्दर्भे प्रतिपन्नत्वातस्मिन्नेव प्रतिपत्स्यमानत्वाच्च परकीयाणामप्येतदानुगुण्यमेव विद्वज्जनदृष्टम् — यथा राज्ञः शासनं तथैव हि तदनुचराणामपीति ।
तत्र श्रीभागवतीयानि वाक्यानि तदनुगतार्थतया दर्श्यन्ते ।
"तत्रांशेनावतीर्णस्य" (भा० १०।१।२) इत्यंशेन श्रीबलदेवेन सहेत्यर्थः ।
"कलाभ्यां नितरां हरेः" (भा० १०।२०।४८) इति हरेः कला पृथ्वी । आभ्यां श्रीरामकृष्णाभ्यामिति ।

“दिष्ट्याम्ब ते कुक्षिगतः परः पुमानंशेन साक्षाद् भगवान् भवाय नः” (भा० १०।२।४१) इत्यत्र यो मत्स्यादिरूपेणांशेनैव पूर्वं नोऽस्माकं भवायाभूत् । हे अम्ब ! स तु साक्षात् स्वयमेव कुक्षिगतोऽस्तीति ।
“ततो जगन्मङ्गलमच्युतांशम्” (भा० १०।२।१८) इति तु सप्तम्यन्यपदार्थो बहुव्रीहिः । तस्मिन्नंशिन्यवतरति तेषामंशानामप्यत्र प्रवेशस्य व्याख्यास्यमानत्वात् । पूर्णत्वेनैव तत्र “सर्वात्मकमात्मभूतम्” (भा० १०।२।१८) इत्युक्तम् ।
तथा नातिविद्वज्जनवाक्ये (भा० १०।४३।२३) —

एतौ भगवतः साक्षाद्धरेर्नारायणस्य हि ।
अवतीर्णाविहांशेन वसुदेवस्य वेश्मनि ॥ ४६ ॥

इत्यत्रापि सरस्वतीप्रेरिततया अंशेन सर्वांशेन सहैवेत्यर्थः ।
एवमेव (भा० ४।१।५९) —

ताविमौ वै भगवतो हरेरंशाविहागतौ ।
भारव्ययाय च भुवः कृष्णौ यदुकुरूद्वहौ ॥ ४७ ॥

इत्यत्र आगताविति कर्तरि निष्ठा । कृष्णाविति कर्मणि द्वितीया । ततश्च भगवतो नानावतारबीजस्य हरेः पुरुषस्य ताविमौ नरनारायणाख्यावंशौ कर्तृभूतौ कृष्णौ कृष्णार्जुनौ कर्मभूतावागतवन्तौ तयोः प्रविष्टवन्तावित्यर्थः । कृष्णौ कीदृशौ ? भुवो भारस्य व्ययाय चकाराद् भक्तसुखदनानालीलान्तराय च यदुकुरूद्वहौ यदुकुरुवंशयोरवतीर्णावित्यर्थः ।
“अर्जुने तु नरावेशः कृष्णो नारायणः स्वयम्” इत्यागमवाक्यं तु श्रीमदर्जुने नरप्रवेशापेक्षया । यस्तु स्वयमनन्यसिद्धो नारायणः “नारायणस्त्वं न हि सर्वदेहिनाम्” (भा० १०।१४।१४) इत्यादौ दर्शितः । स पुनः कृष्ण इत्यर्थान्तरापेक्षया च मन्तव्यम् “ययोरात्मसमं वित्तम्” (भा० १०।६०।१५) इत्यादिन्यायात् ।
यथा विष्णुधर्मे —

यस्त्वां वेत्ति स मां वेत्ति यस्त्वामनु स मामनु ।
अभेदेनात्मनो वेद्मि त्वामहं पाण्डुनन्दन ॥ ४८ ॥। इति ।

तं प्रति श्रीभगवद्वाक्याच् चार्जुनस्यापि श्रीकृष्णसखत्वेन नारायणसखान् नरात् पूर्णत्वात् तत्र प्रवेशः समुचित एव ।
कुत्रचिच् चांशादिशब्दप्रयोगः “नाहं प्रकाशः सर्वस्य योगमायासमावृतः” (गीता ७।२५) इति श्रीगीतोपनिषद्दिशा पूर्णस्यापि साधारणजनेष्वसम्यक्प्रकाशात् तत्प्रतीतावेवांश इवांश इति ज्ञेयम् ।
“नारायणसमो गुणैः” (भा० १०।८।१९) इत्यत्रापि नारायणः परव्योमाधिप एव गुणैः समो यस्येत्येव श्रीगर्गाभिप्रायः ।

तदेवं महाकालपुराख्यानेऽपि प्रतिज्ञावाक्यमिदमधिकुर्यात् । किं च शास्त्रं हि शासनात्मकं शासनं चोपदेशः । स च द्विधा — साक्षादर्थान्तरद्वारा च । साक्षादुपदेशस्तु श्रुतिरिति परिभाष्यते । साक्षात्त्वं चात्र निरपेक्षत्वमुच्यते । तदुक्तम् "निरपेक्षरवा श्रुतिः" इति ।
तथा च सति "श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात्" (मीमांसादर्शनम् ३।३।१४) इत्युक्तानुसारेण चरमस्य पूर्वापेक्षया दूरप्रतीत्यर्थत्वे "कृष्णस्तु भगवान् स्वयम्" इति श्रीशौनकं प्रति श्रीसूतस्य साक्षादुपदेशेन इतिहासस्थतद्विपरीतलिङ्गद्वारोपदेशो बाध्यते ।
न च "मे कलावतीर्णौ" (भा० १०।८९।५९) इति च महाकालपुराधिप एव श्रीकृष्णं साक्षादेवोपदिष्टवानिति वाच्यम् ।
श्रीकृष्णस्य सार्वज्ञ्याव्यभिचारेण वक्तृश्रोतृभावपूर्वकसङ्गमाप्रस्तावेन "द्विजात्मजा मे युवयोर्दिदृक्षुणा" (भा० १०।८९।५९) इति कार्यान्तरतात्पर्यदर्शनेन च । तस्यैतन् महापुराणस्य च तत्त्वोपदेष्टृश्रीसूतादिवत् तदुपदेशे तात्पर्याभावाद् वक्ष्यमाणार्थान्तर एव नैकट्येन पदसम्बन्धाच्च ।
किं च "भवतु वा तुष्यतु" इति न्यायेन श्रीकृष्णस्य तमपेक्ष्यापूर्णत्वं तथापि सर्वेषामप्यवताराणां नित्यमेव स्वस्थत्वेन दर्शयिष्यमाणत्वात् केषाञ्चिन् मते तु स्वयं पुरुषत्वेऽपि स्वतन्त्रस्थितित्वात् "युवां नरनारायणावृषी धर्ममाचरताम्" (भा० १०।८९।६०) इति "त्वरयेतमन्ति मे" (भा० १०।८९।५९) इति च तत्तदर्थत्वे विरुध्येत ।
अस्तु तावदस्माकमन्यवार्ता न च कुत्रापि महाकालोऽयमंशेन तत्तद्रूपेणावतीर्ण इत्युपाख्यायते वा । ततश्चाप्रसिद्धकल्पना प्रसज्जेत । तत्रैव च "त्वरयेतमन्ति मे" इति "युवां नरनारायणावृषी धर्ममाचरताम्" इत्यादेशद्वयस्य पारस्परिकविरोधः स्फुट एव ।
किं च यदि तस्य तावंशावभविष्यतां तर्हि करतलमणिवत् सदा सर्वमेव पश्यन्नसौ तावपि दूरतोऽपि पश्यन्नेवाभविष्यत् । तच्च "युवयोर्दिदृक्षुणा" इति तद्वाक्येन व्यभिचारितम् । यदि स्वयमेव श्रीकृष्णस्तत्तद्रूपावात्मानौ दर्शयति तदैव तेन तौ दृश्येयातामित्यानीतं च । तथा च सति तयोर्दृश्यत्वाभावादंशत्वं नोपपद्यते । तस्मादप्यधिकशक्तित्वेन प्रत्युत पूर्णत्वमेवोपपद्यते ।
एवमपि यत् त्वर्जुनस्य तज्ज्योतिःप्रताडिताक्षत्वं तद्दर्शनजातसाध्वसत्वं च जातं तत्र स्वयमेव भगवता तत्तल्लीलारसौपयिकमात्रशक्तेः प्रकाशनादन्यस्याः स्थिताया अपि कुण्ठनान् न विरुद्धम् । दृश्यते च स्वस्यापि क्वचिद् युद्धे प्राकृतादपि पराभवादिकम् ।
यथात्रैव तावत् स्वयमेव वैकुण्ठादागतानामप्यश्वानां प्राकृततमसा भ्रष्टगतित्वम् । तदेवमेव श्रीकृष्णस्य तस्मिन् भक्तिभरदर्शनेनाप्यन्यथा न मन्तव्यम् । श्रीरुद्रादौ श्रीनारदादौ च तथा दर्शनात् । एवमत्र परत्र वा तदीयलीलायां तु पूर्वपक्षो नास्ति तस्य स्वैराचरणत्वात् ।
अतस्तदीयतात्पर्यशब्दोत्थावर्थावेवमेव दृश्येते । तत्र तात्पर्योत्थो यथा — असौ श्रीकृष्णः स्वयं भगवानपि यथा गोवर्धनमखलीलायां श्रीगोपगणविस्मापनकौतुकाय काञ्चिन् निजां दिव्यमूर्तिं प्रदर्शयन् तैः सममात्मनैवात्मानं नमश्चक्रे । तथैवार्जुनविस्मापनकौतुकाय श्रीमहाकालरूपेणैवात्मना द्विजबालकान् हारयित्वा पथि च तं तं चमत्का-

रमनुभाव्य महाकालपुरे च तां कामपि निजां महाकालाख्यां दिव्यमूर्तिं दर्शयित्वा तेन समं तद्रूपमात्मानं नमश्चक्रे । तद्रूपेणैव सार्जुनमात्मानं तथा बभाषे च ।
तदुक्तम् "तस्मै नमो व्रजजनैः सहचक्रेऽत्मनात्मने" (भा० १०।२४।३६) इतिवत् ।
तत्रापि "ववन्द आत्मानमनन्तमच्युतः" (भा० १०।८९।५८) इति ।
अत एव श्रीहरिवंशे तत्समीपज्योतिरुद्दिश्य चार्जुनं प्रति श्रीकृष्णेनैवोक्तम् "मत्तेजस्तत् सनातनम्" (ह० वं० २।११४।९) इति ।
अथ शब्दोत्थोऽप्यर्थो यथा तत्र श्रीमहाकालमुद्दिश्य "पुरुषोत्तमोत्तमम्" (भा० १०।८९।५४) इति विशेषणस्यार्थः । पुरुषो जीवस्तस्मादुत्तमस्तदन्तर्यामी तस्मादप्युत्तमं भगवत्प्रभावरूपमहाकालशक्तिमयं तमिति ।
अथ श्रीमहाकालवाक्यस्य (भा० १०।८९।५९) —

> द्विजात्मजा मे युवयोर्दिदृक्षुणा मयोपनीता भुवि धर्मगुप्तये ।
> कलावतीर्णाववनेर्भरासुरान् हत्वेह भूयस्त्वरयेतमन्ति मे ॥ ४९ ॥

इत्यस्य व्याख्या — युवयोर्युवां दिदृक्षुणा मया द्विजपुत्रा मे मम भुवि धाम्नि उपनीता आनीता इत्येकं वाक्यम् ।
वाक्यान्तरमाह — हे धर्मगुप्तये कलावतीर्णौ कला अंशास्तद्युक्ताववतीर्णौ मध्यमपदलोपी समासः । किं वा कलायामंशलक्षणे मायिकप्रपञ्चेऽवतीर्णौ वा "पादोऽस्य विश्वा भूतानि" (ऋग्वेद १०।९०।३) इति श्रुतेः ।
भूयः पुनरपि अवशिष्टानवनेर्भरासुरान् हत्वा मे मम अन्ति समीपाय समीपमागमयितुं युवां त्वरयेतं त्वरतमत्र प्रस्थाप्य तान् मोचयतमित्यर्थः । तद्धतानां मुक्तिप्रसिद्धेः । महाकालपुरज्योतिरेव मुक्ताः प्रविशन्तीति ।
ह० वं० २।११४।९–१० —

> ब्रह्मतेजोमयं दिव्यं महद् यद् दृष्टवानसि ।
> अहं स भरतश्रेष्ठ मत्तेजस्तत् सनातनम् ॥ ५० ॥
> प्रकृतिः सा मम परा व्यक्ताव्यक्ता सनातनी ।
> तां प्रविश्य भवन्तीह मुक्ता योगविदुत्तमाः ॥ ५१ ॥

इति श्रीहरिवंशेऽर्जुनं प्रति श्रीभगवदुक्तेश्च ।
"त्वरयेतम्" इति प्रार्थनायां हेतुणिजन्तस्य लिङि रूपमन्तीत्यव्ययाच् चतुर्थ्यां लुक् चतुर्थी च एधोभ्यो व्रजतीतिवत् "क्रियार्थोपपदस्य च कर्मणि स्थानिनः" इति स्मरणात् ।
कटं कृत्वा प्रस्थापयतीतिवदुभयोरेकेनैव कर्मणान्वयः प्रसिद्ध एव । अर्थान्तरे तु सम्भवत्येकपदत्वे पदच्छेदः कष्टाय कल्प्येत । तथाङभावादितमित्यत्रागच्छतमिति व्याख्या न युज्येत । तस्मादेष एवार्थः स्पष्टमकष्टो भवति ।
तथा (भा० १०।८९।६०) —

पूर्णकामावपि युवां नरनारायणावृषी ।
धर्ममाचरतां स्थित्यै ऋषभौ लोकसङ्ग्रहम् ॥ ५२ ॥

इत्यस्य न केवलमेतद्रूपेणैव युवां लोकहिताय प्रवृत्तौ । अपि वैभवान्तरेणापीति स्तौति — पूर्णेति । स्वयं भगवत्त्वेन तत्सखत्वेन च ऋषभौ सर्वावतारावतारिश्रेष्ठावपि पूर्णकामावपि स्थित्यै लोकरक्षणाय लोकसङ्ग्रहं लोकेषु तत्तद्धर्मप्रचारहेतुकं धर्ममाचरतां कुर्वतां मध्ये युवां "नरनारायणावृषी" इत्यनयोरल्पांशत्वेन विभूतिवन् निर्देशः ।
उक्तं चैकादशे श्रीभगवता विभूतिकथन एव "नारायणो मुनीनां च" (भा० ११।१६।२५) इति । धार्मिकमौलित्वाद् द्विजपुत्रार्थमवश्यमेष्यथ इत्यत एव मया तथा व्यवसितमिति भावः ।
तथा च श्रीहरिवंशे श्रीकृष्णवाक्यम् (ह० वं० २।११४।८) —

मद्दर्शनार्थं ते बाला हृतास्तेन महात्मना ।
विप्रार्थमेष्यते कृष्णो नागच्छेदन्यथा त्विह ॥ ५३ ॥

अत्राचरतमित्यर्थे आचरतामिति न प्रसिद्धमित्यतश्च तथा न व्याख्यातम् । तस्मान् महाकालतोऽपि श्रीकृष्णस्यैवाधिक्यं सिद्धम् । दर्शयिष्यते चेदं मृत्युञ्जयतन्त्रप्रकरणेन, तदेतन् महिमानुरूपमेवोक्तम् (भा० १०।८९।६३) —

निशाम्य वैष्णवं धाम पार्थः परमविस्मितः ।
यत् किञ्चित् पौरुषं पुंसां मेने कृष्णानुकम्पितम् ॥ ५४ ॥

अत्र महाकालानुभावितमिति तु नोक्तम् । एवमेव स चोक्तलक्षणो भगवान् श्रीकृष्ण एवेति दर्शयितुमाख्यानान्तरमाह "एकदा" (भा० १०।८९।२१) इति श्रीस्वामिलिखितैतत्प्रकरणचूर्णिकापि सुसङ्गता भवति ।
अथ परकीयाण्यपि विरुद्धायमानानि वाक्यानि तदनुगतार्थतया दृश्यन्ते । तत्र श्रीविष्णुपुराणे "उज्जहारात्मनः केशौ सितकृष्णौ महामुने" (वि० पु० ५।१।५९) इति ।
महाभारते —

स चापि केशौ हरिरुद्वबर्हे शुक्लमेकमपरं चापि कृष्णम् ।
तौ चापि केशौ विशतां यदूनां कुले स्त्रियो रोहिणीं देवकीं च ॥ ५५ ॥
तयोरेको बलभद्रो बभूव योऽसौ श्वेतस्तस्य देवस्य केशः ।
कृष्णो द्वितीयः केशवः सम्बभूव केशो योऽसौ वर्णतः कृष्ण उक्तः ॥ ५६ ॥ इति ।

अत्र तात्पर्यं श्रीस्वामिभिरित्थं विवृतम् "भूमेः सुरेतरवरूथ" (भा० २।७।२६) इत्यादि पद्ये । सितकृष्णकेश इत्यत्र —

सितकृष्णकेशत्वं शोभैव न तु वयःपरिणामकृतमविकारित्वात् । यच्च “उज्जहारात्मनः केशौ” (वि० पु० ५।१।५९) इत्यादि । तत् तु न केशमात्रावताराभिप्रायं किन्तु भूभारावतरणरूपं कार्यम् । कियदेतत् ? मत्केशावेव तत् कर्तुं शक्ताविति द्योतनार्थं रामकृष्णयोर्वर्णसूचनार्थं च केशोद्धरणमिति गम्यते । अन्यथा तत्रैव पूर्वापरविरोधापत्तेः । “कृष्णस्तु भगवान् स्वयम्” (भा० १।३।२८) इत्येतद् विरोधाच्च इति ।

इदमप्यत्र तात्पर्यं सम्भवति । ननु देवाः ! किमर्थं मामेवावतारयितुं भवद्भिरागृह्यते ? अनिरुद्धाख्यपुरुषप्रकाशविशेषस्य क्षीरोदश्वेतद्वीपधाम्नो मम यौ केशाविव स्वशिरोधार्यभूतौ तावेव श्रीवासुदेवसङ्कर्षणौ स्वयमेवावतरिष्यतः । ततश्च भूभारहरणं ताभ्यामीषत्करमेवेति ।

अथ “उज्जहारात्मनः केशौ” (वि० पु० ५।१।५९) इत्यस्यैव शब्दार्थोऽपि मुक्ताफलटीकायाम् —

केशौ सुखस्वामिनौ सितो राम आत्मनः सकाशादुज्जहार उद्धृतवान् । हरिवंशे हि कस्याञ्चिद् गिरिगुहायां भगवान् स्वमूर्तिं निक्षिप्य गरुडं च तत्रावस्थाप्य स्वयमत्रागत इत्युक्तम् । तदुक्तम् “स देवानभ्यनुज्ञाय” (ह० वं० १।५५।५०) इत्यादि ।

यैस्तु यथाश्रुतमेवेदं व्याख्यातं ते तु न सम्यक् परामृष्टवन्तः । यतः सुरमात्रस्यापि निर्जरत्वप्रसिद्धिः । अकालकलिते भगवति जरानुदयेन केशशौक्ल्यानुपपत्तिः । न चास्य केशेषु नैसर्गिकसितकृष्णतेति प्रमाणमस्ति । अत एव नृसिंहपुराणे कृष्णावतारप्रसङ्गे शक्तिशब्द एव प्रयुज्यते न तु केशशब्दः । तथा हि —

> वसुदेवाच्च देवक्यामवतीर्य यदोः कुले ।
> सितकृष्णे च मच्छक्ती कंसाद्यान् घातयिष्यतः ॥ ५७ ॥ इत्यादिना ।

अस्तु तर्हि अंशोपलक्षकः केशशब्दः ? नो अविलुप्तसर्वशक्तित्वेन साक्षादादिपुरुषत्वस्यैव निश्चेतुं शक्यत्वात् कृष्णविष्ण्वादिशब्दानामविशेषतः पर्यायत्वप्रतीतेश्च । नैवमवतारान्तरेषु कस्य वान्यस्य जन्मदिनं जयन्त्याख्ययाति प्रसिद्धम् । अत एवोक्तं महाभारते (म० भा० १।१।२५४–२५५) —

> भगवान् वासुदेवश्च कीर्त्यतेऽत्र सनातनः ।
> शाश्वतं ब्रह्म परमं योगिध्येयं निरञ्जनम् ॥ ५८ ॥ इति ।

तस्याकालकलितत्वम् “योऽयं कालस्तस्य तेऽव्यक्तबन्धो चेष्टामाहुः” (भा० १०।३।२६) इत्यादौ श्रीदेवकीदेवीवाक्ये ।

भा० १।११।६ —

> नताः स्म ते नाथ सदाङ्घ्रिपङ्कजं विरिञ्चिवैरिञ्च्यसुरेन्द्रवन्दितम् ।
> परायणं क्षेममिहेच्छतां परं न यत्र कालः प्रभवेत् परः प्रभुः ॥ ५९ ॥

इत्यादौ श्रीद्वारकावासिवाक्ये च प्रसिद्धम् ।
अतो यत् प्रभासखण्डे केशस्य बालत्वमेव च तत् सितिम्नः कालकृतपलितलक्षणत्वमेव च दर्शितं तस्य शरीरिणां शुष्कवैराग्यप्रतिपादनप्रकरणपतितत्वेन सुरमात्रनिर्जरताप्रसिद्धत्वेन चामुख्यार्थत्वान् न स्वार्थे प्रामाण्यम् । "ब्रह्मा येन" इत्यारभ्य "विष्णुर्येन दशावतारग्रहणे क्षिप्तो महासङ्कटे रुद्रो येन कपालपाणिरभितो भिक्षाटनं कारितम्" (ग० पु० १।११३।१५) इत्यादौ "तस्मै नमः कर्मणे" इति गारुडवचनवत् ।
किं च तत्प्रतिपादनाय मत्स्याद्यवताराणां मत्स्यादिशब्दसाम्येन छलोक्तिरेवेयम् । यथा—

> अहो कनकदौरात्म्यं निर्वक्तुं केन युज्यते ।
> नामसाम्यादसौ यस्य धूस्तुरोऽपि मदप्रदः ॥ ६० ॥ इति ।

शिवशास्त्रीयत्वाच्च नात्र वैष्णवसिद्धान्तविरुद्धस्य तस्योपयोगः । यत उक्तं स्कान्द एव षण्मुखं प्रति श्रीशिवेन "शिवशास्त्रेऽपि तद् ग्राह्यं भगवच्छास्त्रयोगि यत्" इति । अन्यतात्पर्यकत्वेन स्वतस्तत्राप्रामाण्याद् युक्तं चैतत् "यथा पङ्केन पङ्काम्भः" (भा० १।८।५२) इत्यादिवत् ।
पाद्मोत्तरखण्डे च शिवप्रतिपादकानां पुराणानामपि तामसत्वमेव दर्शितम् । मात्स्येऽपि तामसकल्पकथामयत्वमिति । युक्तं च तस्य वृद्धसूतस्य श्रीभागवतमपठितवतः श्रीबलदेवावज्ञातुः श्रीभगवत्तत्त्वासम्यग्ज्ञानजं वचनम् "एवं वदन्ति राजर्षे ऋषयः के च नान्विताः" (भा० १०।७७।३०) इतिवत् ।
एतादृशश्रीभागवतवाक्येन स्वविरुद्धपुराणान्तरवचनबाधनं च । "यथेह कर्मजितो लोकः क्षीयते" (छा० ८।१।६) इत्यादि वाक्येन "अपाम सोमममृता अभूम" (ऋग्वेद ८।४८।३) इत्यादिवचनबाधनवज् ज्ञेयम् । अत्रापि "यत् स्ववाचो विरुध्येत नूनं ते न स्मरन्त्युत" (भा० १०।७७।३०) इति युक्तिसद्भावो दृश्यते ।
तत्रैवात्मनः सन्दिग्धत्वमेव तेन सूतेन व्यञ्जितम् । "अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेत्" (म० भा० ६।५।१२) इत्यादिना ।
किं च तत्रैवोत्तरग्रन्थे चन्द्रस्य कलङ्कापत्तिकारणकथने श्रीकृष्णावतारप्रसङ्गे स्वयं विष्णुरेवेत्युक्तत्वात् स्वेनैव विरोधश्च । तस्मान् न केशावतारत्वेऽपि तात्पर्यं केशशब्दस्य बालत्ववाचनं च । छलतो भगवत्तत्त्वाज्ञानतो वेति स्थितम् ।
अतो वैष्णवादिपद्यानां शब्दोत्थमर्थमेवं पश्यामः—

> अंशवो ये प्रकाशन्ते मम ते केशसञ्ज्ञिताः ।
> सर्वज्ञाः केशवं तस्मान् मामाहुर्मुनिसत्तम ॥ ६१ ॥

इति सहस्रनामभाष्योत्थापितभारतवचनात् केशशब्देनांशुरुच्यते ।
तत्र च सर्वत्र केशेतरशब्दाप्रयोगात् नानावर्णांशूनां श्रीनारददृष्टतया मोक्षधर्मप्रसिद्धेश्च ।
तथा चांशुत्वे लब्धे तौ चांशू वासुदेवसङ्कर्षणाववतारसूचकतया निर्दिष्टाविति तयोरेव

स्यातामिति गम्यते । तदीययोरपि तयोरनिरुद्धेऽभिव्यक्तिश्च युज्यत एव । अवतारितेजोऽन्तर्भूतत्वादवतारस्य । एवमेव "सत्त्वं रजस्तमः" (भा० १।२।२३) इत्यादिप्रथमस्कन्धपद्यप्राप्तमनिरुद्धाख्यपुरुषावतारत्वम् "भवानीनाथैः" (भा० ५।१७।१६) इत्यादिपञ्चमस्कन्धगद्यप्राप्तं सङ्कर्षणावतारत्वं च भवस्य सङ्गच्छते ।

ततश्च "उज्जहार" इत्यस्यायमर्थः — आत्मनः सकाशात् श्रीवासुदेवसङ्कर्षणांशभूतौ केशावंशू उज्जहार उद्धृतवान् प्रकटीकृत्य दर्शितवानित्यर्थः । अत्र "अयं सुमेरुः" इत्येकदेशदर्शनेनैवाखण्डसुमेरुनिर्देशवत् तद्दर्शनेनापि पूर्णस्यैवाविर्भावनिर्देशो ज्ञेयः ।

अथ स चापि केशावित्यादिकव्याख्या । "उद्बर्हे" योगबलेनात्मनः सकाशाद् विच्छिद्य दर्शयामास । स चापीति चशब्दः पूर्वमुक्तं देवकर्तृकं निवेदनरूपमर्थं समुच्चिनोति । अपिशब्दस्तदुद्बर्हणे श्रीभगवत्सङ्कर्षणयोरपि हेतुकर्तृत्वं सूचयति ।

तौ चापीति चशब्दोऽनुक्तसमुच्चयार्थत्वेन भगवत्सङ्कर्षणौ स्वयमाविविशतुः । पश्चात् तौ च तत्तादात्म्येनाविविशतुरिति बोधयति । अपिशब्दो यत्रानुस्यूतावमू सोऽपि तदंशा अपीति गमयति । "तयोरेको बलभद्रो बभूव" इत्यादिकं तु "नरनारायणो भवेत् हरिरेव भवेन्नरः" इत्यादिवत् तदैक्यावाप्त्यपेक्षया ।

केशवः श्रीमथुरायां केशवस्थानाख्यमहायोगपीठाधिपत्वेन प्रसिद्धः । स एव कृष्ण इति । अत एवोदाहरिष्यते "भूमेः सुरेतर" (भा० २।७।२६) इत्यादि । श्रीनृसिंहपुराणे तु "सितकृष्णे च मच्छक्ती" इति तत्तद्वर्णनिर्देशेनांशुवाचक एव शक्तिशब्द इति तत्तुल्यतात्पर्यपेक्षया ।

श्रीमद्भागवतस्य तु नैषा प्रक्रियावकलिता । तस्मात् "एवं वदन्ति राजर्षे" (भा० १०।७७।३०) इत्यादिवदेव साभिमता । कदाचिदात्मगोपनाय भगवान् यदन्यथा दर्शयति तदेव ऋषयो यथामति प्रस्तुवन्तीति । तदेतदनुवादकस्य "भूमेः सुरेतरवरूथ" इत्यादौ "कलया सितकृष्णकेशः" इत्यस्य च योजना ।

कलया अंशेन यः सितकृष्णकेशः सितकृष्णौ केशौ यत्र तथाविधः स एव साक्षाद्भगवान् जात इत्येवं कर्तव्येति । अत एव पुरुषनारायणस्य तथागमनप्रतिपादकश्रीहरिवंशवाक्यमपि तत्तेजसमाकर्षणविवक्षयैवोक्तम् । सर्वेषां प्रवेशश्च तस्मिन् सयुक्तिकमेवोदाहरणीयः ।

अतः पाद्मोत्तरखण्डे "नृसिंहरामकृष्णेषु षाड्गुण्यपरिपूरणम्" इत्यवतारान्तरसाधारण्यमपि मन्तव्यम् । किन्त्ववताराणां प्रसङ्गे तेषु श्रेष्ठे विविदिषिते सामान्यतस्तावत् सर्वश्रेष्ठास्त्रय उक्ताः । तेष्वप्युत्तरोत्तरत्राधिक्यक्रमाभिप्रायेण श्रीकृष्णे श्रैष्ठ्यं विवक्षितम् ।

अत एव श्रीविष्णुपुराणे मैत्रेयेण हिरण्यकशिपुत्वादिषु जयविजययोस्तयोरमुक्तिमुक्तिकारणे पृष्टे श्रीपराशरोऽपि श्रीकृष्णस्यैवात्युद्भटैश्वर्यप्रकाशमाह । किं च श्रीकृष्णमप्राप्यान्यत्र त्वसुराणां मुक्तिर्न सम्भवति । एवकारद्वयेन स्वयमेव श्रीगीतासु तथा सूचनात् (गीता १६।१९-२०) —

> तानहं द्विषतः क्रूरान् संसारेषु नराधमान् ।
> क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ॥ ६२ ॥

आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि ।
मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम् ॥ ६३ ॥ इति ।

कुत्रचिद् भगवद्द्वेषिणां तत्स्मरणादिप्रभावेन श्रूयतां वा मुक्तिः । सर्वेषामपि तद्द्वेषिणां तु मुक्तिप्रदत्वमन्यत्रावतारेऽवतारिणि वा न क्वचिच्च श्रूयते । तस्मात् तेषामपि मुक्तिदातृत्वाय श्रीकृष्ण एवैश्वर्यप्रकाशाधिक्यं दर्शयति । युक्तमेव वर्णयामास स श्रीपराशरः ।
अत एव सर्वमैश्वर्यसाक्षात्कारस्य मुक्तिहेतुत्वमुक्त्वा पुनश्च पूतनादिमोक्षं विचिन्त्य कालनेम्यादीनां च तदभावमाशङ्क्य तदप्यसहमानस्तस्य तु श्रीकृष्णाख्यस्य भगवतः परमाद्भुतस्वभाव एवायमित्युवाच सर्वान्तिमगद्येन "अयं हि भगवान् कीर्तितः संस्मृतश्च द्वेषानुबन्धेनाप्यखिलसुरासुरादिदुर्लभं फलं प्रयच्छति किमुत सम्यग् भक्तिमताम्" (वि० पु० ४।१५।९) इत्यनेन ।
अतः श्रीभागवतमते तयोर्जन्मत्रयनियमश्च श्रीकृष्णादेव तन्मोक्षः सम्भवेदित्यपेक्षयैवेति ज्ञेयम् । अत एव श्रीनारदेनापि तमुद्दिश्यैवोक्तम् "वैरेण यं नृपतयः" (भा० ११।५।४८) इत्यादिना ।
श्रीब्रह्मणा च "ये च प्रलम्बखरदर्दुर" (भा० २।७।३४) इत्यादिना सर्वेषां मुक्तिदत्वं च तस्य श्रीकृष्णस्य निजप्रभावातिशयेन यथा कथञ्चित् स्मर्तृचित्ताकर्षणातिशयस्वभावात् । अन्यत्र तु तथा स्वभावो नास्तीति नास्ति मुक्तिदत्वम् । अत एव वेणस्यापि विष्णुद्वेषिणस्तद्वदावेशाभावान् मुक्त्यभाव इति । अत एवोक्तम् "तस्मात् केनाप्युपायेन मनः कृष्णे निवेशयेत्" (भा० ७।१।३१) इति । तस्मादस्त्येव सर्वतोऽप्याश्चर्यतमा शक्तिः श्रीकृष्णस्येति सिद्धम् ।
तदेवं विरोधपरिहारेण विरुद्धार्थानामप्यर्थानुकूल्येन श्रीकृष्णस्य स्वयं भगवत्त्वमेव दृढीकृतम् । तत्र च वेदान्तसूत्रादावप्येकस्य महावाक्यस्य नानावाक्यविरोधपरिहारेणैव स्थापनाया दर्शनान् नाप्यत्रैवेदृशमित्यश्रद्धेयम् । वाक्यानां दुर्बलबलित्वमेव विचारणीयं न तु बह्वल्पता । दृश्यते च लोके — एकेनापि युद्धे सहस्रपराजय इति ।
एवं च बहुविरोधपरिहारेणैव स्वस्मिन् श्रीकृष्णाख्ये परब्रह्मणि सर्ववेदाभिधेयत्वमाह (भा० ११।२१।४२-४३) —

किं विधत्ते किमाचष्टे किमनूद्य विकल्पयेत् ।
इत्यस्या हृदयं लोके नान्यो मद् वेद कश्चन ॥ ६४ ॥
मां विधत्तेऽभिधत्ते मां विकल्प्यापोह्यते त्वहम् ॥ इति ।

विकल्प्य विविधं कल्पयित्वा । अपोह्यते तत्तन्निषेधेन सिद्धान्त्यते यत् तदहं श्रीकृष्णलक्षणं वस्त्विति ॥ श्रीभगवान् ॥

३० । तदेवम् "कृष्णस्तु भगवान् स्वयम्" (भा० १।३।२८) इत्येतत् प्रतिज्ञावाक्याय महावीरराजायेवात्मनैव निर्जित्यात्मसात्कृतविरोधिशतार्थायापि शोभाविशेषेण प्रेक्षा-

वतामानन्दनार्थं चतुरङ्गिणीं सेनामिवान्यामपि वचनश्रेणीमुपहरामि । तत्र तस्य लीलावतारकर्तृत्वमाह (भा० १०।२।४०) —

मत्स्याश्वकच्छपनृसिंहवराहहंसराजन्यविप्रविबुधेषु कृतावतारः ।
त्वं पासि नस्त्रिभुवनं च यथाधुनेश भारं भुवो हर यदूत्तम वन्दनं ते ॥ ६५ ॥

इत्यादि ॥ स्पष्टम् ॥ देवाः श्रीभगवन्तम् ॥

३१ । तथा "सुरेष्वृषिष्वीश तथैव" (भा० १०।१४।२०) इत्यादि ॥
स्पष्टम् ॥ ब्रह्मा तम् ॥

३२ । तथा "बहूनि सन्ति नामानि रूपाणि च सुतस्य ते" (भा० १०।८।१५) इत्यादि ॥
स्पष्टम् ॥ गर्गः श्रीव्रजराजम् ॥

३३ । एवम् "यस्यावतारा ज्ञायन्ते शरीरेष्वशरीरिणः" (भा० १०।१०।३४) इत्यादि । शरीरिष्वशरीरिण इत्यपि ज्ञाने हेतुगर्भविशेषणम् । शरीरिषु मध्येऽप्यवतीर्णस्य सतः स्वयमशरीरिणः । "नातः परं परम यद् भवतः स्वरूपम्" (भा० ३।९।३) इत्यादि द्वितीयसन्दर्भोदाहरणप्रघट्टकदृष्ट्या जीववद् देहदेहिपार्थक्याभावेन मुख्यमत्वर्थायोगात् ॥
कुवेरात्मजौ श्रीभगवन्तम् ॥

३४ । अपरं च (भा० १०।५८।३७) —

यत्पादपङ्कजरजः शिरसा बिभर्ति
श्रीरब्जजः सगिरिशः सह लोकपालैः
लीलातनुः स्वकृतसेतुपरीप्सया यः
कालेऽदधत् स भगवान् मम केन तुष्येत् ॥ ६६ ॥

स्पष्टम् ॥ नग्नजिच्छ्रीभगवन्तम् ॥

३५ । परं च (भा० १०।८७।४६) —

नमस्तस्मै भगवते कृष्णायाकुण्ठमेधसे ।
यो धत्ते सर्वभूतानामभवायोशतीः कलाः ॥ ६७ ॥

टीका च — "नम इति श्रीकृष्णावतारतया नारायणं स्तौति 'एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम्' (भा० १।३।२८) इत्युक्तेः" इत्येषा ।
अत एव श्रुतिस्तवश्रवणानन्तरं तस्मा एव नमस्कारात् श्रुतिस्तुतावपि श्रीकृष्ण एव स्तुत्य इत्यायातम् । तथैव श्रुतिभिरपि "निभृतमरुन्मनोऽक्षदृढयोगयुजः" (भा० १०।८७।२३) इत्यादिपद्ये निजारिमोक्षप्रदत्वाद्यसाधारणलिङ्गेन स एव व्यञ्जितः ॥

स्पष्टम् ॥ श्रीनारदः ॥

३६ । तथा गुणावतारकर्तृत्वमाह (भा० ११।२९।७) —

इत्युद्धवेनात्यनुरक्तचेतसा पृष्टो जगत्क्रीडनकः स्वशक्तिभिः ।
गृहीतमूर्तित्रय ईश्वरेश्वरो जगाद सप्रेममनोहरस्मितः ॥ ६८ ॥

स्पष्टम् । अत्र "अजानतां त्वत्पदवीम्" (भा० १०।१४।१९) इत्युदाहृतं वचनमप्यनुसन्धेयम् ॥ श्रीशुकः ॥

३७ । अथ पुरुषावतारकर्तृत्वमप्याह (भा० १।९।३२) —

इति मतिरुपकल्पिता वितृष्णा भगवति सात्वतपुङ्गवे विभूम्नि ।
स्वसुखमुपगते क्वचिद् विहर्तुं प्रकृतिमुपेयुषि यद्भवप्रवाहः ॥ ६९ ॥

टीका च "परमफलरूपां श्रीकृष्णरतिं प्रार्थयितुं प्रथमं स्वकृतमर्पयति — इतीति । विगतो भूमा यस्मात् तस्मिन् । यमपेक्ष्यान्यत्र महत्त्वं नास्तीत्यर्थः । तदेव पारमैश्वर्यमाह स्वसुखं स्वरूपभूतं परमानन्दमुपगते प्राप्तवत्येव । क्वचित् कदाचिद् विहर्तुं क्रीडितुं प्रकृतिमुपेयुषि स्वीकृतवति न तु स्वरूपतिरोधानेन जीववत् पारतन्त्र्यमित्यर्थः । विहर्तुमित्युक्तं प्रपञ्चयति यद् यतो भवप्रवाहः सृष्टिपरम्परा भवति" इत्येषा ।
एवमेव तं प्रत्युक्तं देवैरप्येकादशे "त्वत्तः पुमान् समधिगम्य ययास्य वीर्यं धत्ते महान्तमिव गर्भममोघवीर्यः" (भा० ११।६।१६) इति ।
टीका च "त्वत्तः पुरुषो वीर्यं शक्तिं समधिगम्य प्राप्य यया मायया सह महान्तं धत्ते । कमिव ? अस्य विश्वस्य गर्भमिव" इत्येषा ॥ भीष्मः श्रीभगवन्तम् ॥

३८ । अत एव "भवभयमपहर्तुम्" (भा० ११।२९।४९) इत्यादौ तस्यादिपुरुषत्वं श्रेष्ठत्वमप्याह "पुरुषमृषभमाद्यं कृष्णसञ्ज्ञं नतोऽस्मि" इति ।
कृष्णेति सञ्ज्ञा तन्नामत्वेनातिप्रसिद्धिर्यस्येति मूर्त्यन्तरं निषिध्यते । तन्मूर्तेर्नमस्क्रियमाणत्वेन च नित्यसिद्धत्वं दर्श्यते । तत्रैव टीकाकृद्भिरपि "तं वन्दे परमानन्दं नन्दनन्दनरूपिणम्" इत्युक्तम् ॥ श्रीशुकः ॥

३९ । तदेवम् "जगृहे" (भा० १।३।१) इत्यादिप्रकरणे यत् स्वयमुत्प्रेक्षितं तच्च श्रीस्वामिसम्मत्यापि दृढीकृतम् । पुनरपि तत्सम्मतिरभ्यस्यते यथा (भा० १०।७२।१५) —

श्रुत्वाजितं जरासन्धं नृपतेर्ध्यायतो हरिः ।
आहोपायं तमेवाद्य उद्धवो यमुवाच ह ॥ ७० ॥

टीका च "आद्यो हरिः श्रीकृष्णः" इत्येषा ॥ श्रीशुकः ॥

४० । किं च “अथाहमंशभागेन देवक्याः पुत्रतां शुभे प्राप्स्यामि” (भा० १०।२।९) इति । “अंशभागेन” इत्यत्र पूर्णतोचितमेवार्थं बहुधा योजयद्भिर्मध्ये अंशेन पुरुषरूपेण मायया भागो भजनमीक्षणं यस्य तेनेति च व्याचक्षाणैरन्ते सर्वथा परिपूर्णरूपेणेति विवक्षितम् "कृष्णस्तु भगवान् स्वयम्” (भा० १।३।२८) इत्युक्तत्वात् । इत्येवं हि तैर्व्याख्यातम् ॥ श्रीभगवान् योगमायाम् ॥

४१ । एवम् (भा० १०।८५।३१) —

> यस्यांशांशांशभागेन विश्वोत्पत्तिलयोदयाः ।
> भवन्ति किल विश्वात्मंस्तं त्वाद्याहं गतिं गता ॥ ७१ ॥

टीका च “यस्यांशः पुरुषस्तस्यांशो माया तस्या अंशा गुणास्तेषां भागेन परमाणुमात्रलेशेन विश्वोत्पत्त्यादयो भवन्ति । तं त्वा त्वां गतिं शरणं गतास्मि” इत्येषा ॥ श्रीदेवकीदेवी श्रीभगवन्तम् ॥

४२ । यथा च “नारायणस्त्वं न हि सर्वदेहिनाम्” (भा० १०।१४।१४) इत्यादौ “नारायणोऽङ्गं नरभूजलायनात्” इति ।
टीका च “नरादुद्भूता येऽर्थाः । तथा नराज् जातं यज् जलं तदयनाद् यो नारायणः प्रसिद्धः सोऽपि तवाङ्गं मूर्तिः” इत्येषा ।
अत्र स तवाङ्गं त्वं पुनरङ्गीत्यसौ तु विशदोऽर्थः । न तु स्तुतिमात्रमिदम् “दृष्ट्वाघासुरमोक्षणं प्रभवतः प्राप्तः परं विस्मयम्” (भा० १०।१३।१५) इत्युक्तरीत्या क्वचिदप्यवतार्यवतारान्तरेषु तादृशस्यापि मोक्षमदृष्टगोचरं दृष्ट्वा विस्मयं प्राप्तवान् ब्रह्मा । “द्रष्टुं मञ्जुमहित्वमन्य अपि तद्वत्सानितो वत्सपान् नीत्वान्यत्र कुरुद्वहान्तरदधात्” (भा० १०।१३।१५) इत्युक्तरीत्या तस्यापरमपि माहात्म्यं दिदृक्षुस्तथा माहात्म्यं ददर्शेति प्रकरणस्वारस्येनापि लब्धम् । न चापरमाहात्म्यदर्शनं सम्भवतिमात्रम् ।
भा० १०।१३।४६ —

> तावत् सर्वे वत्सपालाः पश्यतोऽजस्य तत्क्षणात् ।
> व्यदृश्यन्त घनश्यामाः पीतकौशेयवाससः ॥ ७२ ॥

इत्यादिना शक्तिभिरजाद्याभिरैश्वर्यैरणिमाद्यैश्चतुर्विंशतिसङ्ख्यातत्त्वैर्महदादिभिस्तत्सहकारिभिः कालस्वभावाद्यैस्तत्सम्भूतैर्ब्रह्माण्डैस्तदन्तर्भूतस्रष्टृभिर्ब्रह्मादिभिर्जीवैश्च स्तम्बपर्यन्तैः पृथक् पृथगुपासितास्तादृशब्रह्माण्डेश्वरकोटयः श्रीकृष्णेनैव तत्तदंशांशेनाविर्भाव्य ब्रह्माणं प्रति साक्षादेव दर्शिता इत्युक्तम् ।
तदीदृशमेव “कृष्णस्तु भगवान् स्वयम्” (भा० १।३।२८) इत्यत्राविष्कृतसर्वशक्तित्वादित्येतत्स्वामिव्याख्यानस्यासाधारणं बीजं भवेत् । विश्वरूपदर्शनादीनां तत्तद्ब्रह्माण्डान्तर्यामिपुरुषाणामेकतरेणापि शक्यत्वात् । तस्माद् विराट्पुरुषयोरिव पुरुषभगवतोरपि “जगृहे पौरुषं रूपम्” (भा० १।३।१) इत्यादावुपासनार्थमेव तैरभेदव्याख्या कृतेति

गम्यते । वस्तुतस्तु परमाश्रयत्वेन श्रीकृष्ण एव तैरङ्गीकृतोऽस्ति । यथा (भा० दी० १०।२।१) —

विश्वसर्गविसर्गादिनवलक्षणलक्षितम् ।
श्रीकृष्णाख्यं परं धाम जगद्धाम नमामि तत् ॥ ७३ ॥
दशमे दशमं लक्ष्यमाश्रिताश्रयविग्रहम् ।
क्रीडद् यदुकुलाम्भोधौ परानन्दमुदीर्यते ॥ ७४ ॥ इति ।

यद्यन्येषामपि परमाश्रयत्वं तन् मतं तदा दशम इत्यनर्थकं स्यात् । तस्मान् "नारायणोऽङ्गम्" इति युक्तमेवोक्तम् ॥ ब्रह्मा श्रीभगवन्तम् ॥

४३ । अवतारप्रसङ्गेऽपि तथैव स्पष्टम् (भा० १०।१।२१-२३) —

गिरं समाधौ गगने समीरितां निशम्य वेधास्त्रिदशानुवाच ह ।
गां पौरुषीं मे शृणुतामराः पुनर्विधीयतामाशु तथैव मा चिरम् ॥ ७५ ॥
पुरैव पुंसावधृतो धराज्वरो भवद्भिरंशैर्यदुषूपजन्यताम् ।
स यावदुर्व्या भरमीश्वरेश्वरः स्वकालशक्त्या क्षपयंश्चरेद् भुवि ॥ ७६ ॥
वसुदेवगृहे साक्षाद् भगवान् पुरुषः परः ।
जनिष्यते तत्प्रियार्थं सम्भवन्तु सुरस्त्रियः ॥ ७७ ॥

पौरुषीं पुरुषेण "सृजामि तन्नियुक्तोऽहम्" (भा० २।६।३१) इत्याद्यनुसारात् पुरुषाभिन्नेन विष्णुरूपेण क्षीरोदशायिना स्वयमेवोक्तां गां वाचम् ।
पुरुषस्यैव वाचमनुवदति — पुरैवेति । पुंसा आदिपुरुषेण "कृष्णः स्वयं समभवत् परमः पुमान् यः" (ब्र० सं० ५।३९) इत्यनुसारात् । स्वयं भगवता श्रीकृष्णेनेत्यर्थः । अंशैः श्रीकृष्णांशभूतैस्तत्पार्षदैः श्रीदामसुदामश्रीमदुद्धवसात्यक्यादिभिः सह । इत्थमेव प्राचुर्येणोक्तम् (भा० १०।१।६२-६३) —

नन्दाद्या ये व्रजे गोपा याश्चामीषां च योषितः ।
वृष्णयो वसुदेवाद्या देवक्याद्या यदुस्त्रियः ॥ ७८ ॥
सर्वे वै देवताप्राया उभयोरपि भारत ।
ज्ञातयो बन्धुसुहृदो ये च कंसमनुव्रताः ॥ ७९ ॥ इति ।

तस्यादिपुरुषत्वमेव व्यनक्ति — स इति सर्वान्तर्यामित्वात् । पुरुषस्तावदीश्वरः । तस्याप्यंशित्वात् स आदिपुरुषः श्रीकृष्णः पुनरीश्वरेश्वरः त्र्यधीशशब्दवत् । तथा च दशमस्य पञ्चाशीतितमे श्रीमदानकदुन्दुभिनोक्तम् "युवां न नः सुतौ साक्षात् प्रधानपुरुषेश्वरौ" (भा० १०।८५।१८) इति ।
स्वकालशक्त्या स्वशक्त्या कालशक्त्या च । ईश्वरेश्वरत्वे च हेतुः — साक्षात् स्वयमेव भगवानिति । तदलं मयि तत्प्रार्थनयेति भावः ।

तत्प्रियार्थं तत्प्रीत्यै । सुरस्त्रियः श्रीमदुपेन्द्रप्रेयस्यादिरूपाः काश्चित् सम्भवन्तु मिलिता भवन्तु । साक्षादवतरतः श्रीभगवतो नित्यानपायिमहाशक्तिरूपासु तत्प्रेयसीष्वप्यवतरन्तीषु श्रीभगवति तदंशान्तरवत् ता अपि प्रविशन्त्वित्यर्थः । तत्प्रियाणां तासामेव दास्यादिप्रयोजनाय जायन्तामिति वा ।

अनेन तैरप्रार्थितस्याप्यस्यार्थस्यादेशेन परमभक्ताभिस्ताभिर्लीलाविशेष एव भगवतः स्वयमवतितीर्षायां कारणम् । भारावतरणन् त्वानुषङ्गिकमेव भविष्यतीति व्यञ्जितम् । तदेवं श्रुतीनां च दण्डकारण्यवासिमुनीनां चाग्निपुत्राणां श्रीगोपिकादित्वप्राप्तिर्यत् श्रूयते तदपि पूर्ववदेव मन्तव्यमिति ।

अत्र प्रसिद्धार्थे "नायं श्रियोऽङ्ग उ नितान्तरतेः प्रसादः स्वर्योषितां नलिनगन्धरुचां कुतोऽन्याः" (भा० १०।४७।६०) इति विरुध्येत ।

न च सुरस्त्रीणां सम्भववाक्यं श्रीमहिषीवृन्दपरं तासामपि तन्निजशक्तिरूपत्वेन दर्शयिष्यमाणत्वात् ॥ श्रीशुकः ॥

४४ । तदेवमवतारप्रसङ्गेऽपि श्रीकृष्णस्य स्वयं भगवत्त्वमेवायातम् । यस्मादेवं तस्मादेव श्रीभागवते महाश्रोतृवक्तृणामपि श्रीकृष्ण एव तात्पर्यं लक्ष्यते । तत्र श्रीविदुरस्य (भा० ४।१७।६-७) —

> यच् चान्यदपि कृष्णस्य भवेद् भगवतः प्रभोः ।
> श्रवः सुश्रवसः पुण्यं पूर्वदेहकथाश्रयम् ॥ ८० ॥
> भक्ताय मेऽनुरक्ताय तव चाधोक्षजस्य च ।
> वक्तुमर्हसि योऽदुह्यद् वैन्यरूपेण गामिमाम् ॥ ८१ ॥

पूर्वदेहः पृथ्ववतारः । लोकदृष्टावभिव्यक्तिरीत्या पूर्वत्वम् । तत्कथैवाश्रयो यस्य तत् ॥ विदुरः ॥

४५ । अथ श्रीमैत्रेयस्य तदनन्तरमेव (भा० ४।१७।८) —

> चोदितो विदुरेणैवं वासुदेवकथां प्रति ।
> प्रशस्य तं प्रीतमना मैत्रेयः प्रत्यभाषत ॥ ८२ ॥

तत्प्रशंसया प्रीतमनस्त्वेन चास्यापि तथैव तात्पर्यं लभ्यते । अत एवात्र श्रीवसुदेवनन्दनत्वेनैव वासुदेवशब्दः प्रयुक्तः ॥ श्रीसूतः ॥

४६ । अथ श्रीपरीक्षितः (भा० १।१९।५) —

> अथो विहायेमममुं च लोकं विमर्शितौ हेयतया पुरस्तात् ।
> कृष्णाङ्घ्रिसेवामधिमन्यमान उपाविशत् प्रायममर्त्यनद्याम् ॥ ८३ ॥

टीका च "श्रीकृष्णाङ्घ्रिसेवामधिमन्यमानः सर्वपुरुषार्थाधिकां जानन्" इत्येषा ॥ श्रीसूतः ॥

४७ । भा० १।१९।२० —

> न वा इदं राजर्षिवर्य चित्रं भवत्सु कृष्णं समनुव्रतेषु ।
> येऽध्यासनं राजकिरीटजुष्टं सद्यो जहुर्भगवत्पार्श्वकामाः ॥ ८४ ॥

भवत्सु पाण्डोर्वंश्येषु ये जहुरिति श्रीयुधिष्ठिराद्यभिप्रायेण । अत एव तत्र स्थितानां सर्व-श्रोतृणामपि श्रीकृष्ण एव तात्पर्यमायाति ॥ श्रीमहर्षयः श्रीपरीक्षितम् ॥

४८ । भा० १।१९।३५–३६ —

> अपि मे भगवान् प्रीतः कृष्णः पाण्डुसुतप्रियः ।
> पैतृष्वसेयप्रीत्यर्थं तद्गोत्रस्यात्तबान्धवः ॥ ८५ ॥
> अन्यथा तेऽव्यक्तगतेर्दर्शनं नः कथं नृणाम् ।
> नितरां म्रियमाणानां संसिद्धस्य वनीयसः ॥ ८६ ॥

तेषां पैतृष्वस्रीयाणां पाण्डुसुतानां गोत्रस्य मे आत्तं स्वीकृतं बान्धवं बन्धुकृत्यं येन । ते तव श्रीकृष्णैकरसिकस्य । वनीयसोऽत्युदारतया मां याचेथा इति प्रवर्तकस्येत्यर्थः ॥ राजा श्रीशुकम् ॥

४९ । भा० २।३।१५ —

> स वै भागवतो राजा पाण्डवेयो महारथः ।
> बालक्रीडनकैः क्रीडन् कृष्णक्रीडां य आददे ॥ ८७ ॥

या या श्रीकृष्णस्य वृन्दावनादौ बालक्रीडा श्रुतास्ति तत्प्रेमावेशेन तत्सख्यादिभाववान् तां तामेव क्रीडां यः कृतवानित्यर्थः ॥ श्रीशौनकः ॥

५० । एवं सजातीयानि बहून्येव वचनानि विराजन्ते । तथा "कथितो वंशविस्तारः" (भा० १०।१।१) इत्यारभ्य "नैषातिदुःसहा क्षुन् माम्" (भा० १०।१।१३) इत्यन्तं दशमस्कन्धप्रक-रणमप्यनुसन्धेयम् ।
किं च "इत्थं द्विजा यादवदेवदत्तः" (भा० १०।१२।४०) इत्यादि ।
येन श्रवणेन नितरां गृहीतं वशीकृतं चेतो यस्य सः ॥ श्रीसूतः ॥

५१ । तथा "येन येनावतारेण" (भा० १०।७।१) इत्यादि "यच्छृण्वतोऽपैत्यरतिः" (भा० १०।७।२) इत्यादि च ।
टीका च —

> कृष्णार्भकसुधासिन्धुसम्प्लवानन्दनिर्भरः ।
> भूयस्तदेव सम्प्रष्टुं राजान्यदभिनन्दति ॥ ८८ ॥

येन येन मत्स्याद्यवतारेणापि यानि यानि कर्माणि करोति तानि नः कर्णसुखावहानि मनः प्रीतिकराणि च भवन्त्येव । तथापि यच्छृण्वतः पुंसः पुम्मात्रस्यारतिर्मनोग्लानिस्तन्मूलभूतविविधा तृष्णा चापगच्छति तथा सत्त्वशुद्धिहरिभक्तिहरिदास्यसख्यानि च भवन्त्यचिरेणैव तदेवं हारं हरेश्चरित्रं मनोहरं वा वद अनुग्रहं यदि करोषि इत्येषा ॥ राजा ॥

५२ । अथ श्रीशुकदेवस्य "अपि मे भगवान् प्रीतः कृष्णः पाण्डुसुतप्रियः" (भा० १।१९।३५) इत्यादिना श्रीकृष्ण एव स्वरतिं व्यज्य म्रियमाणानां श्रोतव्यादिप्रश्नेनैवान्तकाले श्रीकृष्ण एव मय्यप्युपदिश्यतामिति राजाभिप्रायानन्तरम् (भा० २।१।१) —

> वरीयानेष ते प्रश्नः कृतो लोकहितं नृप ।
> आत्मवित् सम्मतः पुंसां श्रोतव्यादिषु यः परः ॥ ८९ ॥

ते त्वया । पुंसां श्रोतव्यादिषु मध्ये यः परः श्रीकृष्णश्रवणाभिप्रायेण परमः प्रश्नः कृतः । एष वरीयान् । सर्वावतारावतारिप्रश्नेभ्यः परममहान् । स च लोकहितं यथा स्यात् तथैव कृतः । त्वं तु तथाभूतश्रीकृष्णैकनिर्बन्धप्रेमत्वात् कृतार्थहेवेति भावः ।
तदुक्तम् (भा० २।४।१) —

> वैयासकेरिति वचस्तत्त्वनिश्चयमात्मनः ।
> उपधार्य मतिं कृष्णे औत्तरेयः सतीं व्यधात् ॥ ९० ॥ इति ।

सती विद्यमाना कृष्णे या मतिस्तामेव विशेषेण धृतवानित्यर्थः । एतदेव व्यक्तीकरिष्यते राज्ञा (भा० २।८।२-३) —

> हरेरद्भुतवीर्यस्य कथा लोकसुमङ्गलाः ।
> कथयस्व महाभाग यथाहमखिलात्मनि ।
> कृष्णे निवेश्य निःसङ्गं मनस्त्यक्ष्ये कलेवरम् ॥ ९१ ॥ इति ॥ श्रीशुकः ॥

५३ । एवमेव "कथितो वंशविस्तारः" (भा० १०।१।१) इत्याद्यनन्तरम् "सम्यग्व्यवसिता बुद्धिः" (भा० १०।१।१५) इत्यादि ।
पूर्वं मया नानावतारादिकथाभिरभिनन्दितस्यापि यच्छ्रीवसुदेवनन्दनस्यैव कथायां नैष्ठिकी स्थायिरूपा रतिर्जाता एषा बुद्धिस्तु सम्यग्व्यवसिता परमरसविदग्धेत्यर्थः ॥ श्रीशुकः ॥

५४ । तथा "इत्थं द्विजा यादवदेवदत्तः श्रुत्वा स्वरातुश्चरितं विचित्रम्" (भा० १०।१२।४०) इत्यनन्तरम् (भा० १०।१२।४४) —

इत्थं स्म पृष्टः स तु बादरायणिस्तत्स्मारितानन्तहृताखिलेन्द्रियः ।
कृच्छ्रात् पुनर्लब्धबहिर्दृशिः शनैः प्रत्याह तं भागवतोत्तमोत्तम ॥ ९२ ॥

अनन्तः प्रकटितपूर्णैश्वर्यः श्रीकृष्णः । सर्वदा तेन स्मर्यमाणेऽपि तस्मिन् प्रतिक्षणनव्यत्वेनैव तत्स्मारितेत्युक्तम् ॥ श्रीसूतः ॥

५५ । अत एव "स वै भागवतो राजा" (भा० २।३।१५) इत्याद्यनन्तरं राज्ञा समानवासनत्वेनैव तमाह (भा० २।३।१६) —

वैयासकिश्च भगवान् वासुदेवपरायणः ।
उरुगायगुणोदाराः सतां स्युर्हि समागमे ॥ ९३ ॥

चशब्दः प्राग्वर्णितेन समानवासनत्वं बोधयति । तस्माच्छ्रीवसुदेवनन्दनत्वेनैवात्रापि वासुदेवशब्दो व्याख्येयः । अन्येषामपि सतां समागमे तावदुरुगायस्य गुणोदाराः कथा भवन्ति । तयोस्तु श्रीकृष्णचरितप्रधाना एव ता भवेयुरिति भावः ॥ श्रीशौनकः ॥

५६ । किं बहुना श्रीशुकदेवस्य श्रीकृष्ण एव तात्पर्ये तदेकचरितमयौ ग्रन्थार्धायमानौ दशमैकादशस्कन्धावेव प्रमाणम् । स्कन्धान्तरेष्वन्येषाम् चरितं सङ्क्षेपेणैव समाप्य ताभ्यां तच्चरितस्यैव विस्तारितत्वात् । अत एव आरम्भत एव तत्प्रसादं प्रार्थयते "श्रियः पतिः" (भा० २।४।२०) इत्यादौ "पतिर्गतिश्चान्धकवृष्णिसात्वतां प्रसीदतां मे भगवान् सतां पतिः" । स्पष्टम् ॥ श्रीशुकः ॥

५७ । अथ श्रीव्यासदेवस्य (भा० १।७।६-७) —

अनर्थोपशमं साक्षाद् भक्तियोगमधोक्षजे ।
लोकस्याजानतो व्यासश्चक्रे सात्वतसंहिताम् ॥ ९४ ॥
यस्यां वै श्रूयमाणायां कृष्णे परमपूरुषे ।
भक्तिरुत्पद्यते पुंसः शोकमोहभयापहा ॥ ९५ ॥

अधोक्षजे श्रीकृष्णे । ह० वं० २।१०१।३०-३२ —

अधोऽनेन शयानेन शकटान्तरचारिणा ।
राक्षसी निहता रौद्रा शकुनीवेशधारिणी ॥ ९६ ॥
पूतना नाम घोरा सा महाकाया महाबला ।
विषदिग्धस्तनं क्षुद्रा प्रयच्छन्ती जनार्दने ॥ ९७ ॥
ददृशुर्निहतां तत्र राक्षसीं वनगोचराः ।
पुनर्जातोऽयमित्याहुरुक्तस्तस्मादधोक्षजः ॥ ९८ ॥

इति हरिवंशे श्रीवासुदेवमाहात्म्ये तन्नाम्नः श्रीकृष्णविषयतया प्रसिद्धेः ।
अत एवोत्तरत्रपद्ये साक्षात् कृष्ण इत्येवोक्तम् । श्रीभगवन्नामकौमुदीकाराश्च "कृष्णशब्दस्य तमालश्यामलत्विषि यशोदास्तनन्धये परब्रह्मणि रूढिः" इति प्रयोगप्राचुर्यात् तत्रैव प्रथमत एव प्रतीतेरुदय इति चोक्तवन्तः । सामोपनिषदि च "कृष्णाय देवकीनन्दनाय" इति ।
अत्र ग्रन्थफलत्वं तस्यैव व्यक्तमिति चैकेनैवानेन वचनेन तत्परिपूर्णता सिध्यति ॥ श्रीसूतः ॥

५८ । अथ श्रीनारदस्य (भा० १।५।२६) —

> तत्रान्वहं कृष्णकथाः प्रगायतामनुग्रहेणाश्रृणवं मनोहराः ।
> ताः श्रद्धया मेऽनुपदं विशृण्वतः प्रियश्रवस्यङ्ग ममाभवद् रतिः ॥ ९९ ॥

"येन येनावतारेण" (भा० १०।७।१) इत्येतच्छ्रीपरीक्षिद्वचनपद्यद्वयमप्यत्र श्रीयशोदास्तनन्धयत्वे साधकं श्रुतिसामान्यन्यायेन ॥ श्रीनारदः श्रीवेदव्यासम् ॥

५९ । तच्छब्दस्यैवाभ्यासोऽपि दृश्यते "एवं कृष्णमतेः" (भा० १।६।२८) इत्यादौ । अन्यत्र च (भा० ७।१०।४८–५०) —

> यूयं नृलोके बत भूरिभागा लोकं पुनाना मुनयोऽभियन्ति ।
> येषां गृहानावसतीति साक्षाद् गूढं परं ब्रह्म मनुष्यलिङ्गम् ॥ १०० ॥
> स वा अयं ब्रह्म महद्विमृग्यकैवल्यनिर्वाणसुखानुभूतिः ।
> प्रियः सुहृद् वः खलु मातुलेय आत्मार्हणीयो विधिकृद् गुरुश्च ॥ १०१ ॥
> न यस्य साक्षाद् भवपद्मजादिभी रूपं धिया वस्तुतयोपवर्णितम् ।
> मौनेन भक्त्योपशमेन पूजितः प्रसीदतामेष स सात्वतां पतिः ॥ १०२ ॥

टीका च "अहो प्रह्लादस्य भाग्यं येन देवो दृष्टः । वयं तु मन्दभाग्या इति विषीदन्तं राजानं प्रत्याह — यूयमिति त्रिभिः" इत्येषा ।
मनुष्यस्य दृश्यमानमनुष्यस्येव लिङ्गं करचरणादिसन्निवेशो यस्य तं रूपं श्रीविग्रहः । वस्तुतया नोपवर्णितं तद्रूपस्यैव परब्रह्मत्वेन किमिदं वस्त्विति निर्देष्टुमशक्यत्वात् । यथोक्तं सहस्रनामस्तोत्रे "अनिर्देश्यवपुः" इति ।
एषामेव पद्यानां सप्तमान्तेऽपि परमामोदकत्वात् पुनरावृत्तिर्दृश्यते ॥ स श्रीयुधिष्ठिरम् ॥

६० । अत्र च स्पष्टम् (भा० १।६।३३–३४) —

> देवदत्तामिमां वीणां स्वरब्रह्मविभूषिताम् ।
> मूर्च्छयित्वा हरिकथां गायमानश्चराम्यहम् ॥ १०३ ॥
> प्रगायतः स्ववीर्याणि तीर्थपादः प्रियश्रवाः ।
> आहूत इव मे शीघ्रं दर्शनं याति चेतसि ॥ १०४ ॥

देवः श्रीकृष्ण एव । लिङ्गपुराणे उपरिभागे तेनैव स्वयं तस्य वीणाग्राहणं हि प्रसिद्धम् । अत्र यद्रूपेण वीणा ग्राहिता तद्रूपेणैव चेतसि दर्शनं स्वारस्यलब्धम् । देवदत्तामिति कृतोपकारतायाः स्मर्यमाणत्वेन तमनुसन्धायैव तदुक्तेः ॥ श्रीनारदः श्रीवेदव्यासम् ॥

६१ । अत एतदेवमेव व्याख्येयम् (भा० १।५।२१) —

त्वमात्मनात्मानमवेह्यमोघदृक् परस्य पुंसः परमात्मनः कलाम् ।
अजं प्रजातं जगतः शिवाय तन् महानुभावाभ्युदयोऽधिगण्यताम् ॥ १०५ ॥

हे अमोघदृक् ! त्वमात्मना स्वयमात्मानं स्वं परस्य पुंसः कलामंशभूतमवेहि अनुसन्धेहि । पुनश्च जगतः शिवायाधुनैव श्रीकृष्णरूपेण यश्चाजोऽपि प्रजातस्तमवेहि । तदेतद् द्वयं ज्ञात्वा महानुभावस्य सर्वावतारावतारिवृन्देभ्योऽपि दर्शितप्रभावस्य तस्य श्रीकृष्णस्यैवाभ्युदयो लीला अधि अधिकं गण्यतां निरूप्यताम् । स्वयमीश्वरोऽपि भवान् निजाज्ञानरूपां मायां न प्रकटयत्विति भावः ॥ स तम् ॥

६२ । अत एव पुराणप्रादुर्भावाय श्रीव्यासं श्रीनारदेन चतुर्व्यूहात्मकश्रीकृष्णमन्त्र एवोपदिष्टस्तदुपासकस्य सर्वोत्तमत्वं च । यथा (भा० १।५।३७-३८) —

ओं नमो भगवते तुभ्यं वासुदेवाय धीमहि ।
प्रद्युम्नायानिरुद्धाय नमः सङ्कर्षणाय च ॥ १०६ ॥
इति मूर्त्यभिधानेन मन्त्रमूर्तिममूर्तिकम् ।
यजते यज्ञपुरुषं स सम्यग्दर्शनः पुमान् ॥ १०७ ॥ इति ।

स्पष्टम् ॥ स तम् ॥

६३ । अथ श्रीब्रह्मणः (भा० २।७।२६) —

भूमेः सुरेतरवरूथविमर्दितायाः क्लेशव्ययाय कलया सितकृष्णकेशः ।
जातः करिष्यति जनानुपलक्ष्यमार्गः कर्माणि चात्ममहिमोपनिबन्धनानि ॥
१०८ ॥ इति ।

असुरसेनानिपीडिताया भुवः क्लेशमपहर्तुं परमात्मनोऽपि परत्वाज् जनैरस्माभिरनुपलक्ष्यमार्गोऽपि प्रादुर्भूतः सन् कर्माणि च करिष्यति । कोऽसौ ? कलया अंशेन सितकृष्णकेशो यः ।
यत्र सितकृष्णकेशौ देवैर्दृष्टाविति शास्त्रान्तरप्रसिद्धिः । सोऽपि यस्यांशेन स एव भगवान् स्वयमित्यर्थः । तदविनाभावाच्छ्रीबलदेवस्यापि ग्रहणं द्योतितम् ।
ननु पुरुषादपि परोऽसौ भगवान् कथं भूभारावतारणमात्रार्थं स्वयमवतरिष्यति ?

इत्याशङ्क्याह — आत्मनो महिमानः परममाधुरीसम्पद उपनिबध्यन्ते निजभक्तैरधिकं वर्ण्यन्ते येषु तानि कर्माणि च करिष्यति । यद्यपि निजांशेनैव वा निजेच्छाभासेनैव वा भूभारहरणमीषत्करं तथापि निजचरणारविन्दजीवातुवृन्दमानन्दयन्नेव लीलाकादम्बि- नीर्निजमाधुरीवर्षणाय वितरिष्यमाणोऽवतरिष्यतीत्यर्थः । एतदेव व्यक्तीकृतम् "तोकेन जीवहरणम्" (भा० २।७।२७) इत्यादौ ।

इतरथा स्वयं स्वमाधुरीसम्पत्प्रकाशनेच्छामन्तरेण मधुरतरं तोकादिभावं दधता तेन पूतनादीनां जीवहरणादिकं कर्म न भाव्यं न सम्भावनीयम् । तदंशतदिच्छाभासादिमा- त्रेणैव तत्सिद्धेरिति वाक्यार्थः ।

तथा च "तथायं चावतारस्ते" (भा० १।७।२५) इत्यादौ तैरेव व्याख्यातम् "किं भूभारहरणं मदिच्छामात्रेण न भवति ? तत्राह — स्वानामिति" इति ।

"जयति जननिवासः" (भा० १०।९०।४८) इत्यत्र चेच्छामात्रेण निरसनसमर्थोऽपि क्रीडार्थं दोर्भिरधर्ममस्यन्निति ।

तदेवमादिभिः श्रीकृष्णस्यैव सर्वाद्भुततावर्णनाभिनिवेशप्रपञ्चो ब्रह्मणि स्पष्ट एव । अस्तु तावत् "तद् भूरि भाग्यमिह जन्म किमप्यटव्याम्" (भा० १०।१४।३४) इत्यादि ॥ श्रीब्रह्मा श्रीनारदम् ॥

६४ । एवं चतुःश्लोकीवक्तुः श्रीभगवतोऽपि श्रीकृष्णत्वमेव । तथा हि तत्पूर्वस्थं वाक्यम् (भा० २।९।१४) —

> ददर्श तत्राखिलसात्वतां पतिं श्रियः पतिं यज्ञपतिं जगत्पतिम् ।
> सुनन्दनन्दप्रबलार्हणादिभिः स्वपार्षदाग्रैः परिसेवितं विभुम् ॥ १०९ ॥ इति ।

व्याख्या च — अखिलसात्वतां सर्वेषां सात्वतानां यादववीराणां पतिम् । भा० २।४।२० —

> श्रियः पतिर्यज्ञपतिः प्रजापतिर्धियां पतिर्लोकपतिर्धरापतिः ।
> पतिर्गतिश्चान्धकवृष्णिसात्वतां प्रसीदतां मे भगवान् सतां पतिः ॥ ११० ॥

इत्येतद्वाक्यसंवादितत्त्वात् ।
भा० ३।४।१३ —

> पुरा मया प्रोक्तमजाय नाभ्ये पद्मे निषण्णाय ममादिसर्गे ।
> ज्ञानं परं मन्महिमावभासं यत् सूरयो भागवतं वदन्ति ॥ १११ ॥

इति तृतीये उद्धवं प्रति श्रीकृष्णवाक्यानुसारेण च ।
गो० ता० १।२४ —

यो ब्रह्माणं विदधाति पूर्वं यो विद्यास्तस्मै गापायति स्म कृष्णः ।
तं हि देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणममुं व्रजेत ॥ ११२ ॥

इति श्रीगोपालतापन्यनुसारेण च तस्यैवोपदेष्टृत्वश्रुतेः ।
“तदु होवाच ब्राह्मणोऽसावनवरतं मे ध्यातः स्तुतः परार्धान्ते सोऽबुध्यत गोपवेशो मे पुरुषः पुरस्तादाविर्बभूव” (गो० ता० १।२७) इति श्रीगोपालतापन्यनुसारेणैव क्वचित् कल्पे श्रीगोपालरूपेण सृष्ट्यादावित्थमेव ब्रह्मणे दर्शितनिजरूपत्वात् तद्धाम्नो महावैकुण्ठत्वेन साधयिष्यमाणत्वाच्च ।
तथा च ब्रह्मसंहितायाम् (ब्र० सं० ५।२२-२६) —

तत्र ब्रह्माभवद् भूयश्चतुर्वेदी चतुर्मुखः ॥ ११३ ॥
सञ्जातो भगवच्छक्त्या तत् कालं किल चोदितः ।
सिसृक्षायां मतिं चक्रे पूर्वसंस्कारसंस्कृतः ।
ददर्श केवलं ध्वान्तं नान्यत् किमपि सर्वतः ॥ ११४ ॥
उवाच पुरतस्तस्मै तस्य दिव्या सरस्वती ।
काम-कृष्णाय गोविन्द हे गोपीजन इत्यपि ।
वल्लभाय प्रिया वह्वेर्मन्त्रम् ते दास्यति प्रियम् ॥ ११५ ॥
तपस्त्वं तप एतेन तव सिद्धिर्भविष्यति ॥ ११६ ॥
अथ तेपे स सुचिरं प्रीणन् गोविन्दमव्ययम् । इत्यादि ।

“सुनन्दनन्दप्रबलार्हणादिभिः” (भा० २।९।१४) इत्यत्र तु द्वारकायां प्राकट्यावसरे श्रुतसुनन्दनन्दादिसाहचर्येण प्रबलादयोऽपि ज्ञेयाः । यथोक्तं प्रथमे “सुनन्दनन्दशीर्षण्या ये चान्ये सात्वतर्षभाः” (भा० १।१४।३२) इति ।
किं बहुना नानावतारावतारिष्वपि सत्सु महापुराणप्रारम्भ एव श्रीशौनकादीनां तदेकतात्पर्यमिदम् । अत्र पूर्वे सामान्यतोऽस्माभिरेकान्तश्रेयस्त्वेन सर्वशास्त्रसारत्वेनात्मसु प्रसादहेतुत्वेन च यत् पृष्टं तदेतदेवास्माकं भाति । यत् श्रीकृष्णस्य लीलावर्णनमित्यभिप्रेत्याहुः । भा० १।१।१२ —

सूत जानासि भद्रं ते भगवान् सात्वतां पतिः ।
देवक्यां वसुदेवस्य जातो यस्य चिकीर्षया ॥ ११७ ॥

“भद्रं ते” इति श्रीकृष्णलीलाप्रश्नसहोदरौत्सुक्येनाशीर्वादः । भगवान् स्वयमेवावतारी सम्पूर्णैश्वर्यादियुक्तः । सात्वतां सात्वतानां पतिः । नुडभाव आर्षः । यादवानामित्यर्थः । जातो जगद्दृश्यो बभूव ॥

६५ । भा० १।१।१३ —

तन् नः शुश्रूषमाणानामर्हस्यङ्गानुवर्णितुम् ।
यस्यावतारो भूतानां क्षेमाय च भवाय च ॥ ११८ ॥

टीका च “अङ्ग हे सूत ! तन् नो अनुवर्णयितुमर्हसि । सामान्यतस्तावद् यस्यावतारमात्रं क्षेमाय पालनाय भवाय समृद्धये च” इति ॥

६६ । तत्प्रभावमनुवर्णयन्तस्तद्यशःश्रवणौत्सुक्यमाविष्कुर्वन्ति । भा० १।१।१४ —

आपन्नः संसृतिं घोरां यन्नाम विवशो गृणन् ।
ततः सद्यो विमुच्येत यद् बिभेति स्वयं भयम् ॥ ११९ ॥

विवशोऽपि विशेषेण पराधीनः सन्नपि यस्य श्रीकृष्णस्य नाम तस्य सर्वावतारित्वादवतारनाम्नामपि तत्रैव पर्यवसानात् । अत एव साक्षात् श्रीकृष्णादपि तत्तन्नामप्रवृत्तिप्रकारान्तरेण श्रूयते श्रीविष्णुपुराणे “तत्र त्वखिलानामेव भगवन्नाम्नां कारणान्यभवन्” (वि० पु० ४।१५।११) इति हि तदीयं गद्यम् । तदिदं च वासुदेवदामोदरगोविन्दकेशवादिनामवज् ज्ञेयम् ।
ततः संसृतेः । तत्र हेतुः — यद् यतो नाम्नः । भयमपि स्वयं बिभेति ॥

६७ । किं च (भा० १।१।१५) —

यत्पादसंश्रयाः सूत मुनयः प्रशमायनाः ।
सद्यः पुनन्त्युपस्पृष्टाः स्वर्धुन्यापोऽनुसेवया ॥ १२० ॥

यस्य श्रीकृष्णस्य पादौ संश्रयौ येषाम् । अत एव प्रशमायनाः शमो भगवन्निष्ठबुद्धिता “शमो मन्निष्ठता बुद्धेः” (भा० ११।१९।३६) इति स्वयं श्रीभगवद्वाक्यात् । स एव प्रकृष्टः शमः प्रशमः साक्षात्पूर्णभगवत्श्रीकृष्णसम्बन्धित्वात् । प्रशम एवायनं वर्त्म आश्रयो वा येषां ते श्रीकृष्णलीलारसाकृष्टचित्ता मुनयः श्रीशुकदेवादयः ।
उपस्पृष्टाः सन्निधिमात्रेण सेविताः सद्यः पुनन्ति सवासनपापेभ्यः शोधयन्ति । स्वर्धुनी गङ्गा तस्या आपस्तु —

योऽसौ निरञ्जनो देवश्चित्स्वरूपो जनार्दनः ।
स एव द्रवरूपेण गङ्गाम्भो नात्र संशयः ॥ १२१ ॥ इति ।

स्वयं तथाविधरूपापि साक्षाच्छ्रीवामनदेवचरणान् निःसृता अपि । अनुसेवया साक्षात् सेवाभ्यासेनैव तथा शोधयन्ति न सन्निधिमात्रेण सेवया । साक्षात् सेवयापि न सद्य इति तस्या अपि श्रीकृष्णाश्रितानामुत्कर्षात् तस्योत्कर्षः । एवमेव ततस्तद्यशसोऽप्याधिक्यं वर्ण्यते “तीर्थं चक्रे नृपोनं यदजनि यदुषु स्वःसरित्पादशौचम्” (भा० १०।९०।४७) इति ।

टीका च “इतः पूर्वं स्वःसरिदेव सर्वतोऽधिकं तीर्थमित्यासीत् । इदानीं तु यदुषु यदजनि जातं तीर्थं श्रीकृष्णकीर्तिरूपं एतत् स्वःसरिद्रूपं पादशौचं तीर्थमूनमल्पं चक्रे” इत्येषा ॥

६८ । एतस्य दशमस्कन्धपद्यस्यैव संवादितां व्यनक्ति । भा० १।१।१६—

को वा भगवतस्तस्य पुण्यश्लोकेड्यकर्मणः ।
शुद्धिकामो न शृणुयाद् यशः कलिमलापहम् ॥ १२२ ॥

शुद्धिकामोऽपि । यतः कलियुगस्यापि मलापहम् ॥

६९ । यस्मादेवं तस्मात् । भा० १।१।१७—

तस्य कर्माण्युदाराणि परिगीतानि सूरिभिः ।
ब्रूहि नः श्रद्दधानानां लीलया दधतः कलाः ॥ १२३ ॥

उदाराणि परमानन्ददातॄणि जन्मादीनि । स्वयं परिपूर्णस्य लीलया अन्या अपि कलाः पुरुषादिलक्षणा दधतः । तत्तदंशानप्यादाय तस्यावतीर्णस्य सत इत्यर्थः ॥

७० । भा० १।१।१८—

अथाख्याहि हरेर्धीमन्नवतारकथाः शुभाः ।
लीला विदधतः स्वैरमीश्वरस्यात्ममायया ॥ १२४ ॥

श्री कृष्णस्य तावन्मुख्यत्वेन कथय । अथ तदनन्तरमानुषङ्गिकतयैवेत्यर्थः । हरेः श्रीकृष्णस्य प्रकरणबलात् । अवताराः—पुरुषावतारा गुणावतारा लीलावताराश्च । तेषां कथाः । लीलाः सृष्ट्यादिकर्मरूपा भूभारहरणादिरूपाश्च ॥

७१ । औत्सुक्येन पुनरपि तच्चरितान्येव श्रोतुमिच्छन्तस्तत्रात्मनस्तृप्त्यभावमावेदयन्ति । भा० १।१।१९—

वयं तु न वितृप्याम उत्तमश्लोकविक्रमे ।
यच्छृण्वतां रसज्ञानां स्वादु स्वादु पदे पदे ॥ १२५ ॥

योगयागादिषु तृप्ताः स्मः । भगवद्विक्रममात्रे तु न तृप्याम एव । तत्रापि “तीर्थं चक्रे नृपोनम्” (भा० १०।९०।४७) इत्याद्युक्तलक्षणस्य सर्वतोऽप्युत्तमश्लोकस्य श्रीकृष्णस्य विक्रमे विशेषेण न तृप्यामः । अलमिति न मन्यामहे । तत्र हेतुः—यद् विक्रमं शृण्वताम् । यद्वा अन्ये तृप्यन्तु नाम वयं तु नेति तुशब्दस्यान्वयः ॥

७२ । भा० १।१।२०—

कृतवान् किल कर्माणि सह रामेण केशवः ।
अतिमर्त्यानि भगवान् गूढः कपटमानुषः ॥ १२६ ॥

टीका च "अतः श्रीकृष्णचरितानि कथयेत्याशयेनाहुः—कृतवानिति । अतिमर्त्यानि मर्त्यानतिक्रान्तानि गोवर्धनोद्धरणादीनि । मनुष्येष्वसम्भावितानीत्यर्थः" इत्येषा ।
ननु कथं मानुषः सन्नतिमर्त्यानि कृतवान् ? तत्राह—कपटमानुषः । पार्थिवदेहविशेष एव मानुषशब्दः प्रतीतिः । तस्मात् कपटेनैवासौ तथा भातीत्यर्थः । वस्तुतस्तु नराकृतेरेव परब्रह्मत्वेनासत्यपि प्रसिद्धमानुषत्वे नराकृतिनरलीलात्वेन लब्धमप्रसिद्धमानुषत्वमस्त्येव । तत् पुनरैश्वर्याव्याघातकत्वान् न प्रत्याख्यायत इति भावः । अत एव स्यमन्तकाहरणे "पुरुषं प्राकृतं मत्वा" (भा० १०।५६।२२) इत्यनेन जाम्बवतोऽन्यथाज्ञानव्यञ्जकेन वाक्येन तस्य प्राकृतत्वं निषिध्य पुरुषत्वं स्थाप्यते ।
एवं "मायामनुष्यस्य वदस्व विद्वन्" (भा० १०।१।७) इत्यादिष्वपि ज्ञेयम् । यस्मात् कपटमानुषस्तस्मादेव गूढः स्वतस्तु तद्रूपतयैव भगवानिति ॥ श्रीशौनकः ॥

७३ । अथ श्रीसूतस्यापि "इति सम्प्रश्नसंहृष्टः" (भा० १।२।१) इत्याद्यनन्तरम् "नारायणं नमस्कृत्य" (भा० १।२।४) इत्याद्यन्ते पुराणमुपक्रम्यैवाह (भा० १।२।५)—

मुनयः साधु पृष्टोऽहं भवद्भिर्लोकमङ्गलम् ।
यत् कृतः कृष्णसम्प्रश्नो येनात्मा सुप्रसीदति ॥ १२७ ॥

टीका च—"'तेषां वचः प्रतिपूज्य' (भा० १।२।१) इति यदुक्तं तत् प्रतिपूजनं करोति—'हे मुनयः !' साधु यथा भवति तथाहं पृष्टः । यतो लोकानां मङ्गलमेतत् । यद्यतः श्रीकृष्णविषयः सम्प्रश्नः कृतः । सर्वशास्त्रार्थसारोद्धारप्रश्नस्यापि कृष्णे पर्यवसानादेवमुक्तम्" इत्येषा ।
अत एवोत्तरेष्वपि पद्येषु अधोक्षजवासुदेवसात्वतां पतिकृष्णशब्दास्तत्प्राधान्यविवक्षयैव पठिताः ।
अत्र श्रेयःप्रश्नस्याप्युत्तरं लोकमङ्गलमित्यनेनैव तावद् दत्तं भवति । तथात्मसुप्रसादहेतोश्च "येनात्मा सुप्रसीदति" इत्यनेन ॥ श्रीसूतः ॥

७४ । तदेवं महाश्रोतृवक्तृणामैकमत्येन च तात्पर्यं सिद्धम् । अथ श्रुतिलिङ्गादिभिः षड्भिरपि प्रमाणैः स एव प्रमीयते ।
तत्र निरपेक्षरवा श्रुतिर्दर्शितैव "कृष्णस्तु भगवान् स्वयम्" (भा० १।३।२८) इत्यत्र ।
अथ श्रुतिसामर्थ्यरूपं लिङ्गं च (भा० १०।१३।४६)—

तावत् सर्वे वत्सपालाः पश्यतोऽजस्य तत्क्षणात् ।
व्यदृश्यन्त घनश्यामाः पीतकौशेयवाससः ॥ १२८ ॥ इत्यादौ ज्ञेयम् ।

किन्त्वन्यत्र "बर्हिर्देवसदनं दामि" इत्यस्य मन्त्ररूपस्य लिङ्गस्य बलात् श्रुतिः कल्प्यते । अत्र तु "कृष्णस्तु भगवान् स्वयम्" इति साक्षादेव तद्रूपोऽस्तीति विशेषोऽप्यस्ति ।

अथाकाङ्क्षायोग्यतासत्तिमदनेकपदविशिष्टैकार्थ्यप्रतिपादकशब्दरूपं वाक्यं च "यस्यां वै श्रूयमाणायाम्" (भा० १।७।७) इत्यादिरूपमेव ।
यथा खलु "इमामगृभ्णन् रशनामृतस्य" इति मन्त्रस्य रशनामात्रादाने विनियोगप्राप्तौ "इमामगृभ्णन् रशनामृतस्य" इति । "अश्वाभिधानीमादत्ते" इति ब्राह्मणवाक्यादश्वरशनादाने विनियोगः प्रतीयते । तथात्रापि "भक्तियोगेन मनसि सम्यक् प्रणिहितेऽमले । अपश्यत् पुरुषं पूर्णम्" (भा० १।७।४) इत्यत्र पूर्णपुरुषत्वेनोक्तस्य कृष्णत्वम् । "यस्यां वै श्रूयमाणायां कृष्णे परमपूरुषे" (भा० १।७।७) इति वाक्याद् व्यज्यते इति ।
तथारभ्याधीतरूपं प्रकरणं चात्र "सूत जानासि भद्रं ते" (भा० १।१।१२) इत्यादिरूपम् ।
यथा "दर्शपौर्णमासाभ्यां यजेत" इत्यत्र तृतीयया श्रुत्या दर्शपौर्णमासयोः प्रकरणत्वेन प्राप्ते करणस्य चेति कर्तव्यताकाङ्क्षायाम् "समिधो यजति" इत्यादिना योजना तथा "दर्शपौर्णमासाभ्याम्" इत्यादेर्वाक्यस्य फलविधुरस्य फलाकाङ्क्षायाम् "अग्निष्टोमेन स्वर्गकामो यजेत" इति तदारभ्य प्रकरणार्थारब्धेन स्वर्गकाम इत्यनेन योजना ।
तथा "सूत जानासि भद्रं ते" इत्यत्र श्रवणारम्भ एव श्रीकृष्णस्यावतारे हेतुं विज्ञातुमिच्छद्भिः शौनकादिभिस्तत्र परमाद्भुततां व्यज्य श्रीकृष्णस्यैव सर्वत्र ज्ञेयत्वेन योजना गम्येति तस्यैव स्वयं भगवत्त्वं व्यक्तम् । तच्च दर्शितं सर्वश्रोतृवक्तृणां तदैकमत्यप्रकरणेनेति ।
अथ क्रमवर्तिनां पदार्थानां क्रमवर्तिभिः पदार्थैर्यथाक्रमसम्बन्धरूपं स्थानं चात्र "सूत जानासि भद्रं ते" इत्यादावेव ज्ञेयम् । यथा दर्शपौर्णमासप्रकरणे कानिचित् कर्माणि उपांशुयागप्रभृतीनि "दब्धिरसि" इत्यादयः केचन मन्त्राश्च समाम्नायन्ते । तत्र यस्य क्रमेण यो मन्त्रः समाम्नातस्तेनैव तस्य च सम्बन्धस्तथा "मुनयः साधु पृष्टोऽहं भवद्भिर्लोकमङ्गलं यत्कृतः कृष्णसम्प्रश्नः" (भा० १।२।५) इत्यत्र कृष्णशब्दस्य प्रथमप्रश्नोत्तरगतत्वेन पठितस्य देवकीजातवाचकत्वमेव लभ्यते ।
अथ नामादिना तुल्यताख्यानरूपा समाख्या च "जगृहे पौरुषं रूपं भगवान्" (भा० १।३।१) इत्यस्य "एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम्" (भा० १।३।२८) इत्यत्र पर्यवसानमित्येवं ज्ञेयम् । यथाध्वरसञ्ज्ञानां मन्त्राणाम् "अग्निर्यज्ञं नयतु प्रजानन्" इत्यादीनां "आध्वर्यसञ्ज्ञके कर्मणि विनियोग" इति ।
किं च एतस्यामष्टादशसाहस्र्यां संहितायां श्रीकृष्णस्यैवाभ्यासबाहुल्यं दृश्यते ।
तत्र प्रथमदशमैकादशेष्वतिविस्तरेणैव ।
द्वितीये श्रीब्रह्मनारदसंवादे ।
तृतीये श्रीविदुरोद्धवसंवादे ।
चतुर्थे "ताविमौ वै भगवतो हरेरंशाविहागतौ" (भा० ४।१।५९) इत्यत्र "यच् चान्यदपि कृष्णस्य" (भा० ४।१७।६) इत्यादौ च ।
पञ्चमे "राजन् पतिर्गुरुरलम्" (भा० ५।६।१८) इत्यादौ ।
षष्ठे "मां केशवो गदया प्रातरव्याद् गोविन्द आसङ्गवमात्तवेणुः" (भा० ६।८।२०) इत्यत्र ।
सप्तमे श्रीनारदयुधिष्ठिरसंवादे ।
अष्टमे तन्महिमविशेषबीजारोपरूपे कालनेमिवधे तादृशश्रीमदजितद्वारापि तस्य मुक्तिर्नाभवत् किन्तु पुनः कंसत्वे तद्द्वारैवेति तन्महिमविशेषकथनप्रथमाङ्गत्वात् ।

नवमे सर्वान्ते ।
श्रीद्वादशे च "श्रीकृष्ण कृष्णसख वृष्ण्यृषभावनिध्रुग्राजन्यवंशदहनानपवर्ग्यवीर्य" (भा० १२।११।२५) इत्यादौ ।
श्रीभागवतानुक्रमणिकायां च उत्तरोत्तरत्र सर्वतोऽपि भूयस्त्वेन गीयते ।
तथा च यस्यैवाभ्यासस्तदेव शास्त्रे प्रधानमिति "आनन्दमयोऽभ्यासात्" (ब्र० सू० १।१।१२) इत्यत्र परैरपि समर्थितत्वादिहापि श्रीकृष्ण एव प्रधानं भवेदिति तस्यैव मूलभगवत्त्वं सिध्यति । यत्प्रतिपादकत्वेनास्य शास्त्रस्य भागवतमित्याख्या ।
अपि च न केवलं बहुत्र सूचनमात्रमत्राभ्यासनमपि त्वर्धादप्यधिको ग्रन्थस्तत्प्रस्तावको दृश्यते तत्रापि सर्वाश्चर्यतया । तस्मात् साधूक्तम् "एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम्" (भा० १।३।२८) इति । तदेवमस्य वचनराजस्य सेनासङ्ग्रहो निरूपितः ।
तस्य प्रतिनिधिरूपाणि वाक्यान्तराण्यपि दृश्यन्ते । यथा "अष्टमस्तु तयोरासीत् स्वयमेव हरिः किल" (भा० ९।२४।५५) इति ।
किलशब्देन कृष्णस्त्विवति प्रसिद्धिः सूच्यते । ततो हरिरत्र भगवानेव । तथोक्तं च "वसुदेवगृहे साक्षाद् भगवान् पुरुषः परः" (भा० १०।१।२३) इति च ॥ श्रीशुकः ॥

७५ । यथा वा "अहो भाग्यमहो भाग्यम्" (भा० १०।१४।३२) इत्यादि । ब्रह्मत्वेनैव बृहत्तमत्वे लब्धेऽपि पूर्णमित्यधिकं विशेषणमत्रोपजीव्यते ॥ ब्रह्मा श्रीभगवन्तम् ॥

७६ । अत एव (भा० ३।२।२१) —

> स्वयं त्वसाम्यातिशयस्त्र्यधीशः स्वाराज्यलक्ष्म्याप्तसमस्तकामः ।
> बलिं हरद्भिश्चिरलोकपालैः किरीटकोटीडितपादपीठः ॥ १२९ ॥

न साम्यातिशयौ यस्य यमपेक्ष्यान्यस्य साम्यमतिशयश्च नास्तीत्यर्थः । तत्र हेतवः— त्र्यधीशस्त्रिषु सङ्कर्षणप्रद्युम्नानिरुद्धेष्वप्यधीशः सर्वांशित्वात् । अत एव स्वाराज्यलक्ष्म्या सर्वाधिकपरमानन्दरूपसम्पत्त्यैव प्राप्तसमस्तभोगः ।
बलिं तदिच्छानुसरणरूपमर्हणं हरद्भिः समर्पयद्भिश्चिरलोकपालैर्भगवद्दृष्ट्यपेक्षया ब्रह्मादयस्तावदचिरलोकपालाः । अनित्यत्वात् । ततश्च चिरकालीनैर्लोकपालैरनन्तब्रह्माण्डान्तर्यामिपुरुषैः किरीटकोटीद्वारा ईडितं स्तुतं पादपीठं यस्य सः ।
अत्यन्ततिरस्कृतवाच्यध्वनिना परमश्रेष्ठ इत्यर्थः । समस्तपादपाठेऽपि स एवार्थः ।
श्रीकृष्ण इति प्रकरणलब्धं विशेष्यपदम् । अत्र स्वयं तु स्वयमेव तथा तथाविध इति "कृष्णस्तु भगवान् स्वयम्" (भा० १।३।२८) इतिवत् स्वयं भगवत्तामेव व्यनक्ति ॥ श्रीमदुद्धवो विदुरम् ॥

७७ । तदेतत् पूर्णत्वं दृष्टान्तद्वारापि दर्शितमस्ति । यथा (भा० १०।३।८) —

> देवक्यां देवरूपिण्यां विष्णुः सर्वगुहाशयः ।
> आविरासीद् यथा प्राच्यां दिशीन्दुरिव पुष्कलः ॥ १३० ॥

यथा यथावत् स्वस्वरूपेणैवेत्यर्थः ॥ श्रीशुकः ॥

७८ । यथा च (भा० १०।२०।४४) —

> अखण्डमण्डलो व्योम्नि रराजोडुगणैः शशी ।
> यथा यदुपतिः कृष्णो वृष्णिचक्रावृतो भुवि ॥ १३१ ॥

स्पष्टम् ॥ श्रीशुकः ॥

७९ । तथा श्रीकृष्णप्रतिनिधिरूपत्वादस्य महापुराणस्य श्रीकृष्ण एव मुख्यं तात्पर्यमित्यप्याह (भा० १।३।४३) —

> कृष्णे स्वधामोपगते धर्मज्ञानादिभिः सह ।
> कलौ नष्टदृशामेष पुराणार्कोऽधुनोदितः ॥ १३२ ॥

स्पष्टम् ॥ श्रीसूतः ॥

८० । तदेवं श्रीकृष्णस्य स्वयं भगवत्त्वं दर्शितम् । तत् तु गतिसामान्येनापि लभ्यते । यथा महाभारते —

> सर्वे वेदाः सर्वविद्याः सशास्त्राः सर्वे यज्ञाः सर्व ईड्यश्च कृष्णः ।
> विदुः कृष्णं ब्राह्मणास्तत्त्वतो ये तेषां राजन् सर्वयज्ञाः समाप्ताः ॥ १३३ ॥ इति ।

अत्र सर्वसमन्वयसिद्धेः पूर्णत्वमेव लभ्यते । एवं श्रीभगवदुपनिषत्सु च "वेदैश्च सर्वैरहमेव वेद्यो वेदान्तकृद् वेदविदेव चाहम्" (गीता १५।१५) इति "ब्रह्मणो हि प्रतिष्ठाहम्" (गीता १४।२७) इत्यादि च ।
ब्रह्मसंहितायाम् "चिन्तामणिप्रकरसद्मसु कल्पवृक्षलक्षावृतेषु सुरभीरभिपालयन्तम्" (ब्र० सं० ५।२९) इत्यादिकमुपक्रम्य (ब्र० सं० ५।४८) —

> यस्यैकनिश्वसितकालमथावलम्ब्य जीवन्ति लोमविलजा जगदण्डनाथाः ।
> विष्णुर्महान् स इह यस्य कलाविशेषो गोविन्दमादिपुरुषं तमहं भजामि ॥ १३४ ॥ इति ।

ननु पाद्मोत्तरखण्डादौ सर्वावतारी परमव्योमाधिपतिर्नारायण एवेति श्रूयते । पञ्चरात्रादौ तु वासुदेवः । न च स स श्रीकृष्ण एवेति वक्तव्यं तत्तत्स्थानपरिकरनामरूपाणां भेदात् । तर्हि कथं श्रीकृष्णस्यैव सर्वावतारित्वं स्वयं भगवत्त्वं वा ?
अत्रोच्यते श्रीभागवतस्य सर्वशास्त्रचक्रवर्तित्वं प्रथमसन्दर्भे प्रघट्टकेनैव दर्शितम् । पूर्णज्ञानप्रादुर्भावानन्तरमेव श्रीवेदव्यासेन तत् प्रकाशितमिति च तत्रैव प्रसिद्धम् । स्फुटमेव दृश्यते चास्मिन्नपरशास्त्रोपमर्दकत्वम् (भा० १०।५७।३१) —

> इत्यङ्गोपदिशन्त्येके विस्मृत्य प्रागुदाहृतम् ।
> मुनिवासनिवासे किं घटेतारिष्टदर्शनम् ॥ १३५ ॥ इत्यादौ ।

“एवं वदन्ति राजर्षे” (भा० १०।७७।३०) इत्यादौ च ।
अत एव नवमेऽप्युक्तम् (भा० ९।२२।२२) —

> हित्वा स्वशिष्यान् पैलादीन् भगवान् बादरायणः ।
> मह्यं पुत्राय शान्ताय परं गुह्यमिदं जगौ ॥ १३६ ॥ इति ।

तदेवं सर्वशास्त्रोपचरितत्वं सिद्धम् । तत्र श्रीकृष्णस्यैव स्वयं भगवत्त्वं निरूपितम् । दृश्यते च प्रशंसितुर्वैशिष्ट्येन प्रशंस्यस्यापि वैशिष्ट्यम् । यथा ग्रामाध्यक्ष्यराजसभयोः सर्वोत्तमत्वेन प्रशस्यमानौ वस्तुविशेषौ तारतम्यमापद्येते । तदेवं सत्स्वप्यन्येषु तेष्वन्यत्र प्रशस्तेषु श्रीभागवतप्रशंस्यमानस्य श्रीकृष्णस्यैव परमाधिक्यं सिध्यति । अत एव “कृष्णस्तु भगवान् स्वयम्” (भा० १।३।२८) इति सावधाराणा श्रुतिरन्यश्रुतिबाधिकेति युक्तमेव व्याख्यातं पूर्वमपि ।
ततश्च ते तु परव्योमाधिपनारायणवासुदेवादयः श्रीकृष्णस्यैव मूर्तिविशेषा भवेयुः । स्वयं श्रीकृष्णस्तु “नारायणस्त्वम्” (भा० १०।१४।१४) इत्याद्युक्तो महानारायणो द्वारकादिप्रसिद्धो महावासुदेवश्च भवेत् ।
अत एव नारायणवासुदेवोपनिषदोः स एव व्यक्तः “ब्रह्मण्यो देवकीपुत्रः” (ना० उ० ४) इति “देवकीनन्दनोऽखिलमानन्दयात्” इति च । तदित्थमेव तं वासुदेवमपि विभूतिनिर्विशेषतया स्वयमेव स्पष्टमाह “वासुदेवो भगवताम्” (भा० ११।१६।२९) इति ।
स्पष्टम् ॥

८१ । तथा “सात्वतां नवमूर्तीनामादिमूर्तिरहं परा” (भा० ११।१९।३२) इति ।
टीका च — सात्वतां भागवतानां नवव्यूहार्चने वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धनारायणहयग्रीववराहनृसिंहब्रह्माण इति या नवमूर्तयस्तासां मध्ये वासुदेवाख्या । इत्येषा ।
अत एव दृश्यते चाद्वैतवादिनामपि सन्न्यासिनां व्यासपूजापद्धतौ श्रीकृष्णस्य मध्यसिंहासनस्थत्वं वासुदेवादीनां व्यासादीनां चावरणदेवतात्वमिति । तथैव क्रमदीपिकायामष्टाक्षरपटले श्रीवासुदेवादयस्तदावरणत्वेन श्रूयन्ते ।
यत् तु “वृष्णीनां वासुदेवोऽस्मि” (गीता १०।३७) इति श्रीभगवदुपनिषदस्तत्र वासुदेवशब्देन वसुदेवापत्यार्थेन श्रीबलदेव एवोच्यते । वक्ता हि तत्र श्रीकृष्ण एव । ततश्च स्वविभूतिं कथयति तस्मिन्नपि विभूतित्वारोपो न युज्यते वक्तुरन्यत्रैव श्रोतृभिस्तत्प्रतीतेः । ततो मुख्यार्थबाधे तथैव व्याख्या समुचिता । तस्मात् साधु व्याख्यातम् “वासुदेवो भगवताम्” (भा० ११।१६।२९) इत्यादि ॥ श्रीभगवान् ॥

८२ । यस्मादेवं सर्वतोऽपि तस्योत्कर्षस्तस्मादेवान्यतस्तदीयनामादीनामपि महिमाधिक्यमिति गतिसामान्यान्तरं च लभ्यते । तत्र नाम्नो यथा ब्रह्माण्डपुराणे श्रीकृष्णाष्टोत्तरशतनामामृतस्तोत्रे —

सहस्रनाम्नां पुण्यानां त्रिरावृत्त्या तु यत् फलम् ।
एकावृत्त्या तु कृष्णस्य नामैकं तत् प्रयच्छति ॥ १३७ ॥ इति ।

व्यक्तीक्रियते चाधिकं फलत्वं कृष्णनाम्नः पाद्मे पातालखण्डे श्रीमथुरामाहात्म्ये श्रीमहादेवस्यैव वाक्ये “तारकाज् जायते मुक्तिः प्रेमभक्तिस्तु पारकात्” इति ।
पूर्वमत्र मोचकत्वप्रेमदत्वाभ्यां तारकपारकसञ्ज्ञे रामकृष्णनाम्नोर्हि विहिते । तत्र च रामनाम्नि मोचकत्वशक्तिरेवाधिका । श्रीकृष्णनाम्नि तु मोक्षसुखतिरस्कारिप्रेमानन्ददातृत्वशक्तिः समधिकेति भावः । इत्थमेवोक्तं विष्णुधर्मोत्तरे —

यच्छक्तिर्नाम यत् तस्य तस्मिन्नेव च वस्तुनि ।
साधकं पुरुषव्याघ्र सौम्यक्रूरेषु वस्तुषु ॥ १३८ ॥ इति ।

किं च श्रीकृष्णनाम्नो मुख्यत्वं निगदेनैव श्रूयते प्रभासपुराणे श्रीनारदकुशध्वजसंवादे श्रीभगवदुक्तौ “नाम्नां मुख्यतमं नाम कृष्णाख्यं मे परन्तप” इति ।
तदेवं गतिसामान्येन नाममहिमद्वारा तन्महिमातिशयः साधितः ।
तथा तदीयगुणरूपलीलामथुरादिस्थानानामपि तत्तच्छास्त्रप्रतिपाद्यमानैः सर्वाधिकमहिमभिरप्यसावनुसन्धेयः । विस्तरभिया तु नोदाह्रियते ।
इत्थमेव श्रीकृष्णस्यैवासमोर्ध्वमहिमत्वात् स्वयमेव तेनापि सकलभक्तवृन्दवन्दितभगवत्प्रणयं श्रीमदर्जुनं प्रति सर्वशास्त्रार्थसारभूतश्रीगीतोपसंहारवाक्ये निजाखिलप्रादुर्भावान्तरभजनमतिक्रम्य स्वभजनमेव सर्वगुह्यतमत्वेनोपदिष्टम् । यथाह “कर्तुं नेच्छसि यन् मोहात् करिष्यस्यवशोऽपि तत्” (गीता १८।६०) इत्यनन्तरम् (गीता १८।६१–६६) —

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ।
भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया ॥ १३९ ॥
तमेव शरणं गच्छ सर्वभावेन भारत ।
तत्प्रसादात् परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम् ॥ १४० ॥
इति ते ज्ञानमाख्यातं गुह्याद् गुह्यतरं मया ।
विमृश्यैतदशेषेण यथेच्छसि तथा कुरु ॥ १४१ ॥
सर्वगुह्यतमं भूयः शृणु मे परमं वचः ।
इष्टोऽसि मे दृढमिति ततो वक्ष्यामि ते हितम् ॥ १४२ ॥
मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।
मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे ॥ १४३ ॥
सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज ।
अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥ १४४ ॥ इति ।

एषामर्थः “अशोच्यानन्वशोचस्त्वम्” (गीता २।११) इत्यादि ग्रन्थो न युद्धाभिधायकः । यतः “कर्तुम्” (गीता १८।६०) इत्यादि ततः परमार्थाभिधायक एवायम् । तत्रापि गुह्यतरम् “सर्वगुह्यतमं च शृणु” (गीता १८।६४) इत्याह — ईश्वर इत्यादि ।

य एकः सर्वान्तर्यामी ईश्वरः स एव सर्वाणि संसारयन्त्रारुढानि भूतानि मायया भ्रामयन् तेषामेव हृद्देशे तिष्ठति सर्वभावेन "पुरुष एवेदं सर्वम्" (श्वे० ३।१५) इति भावनायाः सर्वेन्द्रियप्रेरणतया वा । परां शान्तिं तदीयां परमां भक्तिम् "शमो मन्निष्ठता बुद्धेः" (भा० ११।१९।३६) इत्युक्तेः । स्थानं तदीयं धाम ।
गुह्याद् ब्रह्मज्ञानादपि गुह्यतरं द्वयोः प्रकर्षे तरप् ।
अथेदमपि निजैकान्तभक्तवराय तस्मै न पर्याप्तमित्यवधाय स्वयमेव महाकृपाभरेणोद्घाटितपरमरहस्यः श्रीभगवानन्यामपि प्रद्युम्नसङ्कर्षणवासुदेवपरमव्योमाधिपलक्षणभजनीयतारतम्यगम्यां भजनक्रमभूमिकामतिक्रम्यैव सर्वतोऽप्युपादेयमेव सहसोपदिशति "सर्वगुह्यतमं भूयः" इति ।
यद्यपि गुह्यतमत्वोक्तेरेव गुह्यगुह्यतराभ्यामपि प्रकृष्टमिदमित्यायाति तथापि सर्वशब्दप्रयोगो गुह्यतममपि परमव्योमाधिपादिभजनार्थशास्त्रान्तरवाक्यमत्येति तस्य यावदर्थवृत्तिकत्वात् । बहूनां प्रकर्षे तमप् । अत एव परमम् ।
स्वकृततादृशहितोपदेशश्रवणे हेतुमाह "इष्टोऽसि मे दृढमिति" इति । परमाप्तस्य मम एतादृशं वाक्यं त्वयावश्यं श्रोतव्यमित्यर्थः । स्वस्य च तादृशरहस्यप्रकाशने हेतुमाह — तत इति । ततस्तादृशेष्टत्वादेव हेतोः ।
तदेवमौत्सुक्यमुच्छलय्य किं तदित्यपेक्षायां सप्रणयाश्रुकृताञ्जलिमेतं प्रत्याह "मन्मनाः" इति । मयि त्वन्मित्रतया साक्षादस्मिन् स्थिते श्रीकृष्णे मनो यस्य तथाविधो भव ।
एवं मद्भक्तो मदेकतात्पर्यको भवेत्यादि । सर्वत्र मच्छब्दावृत्त्या मद्भजनस्यैव नानाप्रकारतयावृत्तिः कर्तव्या न त्वीश्वरतत्त्वमात्रभजनस्येति बोध्यते ।
साधनानुरूपमेव फलमाह "मामेवैष्यसि" इति । अनेनैवकारेणाप्यात्मनः सर्वश्रेष्ठत्वं सूचितम् । अन्यस्य का वार्ता ? मामेवेति । एतदेव फलं श्रीपरीक्षिता च व्यक्तीकरिष्यते कलिं प्रति । भा० १।१७।६ —

> यस्त्वं कृष्णे गते दूरं सह गाण्डीवधन्वना ।
> शोच्योऽस्यशोच्यान् रहसि प्रहरन् वधमर्हसि ॥ १४५ ॥ इति ।

सत्यं ते इत्यनेनात्रार्थे तुभ्यमेव शपेऽहमिति प्रणयविशेषो दर्शितः । "सत्यं शपथतथ्ययोः" इत्यमरः । पुनरप्यतिकृपया "सर्वगुह्यतमम्" (गीता १८।६४) इत्यादि वाक्यार्थानां पुष्ट्यर्थमाह "प्रतिजाने" इति ।
ननु नानाप्रतिबन्धविक्षिप्तस्य मम कथं त्वन्मनस्त्वादिकमेव सिध्येत् ? तत्राह — सर्वेति । सर्वशब्देन नित्यपर्यन्ता धर्माः विवक्षिताः । परिशब्देन तेषां स्वरूपतोऽपि त्यागः समर्थितः । पापानि प्रतिबन्धास्तदाज्ञया परित्यागे पापानुत्पत्तेः । तदेव व्यतिरेकेन द्रढयति "मा शुचः" इति ।
अत्र (गीता २।११) —

> अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे ।
> गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः ॥ १४६ ॥

इत्युपक्रमवाक्ये तस्यापण्डितत्वं स्वस्य च पण्डितत्वं व्यज्य शोकपरित्यागेन मत्कृतोपदेशमेव गृहाणेति विवक्षितम् । ततश्च तारतम्यज्ञानार्थमेव बहुधोपदिश्यापि महोपसंहारवाक्यस्थस्य तस्योपदेशस्य परमत्वं निर्दिश्य शोकपरित्यागेन तमेव तमेतमेवोपदेशं त्वं गृहाणेति द्वयोर्वाक्ययोरेकार्थप्रवृत्तत्वमपि स्पष्टम् । ततः श्रीकृष्णस्यैवाधिक्यं सिद्धम् । अत एव "असद्व्यपदेशान् नेति चेन् न धर्मान्तरेण वाक्यशेषाद्" (ब्र० सू० २।१।१७) इति न्यायादुपसंहारस्यैवोपक्रमार्थनिर्णायकत्वादुपक्रमोपसंहारार्थस्य च सर्वशास्त्रार्थत्वात्, तत्रोक्तं विश्वरूपमभि तदधीनमेव । तच्च युक्तं तेनैव दर्शितत्वात् ।

तत्र च "इत्यर्जुनं वासुदेवस्तथोक्त्वा स्वकं रूपं दर्शयामास भूयः" (गीता ११।५०) इति नराकारचतुर्भुजरूपस्यैव स्वकत्वनिर्देशात् । तद् विश्वरूपं न तस्य साक्षात् स्वरूपमिति स्पष्टम् । अत एव परमभक्तस्यार्जुनस्यापि न तदभीष्टं किन्तु तदीयं स्वकं रूपमेवाभीष्टम् "अदृष्टपूर्वं हृषितोऽस्मि दृष्ट्वा भयेन च प्रव्यथितं मनः" (गीता ११।४५) इत्याद्युक्तेः ।
तद्दर्शनार्थमर्जुनं प्रति दिव्यदृष्टिदानलिङ्गेन तस्यैव माहात्म्यमिति तु बालकोलाहलः
"नराकृति परं ब्रह्म" इति ।
"तदमितं ब्रह्माद्वयं शिष्यते" (भा० १०।१४।१८) इति ।
"यन्मित्रं परमानन्दम्" (भा० १०।१४।३२) इति ।
"स एव नित्यात्मसुखानुभूत्यभिव्युदस्तमायः" (भा० १०।१२।३९) इति ।
"स त्वं कथं मम विभोऽक्षिपथः परात्मा" (भा० १०।६४।२६) इति च ।
तथा "ब्रह्मणो हि प्रतिष्ठाहम्" (गीता १४।२७) इति ।
"नाहं प्रकाशः सर्वस्य" (गीता ७।२५)
इति च श्रवणेन प्राकृतदृष्टेस्तत्राप्यकरणत्वाद् भगवच्छक्तिविशेषसम्वलितदृष्टेरेव तत्र करणत्वात् । ततस्तस्या दृष्टेर्दिव्यत्वं दानं च नराकारपरब्रह्मदर्शनहेतुलक्षणायास्तत्स्वाभाविकदृष्टेरन्यासौ देववपुर्दर्शनहेतुरित्यपेक्षयैव । तच्च नराकृतिपरब्रह्म दिव्यदृष्टिभिरपि दुर्दर्शमित्युक्तम् । गीता ११।५२ —

> सुदुर्दर्शमिदं रूपं दृष्टवानसि यन् मम ।
> देवा अप्यस्य रूपस्य नित्यं दर्शनकाङ्क्षिणः ॥ १४७ ॥ इत्यादिना ।

किन्तु भक्तैकसुदर्शत्वमित्यप्युक्तम् (गीता ११।५४) —

> भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन ।
> ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तप ॥ १४८ ॥ इत्यादिना ।

न च "सुदुर्दर्शमिदम्" (गीता ११।५२) इत्यादिकं विश्वरूपपरम् "दृष्ट्वेदं मानुषं रूपम्" (गीता ११।५१) इत्यादेरेवाव्यवहितपूर्वोक्तत्वात् विश्वरूपप्रकरणस्य तद्व्यवधानाच्च ।
तथा चैकादशे सर्वेषां देवादीनामागमने "व्यचक्षतावितृप्ताक्षाः कृष्णमद्भुतदर्शनम्" (भा० ११।६।५) इति । तत्रैवान्यत्र "गोविन्दभुजगुप्तायाम्" (भा० ११।२।१) इत्यादि ।

सप्तमे "यूयं नृलोके" (भा० ७।१०।४८) इत्यादि च ।
तृतीये च "विस्मापनं स्वस्य च" (भा० ३।२।१२) ।
अत उपसंहारानुरोधेन स्ववाक्यतात्पर्येण चास्यापि प्रकरणस्य श्रीकृष्णपरमत्वमेव । तस्मात् श्रीकृष्णगीतासु च श्रीकृष्णस्यैव स्वयं भगवत्त्वं सिध्येत । अत एवोक्तम् (श्रीगीतामाहात्म्ये) —

एकं शास्त्रं देवकीपुत्रगीतमेको देवो देवकीपुत्र एव ।
कर्माप्येकं देवकीपुत्रसेवा मन्त्रोऽप्येको देवकीपुत्रनाम ॥ १४९ ॥ इति ।

तथा श्रीगोपालपूर्वतापनीश्रुतावपि "मुनयो ह वै ब्रह्माणमूचुः — कः परमो देवः" (गो० ता० पू० १।२) इत्याद्यनन्तरम् "तदु होवाच ब्राह्मणः — कृष्णो वै परमं दैवतम्" (गो० ता० पू० १।३) इत्यादि । उपसंहारे च "तस्मात् कृष्ण एव परो देवस्तं ध्यायेत् तं रसेत् तं यजेदित्यों तत् सत्" (गो० ता० पू० १।५०) इति ।
किं बहुना सर्वावतारावतारिविलक्षणा महाभगवत्तामुद्राः साक्षादेव तत्र वर्तन्त इति श्रूयते पाद्माध्यायत्रयेण । यथा तदीयाः कियन्तः श्लोकाः —

ब्रह्मोवाच —
शृणु नारद वक्ष्यामि पादयोश्चिह्नलक्षणम् ।
भगवत्कृष्णरूपस्य ह्यानन्दैकघनस्य च ॥ १५० ॥
अवतारा ह्यसङ्ख्याताः कथिता मे तवाग्रतः ।
परं सम्यक् प्रवक्ष्यामि कृष्णस्तु भगवान् स्वयम् ॥ १५१ ॥
देवानां कार्यसिद्ध्यर्थमृषीणां च तथैव च ।
आविर्भूतस्तु भगवान् स्वानां प्रियचिकीर्षया ॥ १५२ ॥
यैरेव ज्ञायते देवो भगवान् भक्तवत्सलः ।
तान्यहं वेद नान्योऽस्ति सत्यमेतन् मयोदितम् ॥ १५३ ॥
षोडशैव तु चिह्नानि मया दृष्टानि तत्पदे ।
दक्षिणे चाष्टचिह्नानि इतरे सप्त एव च ॥ १५४ ॥
ध्वजा पद्मं तथा वज्रमङ्कुशो यव एव च ।
स्वस्तिकं चोर्ध्वरेखा च अष्टकोणस्तथैव च ॥ १५५ ॥
सप्तान्यानि प्रवक्ष्यामि साम्प्रतं वैष्णवोत्तम ।
इन्द्रचापं त्रिकोणं च कलसं चार्धचन्द्रकम् ॥ १५६ ॥
अम्बरं मत्स्यचिह्नं च गोष्पदं सप्तमं स्मृतम् ।
अङ्कान्येतानि भो विद्वन् दृश्यन्ते तु यदा कदा ॥ १५७ ॥
कृष्णाख्यं तु परं ब्रह्म भुवि जातं न संशयः ।
द्वयं वाथ त्रयं वाथ चत्वारः पञ्च चैव चा ।
दृश्यन्ते वैष्णवश्रेष्ठ अवतारे कथञ्चन ॥ १५८ ॥ इत्यादि ।

षोडशं तु तथा चिह्नं शृणु देवर्षिसत्तम ।
जम्बूफलसमाकारं दृश्यते यत्र कुत्रचित् ॥ १५९ ॥ इत्यन्तम् ।

तस्मादस्त्येव स्वयं भगवत्त्वं श्रीकृष्णस्यैव । तथा च ब्रह्मवैवर्ते भगवदवतारप्रसङ्गे सूतवाक्यम् —

अवतारा ह्यसङ्ख्येया आसन् सत्त्वस्वभाविनः ।
विंशतिस्तेषु मुख्यान् यान् श्रुत्वा मुच्येन् महांहसः ॥ १६० ॥

इत्यादिना प्रायशः श्रीभागवतवत् श्रीकृष्णसंहितांस्तान् गणयित्वा पुनराह —

नरसिंहादयोऽन्येऽपि सर्वपापविनाशनाः ।
यद्विभूतिविशेषेणालङ्कृतं भुवि जायते ।
तत् सर्वमवगन्तव्यं कृष्णांशांशसमुद्भवम् ॥ १६१ ॥ इति ।

तदित्थं सर्वमभिप्रेत्य महोपक्रमश्लोकमेव श्रीविष्णुपुराणीयभगवच्छब्दनिरुक्तिवत् साक्षात् श्रीकृष्णाभिधेयत्वेनापि योजयति “जन्माद्यस्य” (भा० १।१।१) इति ।
“नराकृति परं ब्रह्म” इति पुराणवर्गात् । “तस्मात् कृष्ण एव परो देवः” (गो० ता० पू० १।५०) इति गोपालतापनीश्रुतेश्च । परं श्रीकृष्णं धीमहि ।
अस्य स्वरूपलक्षणमाह “सत्यम्” इति । “सत्यव्रतं सत्यपरं त्रिसत्यम्” (भा० १०।२।२६) इत्यादौ ।
म० भा० ५।७०।१२–१३ —

सत्ये प्रतिष्ठितः कृष्णः सत्यमत्र प्रतिष्ठितम् ।
सत्यात् सत्यं च गोविन्दस्तस्मात् सत्यो हि नामतः ॥ १६२ ॥

इत्युद्यमपर्वणि सञ्जयकृतश्रीकृष्णनामनिरुक्तौ च तथा श्रुतत्वात् ।
एतेन तदाकारस्याव्यभिचारित्वं दर्शितम् । तटस्थलक्षणमाह “धाम्ना स्वेन” (भा० १।१।१) इत्यादि । स्वेन स्वस्वरूपेण धाम्ना श्रीमथुराख्येन सदा निरस्तं कुहकं मायाकार्यलक्षणं येन तम् ।
गो० ता० उ० २।६४ —

मथ्यते तु जगत् सर्वं ब्रह्मज्ञानेन येन वा ।
तत्सारभूतं यद् यस्यां मथुरा सा निगद्यते ॥ १६३ ॥

इति गोपालोत्तरतापनीप्रसिद्धेः ।

लीलामाह — आद्यस्य नित्यमेव श्रीमदानकदुन्दुभिव्रजेश्वरनन्दनतया श्रीमथुराद्वारकागोकुलेषु विराजमानस्यैव स्वस्य कस्मैचिदर्थाय लोके प्रादुर्भावापेक्षया । यतः श्रीमदानकदुन्दुभिगृहाज् जन्म तस्माद् य इतरतश्च इतरत्र श्रीव्रजेश्वरगृहेऽपि अन्वयात् पुत्रभावतस्तदनुगतत्वेनागच्छत् । उत्तरेणैव य इति पदेनान्वयः । यत इत्यनेन तस्मादिति स्वयमेव लभ्यते ।

कस्मादन्वयात् ? तत्राह — अर्थेषु कंसवञ्चनादिषु तादृशभाववद्भिः श्रीगोकुलवासिभिरेव सर्वानन्दकदम्बकादम्बिनीरूपा सा सा कापि लीला सिध्यतीति तल्लक्षणेषु वा अर्थेषु अभिज्ञः । ततश्च स्वराट् स्वैर्गोकुलवासिभिरेव राजत इति ।

तत्र तेषां प्रेमवशतामापन्नस्याप्यव्याहतैश्वर्यमाह "तेने" इति । य आदिकवये ब्रह्मणे ब्रह्माणं विस्मापयितुं हृदा सङ्कल्पमात्रेणैव ब्रह्मसत्यज्ञानानन्तानन्दमात्रैकरसमूर्तिमयं वैभवं तेने विस्तारितवान् । यद् यतस्तथाविधलौकिकालौकिकतासमुचितलीलाहेतोः सूरयस्तत्तद्भक्ता मुह्यन्ति प्रेमातिशयोदयेन वैवश्यमाप्नुवन्ति ।

यदित्युत्तरेणाप्यन्वयात् । यद् यत एव तादृशलीलातस्तेजोवारिमृदामपि यथा यथावद् विनिमयो भवति । तत्र तेजसश्चान्द्रादेर्विनिमयो निस्तेजोवस्तुभिः सह धर्मपरिवर्तः । तच्छ्रीमुखादिरुचा चन्द्रादेर्निस्तेजस्त्वाभिधानात् निकटस्थनिस्तेजोवस्तुनः स्वभासा तेजस्वितापादनाच्च । तथा वारि द्रवश्च कठिनं भवति, वेणुवाद्येन मृत्पाषाणादिश्च द्रवतीति । यत्र श्रीकृष्णे त्रिसर्गः श्रीगोकुलमथुराद्वारकावैभवप्रकाशोऽमृषा सत्य एवेति ॥ श्रीवेदव्यासः ॥

८३ । एवं सर्वोपसंहारवाक्यमपि तत्रैव सङ्गच्छते "कस्मै येन विभासितोऽयम्" (भा० १२।१३।१९) इत्यादि ।
गो० ता० उ० १।२४ —

> यो ब्रह्माणं विदधाति पूर्वं यो विद्यास्तस्मै गापयति स्म कृष्णः ।
> तं हि देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणममुं व्रजेत् ॥ १६४ ॥

इति गोपालपूर्वतापनीश्रुतेः ।
व्याकृतं च द्वितीयसन्दर्भे (अनु० ९७) तस्यैव चतुःश्लोकीवक्तृत्वमपि ॥ श्रीसूतः ॥

८४ । तदेवमभ्यासादीन्यपि तस्मिन् विस्पष्टान्येव पूर्वोदाहृतवाक्येषु । तदेतच्छ्रीमद्गीतागोपालतापन्यादिशास्त्रगणसहायस्य निखिलेतरशास्त्रशतप्रणतचरणस्य श्रीभागवतस्याभिप्रायेण श्रीकृष्णस्य स्वयं भगवत्त्वं करतल इव दर्शितम् । श्रीभागवतस्य स एव परमप्रतिपाद्य इति पुराणान्तरेणैव स्वयं व्याख्यातम् । यथा ब्रह्माण्डपुराणे श्रीकृष्णाष्टोत्तरशतनामामृतस्तोत्रे श्रीकृष्णस्य नामविशेष एव "शुकवागमृताब्धीन्दुः" इति ।

अथ तस्य महावासुदेवत्वे सिद्धे श्रीबलदेवादीनामपि महासङ्कर्षणादित्वं स्वत एव सिद्धम् । यद्रूपः स्वयं भगवान् तद्रूपा एव ते भवितुमर्हन्तीति । अतः श्रीबलदेवस्य यत् कश्चिदावेशावतारत्वं मन्यते तदसत् । दृश्यते च श्रीकृष्णरामयोर्युगलतया वर्णनेन

समप्रकाशत्वम् "तावङ्घ्रियुग्ममनुकृष्य सरीसृपन्तौ" (भा० १०।८।२२) "यद् विश्वेश्वरयोर्याच्ञाम्" (भा० १०।२३।३७) "ददर्श कृष्णं रामं च" (भा० १०।३८।२८) "तौ रेजतू रङ्गगतौ महाभुजौ" (भा० १०।४३।१९) इत्यादौ ।
लोकेऽपि हि सूर्याचन्द्रमसावेव युगलतया वर्ण्येते न तु सूर्यशुक्रौ । अत एव हरिवंशेऽपि वासुदेवमाहात्म्ये रामकृष्णयोर्दृष्टान्तः "सूर्याचन्द्रमसाविव" इति । तथा "ध्वजवज्राङ्कुशाम्भोजैश्चिह्नितैरङ्घ्रिभिर्व्रजं शोभयन्तौ महात्मानौ" (भा० १०।३८।३०) इत्येवं भगवल्लक्षणान्यपि तत्र श्रूयन्ते, न त्वेवं पृथ्वादिषु । तस्मादेष तन्महिमापि वर्ण्यते (भा० १०।१५।३५) —

नैतच् चित्रं भगवति ह्यनन्ते जगदीश्वरे ।
ओतं प्रोतमिदं यस्मिंस्तन्तुष्वङ्ग यथा पटः ॥ १६५ ॥

एतद् धेनुकवधात्मकं कर्म ॥ श्रीशुकः ॥

८५ । किं च (भा० १०।२।५) —

सप्तमो वैष्णवं धाम यमनन्तं प्रचक्षते ।
गर्भो बभूव देवक्यां हर्षशोकविवर्धनः ॥ १६६ ॥

गर्भो बभूव न तु गर्भे बभूवेति सप्तम्यन्तानुक्त्या साक्षादेवावतारत्वं सूचितम् ॥ स एव ॥

८६ । अथेदमप्येवमेव व्याख्येयम् (भा० १०।१।२४) —

वासुदेवकलानन्तः सहस्रवदनः स्वराट् ।
अग्रतो भविता देवो हरेः प्रियचिकीर्षया ॥ १६७ ॥

श्रीवसुदेवनन्दनस्य वासुदेवस्य कला प्रथमोऽंशः श्रीसङ्कर्षणः । तस्य श्रीसङ्कर्षणत्वं स्वयमेव न तु सङ्कर्षणावतारत्वेनेत्याह "स्वराट् स्वेनैव राजते" इति । अत एवानन्तः कालदेशपरिच्छेदरहितः ।
अत एव मायया तस्य गर्भसमय आकर्षणं च युक्तं पूर्णस्य वास्तवाकर्षणासम्भवादिति केचित् । एतद्विधकार्ये च तदकुण्ठेच्छात्मकचिच्छक्त्याविष्टैव सा माया प्रभवेत् । उक्तं च तदानीं तदाविष्टत्वं तस्याः "आदिष्टा प्रभुणांशेन कार्यार्थे सम्भविष्यति" (भा० १०।१।२५) इति ।
अंशेन चिच्छक्त्या सम्भविष्यति मिलिष्यतीति तत्र ह्यर्थः । अत एव एकानंशेति तस्या नाम । एकोऽनंशो यत्रेति निरुक्तिरिति केचित् । य एव शेषाख्यः सहस्रवदनोऽपि भवति । यतो देवः, नानाकारतया दीव्यतीति ।
तदुक्तं श्रीयमुनादेव्या (भा० १०।६५।२६) —

राम राम महाबाहो न जाने तव विक्रमम् ।
यस्यैकांशेन विधृता जगती जगतः पते ॥ १६८ ॥ इति ।

"एकांशेन शेषाख्येन" इति टीका च ।
अन्यथा तदेकावयवैकदेशरूपार्थत्वेनैकांशेनेति यच्छब्दस्य कर्तृत्वनिर्देश एव युक्तः स्यात् । तदंशावतारलक्षणार्थान्तरप्रतीतिनिरसनाय महाविद्वद्वाक्यत्वात् । सम्बन्धि-निर्देशेन तु टीकाव्याख्यैव स्फुटतरा । एकांशे मुख्यस्यैव कर्तृत्वस्य निर्व्याजप्रतीति-र्न त्वौपचारिकस्येति । एवं श्रीलक्ष्मणस्याप्यन्तिमदशानुकरणलीलायां श्रूयते स्कान्दे अयोध्यामाहात्म्ये—

ततः शेषात्मतां यातं लक्ष्मणं सत्यसङ्गरम् ।
उवाच मधुरं शक्रः सर्वस्य च स पश्यतः ॥ १६९ ॥
इन्द्र उवाच—
लक्ष्मणोत्तिष्ठ शीघ्रं त्वमारोहस्व पदं स्वकम् ।
देवकार्यं कृतं वीर त्वया रिपुनिसूदन ॥ १७० ॥
वैष्णवं परमं स्थानं प्राप्नुहि स्वं सनातनम् ।
भवन्मूर्तिः समायाता शेषोऽपि विलसत्फणः ॥ १७१ ॥ इत्यादि ।

ततश्च—

इत्युक्त्वा सुरराजेन्द्रो लक्ष्मणं सुरसङ्गतः ।
शेषं प्रस्थाप्य पाताले भूभारधरणक्षमम् ॥
लक्ष्मणं यानमारोप्य प्रतस्थे दिवमादरात् ॥ १७२ ॥ इति ।

अतो नारायणवर्मण्यपि "यज्ञश्च लोकादवतात् कृतान्ताद् बलो गणात् क्रोधवशादहीन्द्रः" इति श्रीबलदेवस्य शेषादन्यत्वं शक्त्यतिशयश्च दर्शितः ।
जनान्तादिति पाठे जनानां नाशादिति स एवार्थः । अतः "शेषाख्यं धाम मामकम्" (भा० १०।२।८) इत्यत्रापि "शिष्यतेऽशेषसञ्ज्ञः" (भा० १०।३।२५) इतिवदव्यभिचार्यंश एवोच्यते । शेषस्याख्या ख्यातिर्यस्मादिति वा ।
श्रीमदानकदुन्दुभिना च श्रीकृष्णसाम्येनैव निर्दिष्टम् "युवां न नः सुतौ साक्षात् प्रधानपुरु-षेश्वरौ" (भा० १०।८५।१८) इत्यत्र साक्षादेवेति त्वधिकमुपजीव्यम् ।
अथ यदि "प्रायो मायास्तु मे भर्तुर्नान्या मेऽपि विमोहिनी" (भा० १०।१३।३७) तद्वाक्यानु-सारेणावेशावतारत्वं मन्तव्यं तदा पूर्वग्रन्थबलात् श्रीबलदेवस्वांशत्वमेव । किन्तु शेषा-ख्यतदाविष्टपार्षदविशेषस्य तदन्तःपातात् तदंशेनैव तद्व्यवहार इति मन्तव्यम् । तदेव-मेकरूपत्वेऽपि "प्रायो मायास्तु मे भर्तुर्नान्या मेऽपि विमोहिनी" इत्यादौ यत् तस्मिंस्तस्य भक्तिः श्रूयते तत् तु लक्ष्म्या इव द्रष्टव्यम् ॥ श्रीब्रह्मा देवान् ॥

८७ । अथ श्रीप्रद्युम्नस्यापि शिवनेत्रदग्धः स्मरो जातोऽयमिति यच्छ्रूयते तदप्येकदेशप्रस्तावमात्रम् । तस्य गोपालतापनीश्रुत्यादौ (गो० ता० उ० २।४०) —

यत्रासौ संस्थितः कृष्णस्त्रिभिः शक्त्या समाहितः ।
रामानिरुद्धप्रद्युम्नै रुक्मिण्या सहितो विभुः ॥ १७३ ॥

इत्यादिना नित्यश्रीकृष्णचतुर्व्यूहान्तःपातितया प्रसिद्धेस्तथा सम्भवाभावात् ।
तस्य स्मरस्यापि साधारणदेवताविशेषमात्रत्वेन प्रसिद्धत्वे चतुर्व्यूहान्तःपातितायामयोग्यतमत्वात् । तस्माद् वक्ष्यमाणाभिप्रायेणैवैतदाह (भा० १०।५५।१) —

कामस्तु वासुदेवांशो दग्धः प्राग् रुद्रमन्युना ।
देहोपपत्तये भूयस्तमेव प्रत्यपद्यत ॥ १७४ ॥

अवेदज्ञस्यापि ब्राह्मण्ये सत्येव ब्राह्मणस्तु वेदज्ञ इतिवत् तुशब्दोऽत्र मुख्यतां सूचयति । ततः “कामस्तु वासुदेवांशः” इत्यस्य वासुदेवांशो यः कामः स एव मुख्य इत्यर्थः । तुशब्दोऽयं भिन्नोपक्रमे वा । ततो “वासुदेवांशस्तु कामः” इत्यन्वयेऽपि पूर्ववदेवार्थः । तदेवं सति यः प्राग् रुद्रमन्युना दग्धो देवताविशेष इन्द्रभृत्य इत्येकादेशप्रसिद्धः कामः स देहोपपत्तये तत्कोपदग्धतया नित्यमेवानङ्गतां प्राप्तस्य तस्य स्वतो देहापत्त्यभावाद् देहप्राप्त्यर्थं तमेव वासुदेवांशं प्रद्युम्नाख्यं मुख्यं काममेव प्रत्यपद्यत प्रविष्टवान् । भूयःशब्देन प्रद्युम्नादेव पूर्वमप्युद्भुतोऽसाविति बोध्यते ।
यद्वा यस्तु कामः प्राग् रुद्रमन्युनाऽदग्धो न दग्धः स भूयः प्रकटलीलायां देहोपपत्तये स्वमूर्तिप्रकाशनार्थं तं श्रीवासुदेवमेव प्रविष्टवान् । अदग्धत्वे हेतुः — वासुदेवांश इति ॥

८८ । पूर्वोक्तमेव व्यनक्ति (भा० १०।५५।२) —

स एव जातो वैदर्भ्यां कृष्णवीर्यसमुद्भवः ।
प्रद्युम्न इति विख्यातः सर्वतोऽनवमः पितुः ॥ १७५ ॥

यः कृष्णवीर्यसमुद्भवो यश्च प्रद्युम्न इति विख्यातः स एव प्रकटलीलावसरेऽपि वैदर्भ्यां जात आविर्भूतः । न त्वन्यः प्राकृतकाम एव । तत्र हेतुः — सर्वतो गुणरूपादिष्वशेषेष्वेव धर्मेषु पितुः श्रीकृष्णादनवमस्तुल्य एवेति । अन्यथा तादृशानवमत्वं न कल्पत इति भावः ।
तस्माद् यथा महाभारते सर्वत्र श्रीमदर्जुनस्य नरत्वप्रसिद्धावपि पञ्चेन्द्रोपाख्याने इन्द्रत्वप्रसिद्धिरिन्द्रस्यापि तत्र प्रवेशविवक्षया घटते तद्वदत्रापि । अतः श्रीनारदेन रत्यै तथोपदेशस्तथा तत्प्राप्तिश्च न दोषाय । पूर्वपद्यस्योत्तरस्मिन्नर्थेऽपि श्रीनारदोपदेशबलेनैव दग्धकामस्य प्रवेशस्तत्र गम्यः । ततः साक्षात् प्रद्युम्नसङ्गमयोग्यता चास्याः स्पर्शमणिवत् तत्सामीप्यगुणादेव मन्तव्या ।

श्रीप्रद्युम्नस्य निजशक्तिस्तु श्रीमदनिरुद्धमातैवेति ज्ञेयम् । अतस्तापनीश्रुतिलब्धोऽर्थः समञ्जसः ॥ श्रीशुकः ॥

८९ । एवमनिरुद्धस्यापि साक्षाच् चतुर्व्यूहत्वे लिङ्गमाह (भा० ३।१।३४) —

अपि स्विदास्ते भगवान् सुखं वो यः सात्वतां कामदुघोऽनिरुद्धः ।
यमामनन्ति स्म हि शब्दयोनिं मनोमयं सत्त्वतुरीयतत्त्वम् ॥ १७६ ॥

शब्दयोनिं निश्वासव्यञ्जितवेदवृन्दम् "एवं वा अरेऽस्य महतो भूतस्य निःश्वसितमेतद् यदृग्वेदः" (बृ० २।४।१०) इत्यादिश्रुतेः । मनोमयं चित्ते वासुदेववन् मनस्युपास्यम् । सत्त्वं शुद्धसत्त्वात्मकः श्रीवासुदेवादिरूपो भगवान् यत्र तुरीयं रूपम् । अतो बाणयुद्धादौ बन्धनानुकरणादिकमात्मेच्छामयी लीलैव श्रीरामचन्द्रादिवत् ।
अस्य पाद्मबृहत्सहस्रनाम्नि नामानि चैतानि —

अनिरुद्धो बृहद्ब्रह्म प्राद्युम्निर्विश्वमोहनः ।
चतुरात्मा चतुर्वर्णश्चतुर्युगविधायकः ॥ १७७ ॥
चतुर्भेदैकविश्वात्मा सर्वोत्कृष्टांशकोटिसूः ।
आश्रयात्मा ॥ इति ।

अतः श्रीकृष्णव्यूहत्वेन महानिरुद्धत्वादस्यैवाविर्भावविशेषः प्रलयार्णवादिधामा पुरुष इति ज्ञेयम् । अत एवाभेदेन "जगृहे पौरुषं रूपं भगवान्" (भा० १।३।१) इत्याद्युक्तम् । मूलसङ्कर्षणाद्यंशैरेव हीतरसङ्कर्षणाद्यवस्थात्रयं पुरुषं प्रकाशयतीति ।
तथैवाभेदेन विष्णुधर्मोत्तरेऽपीदमुक्तम् । तत्र श्रीवज्रप्रश्नः —

कस्त्वसौ बालरूपेण कल्पान्तेषु पुनः पुनः ।
दृष्टो यो न त्वया ज्ञातस्तत्र कौतूहलं मम ॥ १७८ ॥

श्रीमार्कण्डेयोत्तरं च —

भूयो भूयस्त्वसौ दृष्टो मया देवो जगत्पतिः ।
कल्पक्षये न विज्ञातः स मायामोहितेन वै ॥ १७९ ॥
कल्पक्षये व्यतीते तु तं देवं प्रपितामहात् ।
अनिरुद्धं विजानामि पितरं ते जगत्पतिम् ॥ १८० ॥ इति ।

भीष्मपर्वणि दुर्योधनं प्रति भीष्मशिक्षायां श्रीकृष्णस्यावताराराम्भे गन्धमादनमागतस्य ब्रह्मणस्तदाविर्भावं मनसि पश्यतस्तु बालस्य तदिदं वचनम् (म० भा० ६।६५।७०–७२) —

सृष्ट्वा सङ्कर्षणं देवं स्वयमात्मानमात्मना ॥ १८१ ॥
कृष्णत्वमात्मनास्राक्षीः प्रद्युम्नं ह्यात्मसम्भवम् ।
प्रद्युम्नाच् चानिरुद्धं तु यं विदुर्विष्णुमव्ययम् ॥ १८२ ॥
अनिरुद्धोऽसृजन् मां वै ब्राह्मणं लोकधारिणम् ।
वासुदेवमयः सोऽहं त्वयैवास्मि विनिर्मितः ॥ १८३ ॥ इति ।

अत एव च पूर्वमपि "जगृहे" (भा० १।३।१) इत्यत्र श्रीकृष्णानिरुद्धावतारान्तःपातित्वं न व्याख्यातम् ॥ विदुरः श्रीमदुद्धवम् ॥

९० । तदेतत् तस्य चतुर्व्यूहात्मकस्यैव पूर्णत्वं व्याख्यातम् । श्रीगोपालोत्तरतापन्यामपि तथैवायं प्रणवार्थत्वेन दर्शितः (गो० ता० उ० २।५५-५६) —

रोहिणीतनयो रामोऽकाराक्षरसम्भवः ।
तैजसात्मकः प्रद्युम्न उकाराक्षरसम्भवः ॥ १८४ ॥
प्राज्ञात्मकोऽनिरुद्धो वै मकाराक्षरसम्भवः ।
अर्धमात्रात्मकः कृष्णो यस्मिन् विश्वं प्रतिष्ठितम् ॥ १८५ ॥ इति ।

अथ श्रीकृष्णेऽवतरति तत्तदंशावताराणामपि प्रवेश इति यदुद्दिष्टं तद् यथा तत्र "कृष्णस्तु भगवान् स्वयम्" (भा० १।३।२८) इत्यादिकं सिद्धमेव तथा तस्य तद्रूपेणैव श्रीवृन्दावनादौ सर्वदावस्थायित्वं प्रतिपादयिष्यामः ।
अथ च श्रीहरिवंशमते उपेन्द्र एवावततारेति । जयविजयशापप्रस्तावे च "यास्यामि भवनं ब्रह्मन्नेतदन्ते तवानघ" (भा० ११।६।३१) इत्यत्र च "पाहि वैकुण्ठकिङ्करान्" (भा० ११।६।२७) इत्यत्र च स्वामिव्याख्यानुसारेण विकुण्ठासुत एवेति ।
क्वचित् क्षीरोदशाय्येवेति, क्वचित् पुरुष एवेति, क्वचिन् नारायणर्षिरेवेति, बृहत्सहस्रनाम्नि लक्ष्मणस्यैव बलरामत्वकथनेन श्रीराघव एवेति, क्वचिन् नारायणकेश एवेत्यादिकं नानाविधत्वं श्रूयते । एवं चैकं सन्धित्सतोऽन्यत् प्रच्यवते । अत्र सत्यं च सर्ववाक्यम् । यथा स्वमत्यनुभवानुरूपात् नानावाक्यैकवाक्यता च ।
यथा क्रममुक्तिमार्गेऽर्चिरादिक्रम एवाङ्गी नाडीरश्म्यादिमार्गास्तु तदङ्गत्वेनैव "अर्चिरादिना तत्प्रथितेः" (ब्र० सू० ४।३।१) इति सूत्रे स्वीक्रियन्ते तद्वत् । यतः स्वयं भगवत्यवतरति सर्वेऽपि ते प्रविष्टा इति यदा यत् किञ्चिद् येनानुभूतं तदा तेन तदेव निर्दिष्टमिति । तस्माद् विद्वद्भिरेवं विचार्यताम् — स्वयं भगवति तस्मिन् प्रवेशं विना कथं तत् सम्भवेदिति । दृश्यते च तस्मात् केषाञ्चिदंशानां पुनराविर्भावः । यथा प्रद्युम्नादीनाम् । अत एव विकुण्ठासुतस्य प्रवेशाभिप्रायेणैव शिशुपालदन्तवक्रयोः श्रीकृष्णसायुज्यमेव तदानीं जातम् । पुनरवतारलीलासमाप्तौ श्रीविकुण्ठासुते स्वधामगते पार्षदत्वप्राप्तिः । यथोक्तं श्रीनारदेन (भा० ७।१।४६) —

वैरानुबन्धतीव्रेण ध्यानेनाच्युतसात्मताम् ।
नीतौ पुनर्हरेः पार्श्वं जग्मतुर्विष्णुपार्षदौ ॥ १८६ ॥ इति ।

तथा हरिवंशे च "क्षीरोदशायिनो मुकुटे दैत्यापहृते दैत्यमारणाय गरुडो यावत् कृतविलम्बस्तावत् श्रीकृष्णोऽवततार । ततश्चासौ मुकुटमाहृत्य तत्र चोर्ध्वलोके कुत्रापि भगवन्तमदृष्ट्वा गोमन्थशिरसि श्रीकृष्णायैव समर्पितवान्" इति प्रसिद्धिः ।
एवमेव बलिसद्मगतयोः श्रीकृष्णरामयोस्तद्द्वारस्थविष्णवदर्शनम् ।
किन्तु तत्तद्वाक्यपर्यालोचनया केषाञ्चिन् मूर्त्याकर्षणं हरिवंशगतगिरिगुहाशयनपर्यालोचनया तु तच्छक्त्याकर्षणमिति लभ्यते । तच्च तदानीमात्मनि सर्वेषामेव भक्तानामेकतानताकृतिलीलाकौतुकार्थमेवेति च गम्यते । तदेतदेवाह (भा० ११।११।२८) —

त्वं ब्रह्म परमं व्योम पुरुषः प्रकृतेः परः ।
अवतीर्णोऽसि भगवन् स्वेच्छोपात्तपृथग्वपुः ॥ १८७ ॥

साक्षाद् भगवानेव त्वमवतीर्णोऽसि । भगवत एव वैभवमाह — ब्रह्मत्वं परमव्योमाख्यो वैकुण्ठस्त्वं प्रकृतेः परः पुरुषोऽपि त्वमिति । भगवानपि कथम्भूतः सन्नवतीर्णः ? "स्वेच्छामयस्य" (भा० १०।१४।२) इत्यनुसारेण स्वेषां सर्वेषामेव भक्तानां या इच्छा तां पूरयितुमुपात्तानि ततस्ततः स्वत आकृष्टानि पृथग्वपूंषि निजतत्तदाविर्भावा येन तथाभूतः सन्निति ।
तं प्रति यथाह जाम्बवान् (भा० १०।५६।२८) —

यस्येषदुत्कलितरोषकटाक्षमोक्षैर्वर्त्मादिशत् क्षुभितनक्रतिमिङ्गिलोऽब्धिः ।
सेतुः कृतः स्वयश उज्ज्वलिता च लङ्का रक्षःशिरांसि भुवि पेतुरिषुक्षतानि ॥ १८८ ॥

यथा च देवाः (भा० ११।६।१३) —

केतुस्त्रिविक्रमयुतस्त्रिपतत्पताको यस्ते भयाभयकरोऽसुरदेवचम्वोः ।
स्वर्गाय साधुषु खलेष्वितराय भूमन् पादः पुनातु भगवन् भजतामघं नः ॥ १८९ ॥
इति ।

यथा वा ब्रह्मा "नारायणस्त्वम्" (भा० १०।१४।१४) इत्यादौ "नारायणोऽङ्गं नरभूजलायनात्" (भा० १०।१४।१४) इति ।
यथा च त एव देवाः (भा० ११।६।१०) —

स्यान् नस्तवाङ्घ्रिरशुभाशयधूमकेतुः क्षेमाय यो मुनिभिरार्द्रहृदोह्यमानः ।
यः सात्वतैः समविभूतय आत्मवद्भिर्व्यूहेऽर्चितः सवनशः स्वरतिक्रमाय ॥ १९० ॥
इति ।

अत एवाक्रूरः (भा० १०।४१।४) —

अद्भुतानीह यावन्ति भूमौ वियति वा जले ।
त्वयि विश्वात्मके तानि किं मेऽदृष्टं विपश्यतः ॥ १९१ ॥ इत्यादि ।

अत एव (भा० ११।२।१) —

गोविन्दभुजगुप्तायां द्वारवत्यां कुरूद्वह ।
अवात्सीन् नारदोऽभीक्ष्णं कृष्णोपासनलालसः ॥ १९२ ॥ इति ।
उद्धवः श्रीभगवन्तम् ॥

९१ । तदेवं प्रमाणवत्त्वे प्रयोजनवत्त्वे स्थिते तमेव प्रवेशमाह (भा० ३।२।१५) —

स्वशान्तरूपेष्वितरैः स्वरूपैरभ्यर्द्यमानेष्वनुकम्पितात्मा ।
परावरेशो महदंशयुक्तो ह्यजोऽपि जातो भगवान् यथाग्निः ॥ १९३ ॥

तच्च जन्म निजतत्तदंशानादायैवेत्याह — महदंशयुक्तो महतः स्वस्यैवांशैर्युक्तः "महान्तं विभुमात्मानम्" (कठ १।२।२२) इत्यादि श्रुतेः । "महद्वच्च" (ब्र० सू० १।४।७) इति न्याय-प्रसिद्धेश्च ।
महान्तो ये पुरुषादयोऽंशास्तैर्युक्त इति वा । श्रीविष्णुसहस्रनामस्तोत्रे "लोकनाथं महद्भू-तम्" इतिवन्नात्मत्वव्यभिचारः ।
महद्भिरंशिभिरंशैश्च युक्त इति वा ॥ श्रीमदुद्धवः श्रीविदुरम् ॥

९२ । तथैवम् "अथाहमंशभागेन" (भा० १०।२।९) इत्यादावप्येवं व्याख्येयम् ।
अंशानां भागो भजनं प्रवेशो यत्र तेन परिपूर्णरूपेण । अंशानां भजनेन लक्षितो वा । "प्रा-प्स्यामि" इति प्रकटलीलाभिप्रायेण भविष्यन्निर्देशः । अत एव तदवतारसमये युगावता-रश्च स एवेत्यभिप्रेत्याह (भा० १०।८।१३) —

आसन् वर्णास्त्रयो ह्यस्य गृह्णतोऽनुयुगं तनूः ।
शुक्लो रक्तस्तथा पीत इदानीं कृष्णतां गतः ॥ १९४ ॥

अस्य तव पुत्रस्य प्रतियुगं तनूर्युगावतारलीलावतारान् गृह्णतः प्रकटयतो यद्यपि तत्र तत्र शुक्लादयस्त्रयोऽप्यन्ये वर्णा आसन् तथापि यो यः शुक्लस्तथा रक्तः पीतश्च स स इदानी-मेतदवतारसमये कृष्णतामेव गतः । एतस्मिन् कृष्णाकार एवान्तर्भूतः । किमुत यो यः कृष्णः स स एवेत्यर्थः । तस्मात् कृष्णीकर्तृत्वात् स्वयं कृष्णत्वात् सर्वाकर्षकत्वाच्च कृष्ण इत्येकमस्य नामेति प्राकरणिकोऽप्यर्थः श्रेयान् ।
तदानीं श्रीकृष्णस्यैव द्वापरयुगावतारत्वं श्रीकरभाजनेन युगावतारोपासनायामुक्तं न तु द्वापरान्तरवच्छुकपक्षवर्णस्यान्यस्य (भा० ११।५।२७–२९) —

द्वापरे भगवाञ् श्यामः पीतवासा निजायुधः ।
श्रीवत्सादिभिरङ्कैश्च लक्षणैरुपलक्षितः ॥ १९५ ॥
तं तदा पुरुषं मर्त्या महाराजोपलक्षणम् ।

यजन्ति वेदतन्त्राभ्यां परं जिज्ञासवो नृप ॥ १९६ ॥
नमस्ते वासुदेवाय नमः सङ्कर्षणाय च ।
प्रद्युम्नायानिरुद्धाय तुभ्यं भगवते नमः ॥ १९७ ॥ इति ।

अत्र श्रीकृष्णत्वे लिङ्गं महाराजोपलक्षणमिति वासुदेवायेत्यादि च श्रीहरिवंशोक्तराजराजाभिषेकाद् द्वारकायां चतुर्व्यूहत्वप्रसिद्धेश्च ॥ गर्गः श्रीव्रजेश्वरम् ॥

९३ । तदेवं श्रीकृष्णस्य स्वयं भगवत्त्वे सुष्ठु निर्धारिते नित्यमेतद्रूपत्वेनावस्थितिरपि स्वयमेव सिद्धा । तथापि मन्दधियां भ्रान्तिहानार्थमिदं विव्रियते । तत्र तावदाराधनावाक्येनैव सा सिध्यति । आराध्यस्याभावेऽप्याराधनानोदनाया विप्रलिप्साजन्यत्वापत्तेः । तच्च परमाप्ते शास्त्रे न सम्भवति । सम्भवे च पुरुषार्थाभावात् शास्त्रानर्थक्यम् ।
आरोपश्च परिच्छिन्नगुणरूप एव वस्तुनि कल्पते नानन्तगुणरूपे । स्वामिचरणैरपीदमेव पुष्टमेकादशान्ते "धारणाध्यानमङ्गलम्" (भा० ११।३१।६) इत्यत्र धारणाया ध्यानस्य च मङ्गलं शोभनं विषयमितरथा तयोर्निर्विषयत्वम् । दृश्यते चाद्याप्युपासकानां साक्षात्कारस्तत्फलप्राप्तिश्चेति भावः ।
श्रूयते चैवं पञ्चमे नवसु वर्षेषु तत्तदवतारोपासनादि । यथोक्तम् "नवस्वपि वर्षेषु भगवान् नारायणो महापुरुषः पुरुषाणां तदनुग्रहायात्मतत्त्वव्यूहेनात्मनाद्यापि सन्निधीयते" (भा० ५।१७।१४) इति ।
सन्निधानं चेदं साक्षाद्रूपेणैव श्रीप्रद्युम्नादौ गतिविलासादेर्वर्णितत्वात् । अत्र चात्मना स्वयमेवेत्युक्तम् । तथा नित्यत्व एव शालग्रामशिलादिषु नरसिंहत्वादिभेदश्च सङ्गच्छते । तत्तदवतारसान्निध्यादेव हि तत्तद्भेदः ।
तथा श्रीकृष्णमधिकृत्यापि गीतं श्रीविष्णुधर्मोत्तरस्थश्रीकृष्णसहस्रनामप्रारम्भे—

तस्य हृष्टाशयः स्तुत्या विष्णुर्गोपीगणावृतः ।
तापिञ्छश्यामलं रूपं पिञ्छोत्तंसमदर्शयत् ॥ १९८ ॥ इति ।

अग्रे च तद्वाक्यम्—

मामवेहि महाभाग कृष्णं कृत्यविदां वर ।
पुरस्कृतोऽस्मि त्वद्भक्त्या पूर्णाः स्युस्ते मनोरथाः ॥ १९९ ॥ इति ।

तथा पाद्मे निर्माणखण्डे "पश्य त्वं दर्शयिष्यामि स्वरूपं वेदगोपितम्" इति श्रीभगवद्वाक्यानन्तरं ब्रह्मवाक्यम्—

ततोऽपश्यमहं भूप बालं कालाम्बुदप्रभम् ।
गोपकन्यावृतं गोपं हसन्तं गोपबालकैः ॥ २०० ॥
कदम्बमूल आसीनं पीतवाससमद्भुतम् ।
वनं वृन्दावनं नाम नवपल्लवमण्डितम् ॥ २०१ ॥ इत्यादि ।

त्रैलोक्यसम्मोहनतन्त्रे श्रीमदष्टादशाक्षरजपप्रसङ्गे —

अहर्निशं जपेद् यस्तु मन्त्री नियतमानसः ।
स पश्यति न सन्देहो गोपरूपधरं हरिम् ॥ २०२ ॥ इति ।

गौतमीये च सदाचारप्रसङ्गे —

अहर्निशं जपेन् मन्त्रं मन्त्री नियतमानसः ।
स पश्यति न सन्देहो गोपवेशधरं हरिम् ॥ २०३ ॥ इति ।

श्रीगोपालतापनीश्रुतिश्चैवम् "तदु होवाच ब्राह्मणोऽसावनवरतं मे ध्यातः स्तुतः परार्धान्ते सोऽबुध्यत गोपवेशो मे पुरस्तादाविर्बभूव" (गो० ता० उ० १।२७) इति सिद्धनिर्देशोऽपि श्रूयते । यथा "वन्दे वृन्दावनासीनमिन्दिरानन्दमन्दिरम्" इति बृहन्नारदीयारम्भे मङ्गलाचरणम् ।

गृहे सन्तिष्ठते यस्य माहात्म्यं दैत्यनायक ।
द्वारकायाः समुद्भूतं सान्निध्यं केशवस्य च ।
रुक्मिणीसहितः कृष्णो नित्यं निवसते गृहे ॥ २०४ ॥

इति स्कान्दद्वारकामाहात्म्ये बलिं प्रति श्रीप्रह्लादवाक्यम् ।

व्रतिनः कार्त्तिके मासि स्नातस्य विधिवन् मम ।
गृहाणार्घ्यं मया दत्तं राधया सहितो हरे ॥ २०५ ॥

इति पाद्मकार्त्तिकमाहात्म्ये तत्प्रातःस्नानार्घ्यमन्त्रः ।
एवं च श्रीमदष्टादशाक्षरादयो मन्त्रास्तत्तत्परिकरादिविशिष्टतयैवाराध्यत्वेन सिद्धनिर्देशमेव कुर्वन्ति । तदावरणादिपूजामन्त्रश्च । किं बहुना कर्मविपाकप्रायश्चित्तशास्त्रेऽपि तया श्रूयते । यदाह बौधायनः — "होमस्तु पूर्ववत् कार्यो गोविन्दप्रीतये ततः" इत्याद्यनन्तरम् —

गोविन्द गोपीजनवल्लभेश कंसासुरघ्न त्रिदशेन्द्रवन्द्य ।
गोदानतृप्तः कुरु मे दयालो अर्शोविनाशं क्षपितारिवर्ग ॥ २०६ ॥ इति ।

अन्यत्र च यथा —

गोविन्द गोपीजनवल्लभेश विध्वस्तकंस त्रिदशेन्द्रवन्द्य ।
गोवर्धनाद्रिप्रवरैकहस्त संरक्षिताशेषगवप्रवीण ।
गोनेत्रवेणुक्षपण प्रभूतमान्ध्यं तथोग्रं तिमिरं क्षिपाशु ॥ २०७ ॥ इति ।

स्पष्टं च तथात्वं श्रीगोपालतापन्याम् "तमेकं गोविन्दं सच्चिदानन्दविग्रहं पञ्चपदं वृन्दावनसुरभूरुहतलासीनं सततं समरुद्गणोऽहं परमया स्तुत्या तोषयामि" (गो० ता० उ० १।३५) इति ।
अत एव "पुरस्कृतोऽस्मि त्वद्भक्त्या" इत्येवोक्तमिति ।
अलं चैवंविधप्रमाणसङ्ग्रहप्रपञ्चेन । यतश्चिच्छक्त्येकव्यञ्जितानां तत्परिच्छदादीनामपि तथा नित्यावस्थितित्वेनाविर्भावतिरोभावावेव द्वितीयसन्दर्भे साधितौ स्तः । सर्वथोत्पत्तिनाशौ तु निषिद्धौ । ततस्तदवताराणां किमुत स्वयं भगवतो वा तस्य किमुततरामिति ।
तथा च व्याख्यातम् "जगृहे पौरुषं रूपम्" (भा० १।३।१) इत्यत्र तत्त्ववादिगुरुभिः "व्यक्त्यपेक्षया" जगृहे । तथा हि तन्त्रभागवते—

अहेयमनुपादेयं यद् रूपं नित्यमव्ययम् ।
स एवापेक्ष्यरूपाणां व्यक्तिमेव जनार्दनः ।
अगृह्णाद् व्यसृजच्चेति रामकृष्णादिकां तनुम् ॥ २०८ ॥
पठ्यते भगवानीशो मूढबुद्धिव्यपेक्षया ।
तमसा ह्युपगूढस्य यत् तमःपानमीशितुः ॥ २०९ ॥
एतत् पुरुषरूपस्य ग्रहणं समुदीर्यते ॥
कृष्णरामादिरूपाणां लोके व्यक्तिव्यपेक्षया ॥ २१० ॥ इति ।

एवमेव प्रथमस्य द्वादशाध्याये "विधूय" (भा० १।१२।११) इत्यादिपद्ये स्वामिभिरपि व्याख्यातम् "यत्र दृष्टस्तत्रैवान्तर्हितः । न त्वन्यत्र गतः । यतो विभुः सर्वगतः" इति ।
तथा माध्वभाष्यप्रमाणिता श्रुतिश्च "वासुदेवः सङ्कर्षणः प्रद्युम्नोऽनिरुद्धोऽहं मत्स्यः कूर्मो वराहो नरसिंहो वामनो रामो रामो रामः कृष्णो बुद्धः कल्किरहं शतधाहं सहस्रधाहमितोऽहमनन्तोऽहं नैवैते जायन्ते नैते म्रियन्ते नैषामज्ञानबन्धो न मुक्तिः सर्व एव ह्येते पूर्णा अजरा अमृताः परमाः परमानन्दाः" इति चतुर्वेदशिखायाम् ।
तथा च श्रीनृसिंहपुराणे "युगे युगे विष्णुरनादिमूर्तिमास्थाय विश्वं परिपाति दुष्टहा" इति ।
तथा च नृसिंहतापन्यां तद्भाष्यकृद्भिर्व्याख्यातम् "एतदेव नृसिंहविग्रहं नित्यम्" इति ।
श्रुतिश्च सेयम् "ऋतं सत्यं परं ब्रह्म पुरुषं नृकेशरिविग्रहम्" इति ।
एवं च ब्राह्मपाद्मोत्तरखण्डादावपि श्रीमत्स्यदेवादीनां च पृथक् पृथग् वैकुण्ठलोकाः श्रूयन्ते । "एवमेव जलेषु मां रक्षतु मत्स्यमूर्तिः" इति नारायणवर्माद्युक्तमपि सङ्गच्छते । तस्मात् स्वयं भगवति श्रीकृष्णेऽप्यन्यथासम्भावनमनादिपापविक्षेप एव हेतुः ।
तदेवमभिप्रेत्य तान् दुर्बुद्धीनपि बोधयितुं तस्य स्वोपास्यत्वं प्रतिपादयन्नाह "पतिर्गतिश्चान्धकवृष्णिसात्वतां प्रसीदतां मे भगवान् सतां पतिः" (भा० २।४।२०) इति ।
स्पष्टम् ॥ श्रीशुकः ॥

९४ । तथा "देवे वर्षति यज्ञविप्लवरुषा" इत्यादौ "प्रीयान् न इन्द्रो गवाम्" (भा० १०।२६।२५) इति ।
स्पष्टम् ॥ सः ॥

९५ । तथा (भा० १२।११।२५) —

> श्रीकृष्ण कृष्णसख वृष्ण्यृषभावनिध्रुग्राजन्यवंशदहनानपवर्गवीर्य ।
> गोविन्द गोपवनिताव्रजभृत्यगीततीर्थश्रवः श्रवणमङ्गल पाहि भृत्यान् ॥ २११ ॥

स्पष्टम् ॥ श्रीसूतः ॥

९६ । अपि च स्वयमेव स्वविग्रहमेव लक्ष्यीकृत्याह (भा० १०।३।३७-३८) —

> तदा वां परितुष्टोऽहममुना वपुषानघे ।
> तपसा श्रद्धया नित्यं भक्त्या च हृदि भावितः ॥ २१२ ॥
> प्रादुरासं वरदराड् युवयोः कामदित्सया ।
> व्रियतां वर इत्युक्ते मादृशो वां वृतः सुतः ॥ २१३ ॥

इत्युपक्रम्य (भा० १०।३।४१-४३) —

> अदृष्ट्वान्यतमं लोके शीलौदार्यगुणैः समम् ।
> अहं सुतो वामभवं पृश्निगर्भ इति श्रुतः ॥ २१४ ॥
> तयोर्वां पुनरेवाहमदित्यामास कश्यपात् ।
> उपेन्द्र इति विख्यातो वामनत्वाच्च वामनः ॥ २१५ ॥
> तृतीयेऽस्मिन् भवेऽहं वै तेनैव वपुषाथ वाम् ।
> जातो भूयस्तयोरेव सत्यं मे व्याहृतं सति ॥ २१६ ॥ इति ।

अमुना श्रीकृष्णस्य मम प्रादुर्भावसमयेऽत्र प्रकाशमानेनैतेन श्रीकृष्णाख्येनैव । तृतीय इति तेनैव पूर्वं वरार्थं प्रादुर्भावितेनैव । अत एव पृश्निगर्भादित्वे नैव वपुषेत्यनुक्तत्वान् न तु तदानीमधुनैव स्वयमेव बभूव किन्त्वंशेनैवेति गम्यते ।
"पृश्निगर्भस्तु ते बुद्धिमात्मानं भगवान् परः" (भा० १०।६।२५) इत्यत्राप्येतदेव गीर्देव्या सूचितमस्ति । अत एव तृतीय एव भवे तत्सदृशसूतप्राप्तिलक्षणवरस्य परमपूर्णत्वापेक्षया तत्रैव "सत्यं मे व्याहृतम्" इत्युक्तम् । चतुर्भुजत्वं चेदं रूपं श्रीकृष्ण एव "कृष्णावतारोत्सवः" (भा० १०।३।११) इत्यादिभिस्तस्यात्यन्तप्रसिद्धेः ॥ श्रीभगवान् श्रीदेवकीदेवीम् ॥

९७ । एवं च "देवक्यां देवरूपिण्याम्" (भा० १०।३।८) इत्यादि ।
स्पष्टम् ॥ श्रीशुकः ॥

९८ । ननु सत्यं तस्य चतुर्भुजाकाररूपस्य तादृशत्वं किन्तु "रूपं चेदं पौरुषं ध्यानधिष्ण्यं मा प्रत्यक्षं मांसदृशां कृषीष्ठाः" (भा० १०।३।२८) इति मातृविज्ञापनानुसारेण (भा० १०।३।४४) —

एतद् वां दर्शितं रूपं प्राग्जन्मस्मरणाय मे ।
नान्यथा मद्भवं ज्ञानं मर्त्यलिङ्गेन जायते ॥ २१७ ॥

इति प्रत्युत्तरय्य (भा० १०।३।४६) —

इत्युक्त्वासीद्धरिस्तूष्णीं भगवानात्ममायया ।
पित्रोः सम्पश्यतोः सद्यो बभूव प्राकृतः शिशुः ॥ २१८ ॥

इत्युक्तदिशा यन्मानुषाकाररूपं स्वीकृतवान् तत्र सन्दिग्धमिवाभाति ।
अत्र च भवतु वा "हरिरपि तत्यज आकृतिं त्र्यधीशः" (भा० ३।४।२८) इति "त्यक्षन् देहम्" (भा० ३।४।२९) इति च तन्त्रभागवतानुसारेणान्तर्धापनार्थत्वादसहायम् ।
भा० १।१५।३४–३५ —

ययाहरद् भुवो भारं तां तनुं विजहावजः ।
कण्टकं कण्टकेनेव द्वयं चापीशितुः समम् ॥ २१९ ॥
यथा मत्स्यादिरूपाणि धत्ते जह्याद् यथा नटः ।
भूभारः क्षपितो येन जहौ तच्च कलेवरम् ॥ २२० ॥

इति तु परिपोषकम् ।
एतदेव श्रीवसुदेववचनेऽपि लभ्यते (भा० १०।८५।२०) —

सूतीगृहे ननु जगाद भवानजो नौ सञ्जज्ञ इत्यनुयुगं निजधर्मगुप्त्यै ।
नानातनूर्गगनवद् विदधज् जहासि को वेद भूम्न उरुगाय विभूतिमायाम् ॥ २२१ ॥

इत्यत्र । अत्रोच्यते — तत्तद्वचनमन्यार्थत्वेन दृश्यमिति । एकस्मिन्नेव तस्मिन् श्रीविग्रहे कदाचिच् चतुर्भुजत्वस्य कदाचिद् द्विभुजत्वस्य च प्रकाशश्रवणेनाविशेषापाताद् भूभार-क्षपणे द्वयोरपि सामान्यात् । "सूतीगृहे" इत्यादिवाक्यस्य चतुर्भुजविषयत्वाच्च ।
किं च यैर्विद्वदनुभवसेवितशब्दसिद्धैर्नित्यत्वादिभिर्धर्मैः श्रीविग्रहस्य परमतत्त्वाकारत्वं साधितम् । ते प्रायशो नराकारमधिकृत्यैव ह्युदाह्रियन्ते स्म द्वितीयसन्दर्भे ।
तथात्रैव चोपासकेषु साक्षात्कारादिलिङ्गेन सिद्धनिर्देशेन च तदाकारस्यापि नित्यसिद्ध-त्वं दृढीकृतम् । उदाहरिष्यते च सिद्धनिर्देशः "मां केशवो गदया प्रातरव्याद् गोविन्द आसङ्गवमात्तवेणुः" (भा० ६।८।२०) इति । सम्प्रत्यन्यदपि तत्रोदाह्रियते । तत्र नित्यत्वं यथा (भा० १०।३८।७–८) —

कंसो बताद्याकृत मेऽत्यनुग्रहं द्रक्ष्येऽङ्घ्रिपद्मं प्रहितोऽमुना हरेः ।
कृतावतारस्य दुरत्ययं तमः पूर्वेऽतरन् यन्नखमण्डलत्विषा ॥ २२२ ॥

यदर्चितं ब्रह्मभवादिभिः सुरैः श्रिया च देव्या मुनिभिः ससात्वतैः ।
गोचारणायानुचरैश्चरद् वने यद् गोपिकानां कुचकुङ्कुमाङ्कितम् ॥ २२३ ॥

अत्र "पूर्व" इत्यादिद्योतितम् "गोचारणाय" इत्यादिलब्धस्य स्फुटं श्रीनराकारस्यैव नित्यावस्थायित्वं लभ्यते ॥ श्रीमदक्रूरः ॥

९९ । तथा (भा० १० ।४७ ।६२) —

या वै श्रियार्चितमजादिभिराप्तकामैर्योगेश्वरैरपि सदात्मनि रासगोष्ठ्याम् ।
कृष्णस्य तद् भगवतश चरणारविन्दं न्यस्तं स्तनेषु विजहुः परिरभ्य तापम् ॥
२२४ ॥

"सदा" भूतवर्तमानभविष्यत्कालेषु श्र्यादीनां सर्वदावस्थायित्वेन प्रसिद्धेः । सदेत्यस्य तथैव ह्यर्थप्रतीतिः सङ्कोचवृत्तौ कष्टतापत्तेः श्रीभगवति तादृशत्वासम्भवाच्च । तथा च श्री-गोपालतापनीश्रुतौ "तमेकं गोविन्दं सच्चिदानन्दविग्रहं पञ्चपदं वृन्दावनसुरभूरुहतला-सीनं सततं समरुद्गणोऽहं परमया स्तुत्या तोषयामि" (गो० ता० उ० १ ।३५) इति ब्रह्मवा-क्यम् ।
तदुत्तरतापनीश्रुतौ श्रीगोपीः प्रति दुर्वाससो वाक्यम् "जन्मजराभ्यां भिन्नः स्थाणुरयमच्छे-द्योऽयं योऽसौ सौर्ये तिष्ठति योऽसौ गोषु तिष्ठति योऽसौ गाः पालयति योऽसौ गोपेषु तिष्ठति स वो हि स्वामी भवति" (गो० ता० उ० २ ।२३) इति ॥ श्रीमदुद्धवः ॥

१०० । एवं च (भा० १० ।१२ ।१२) —

यत्पादपांसुर्बहुजन्मकृच्छ्रतो धृतात्मभिर्योगिभिरप्यलभ्यः ।
स एव यद्दृग्विषयः स्वयं स्थितः किं वर्ण्यते दिष्टमहो व्रजौकसाम् ॥ २२५ ॥

अत्र "स्वयम्" इत्यनेन तु बाढमेवान्यथाप्रतीतिर्दुर्धियां निरस्ता । "स्थितः" इति वर्तमाने क्तः । "यच्च किञ्चिज् जगत् सर्वं व्याप्य नारायणः स्थितः" (महा० ना० ९ ।५) इतिवत् ॥ श्रीशुकः ॥

१०१ । अत एव स्वभावसिद्धत्वं पूर्णैश्वर्याद्याश्रयत्वं च (भा० १० ।४४ ।१४) —

गोप्यस्तपः किमचरन् यदमुष्य रूपं लावण्यसारमसमोर्ध्वमनन्यसिद्धम् ।
दृग्भिः पिबन्त्यनुसवाभिनवं दुरापमेकान्तधाम यशसः श्रिय ऐश्वरस्य ॥ २२६ ॥

"अनन्यसिद्धम्" अन्येन तत् सिद्धमिति न किन्तु स्वाभाविकमेवेत्यर्थः । अन्यत्रासिद्धमिति तु व्याख्यानं पिष्टपेषणम् । "असमोर्ध्वम्" इति युक्तमेव । तदिदं च तासां वाक्यं श्रीशुक-देवादिभिः स्वयमनुमोदितमिति नान्यथा मन्तव्यम् ॥ मथुरापुरस्त्रियः परस्परम् ॥

१०२ । अथ विभुत्वम् "न चान्तर्न बहिर्यस्य" (भा० १०।९।१३) इत्यादौ ।
प्राकृतवस्त्वतितिरस्कृतत्वम् "त्वक्श्मश्रुरोमनखकेशपिनद्धम्" (भा० १०।६०।४५) इत्यादौ स्पष्टम् ।
स्वप्रकाशलक्षणत्वम् (भा० १०।१४।२) —

अस्यापि देववपुषो मदनुग्रहस्य स्वेच्छामयस्य न तु भूतमयस्य कोऽपि ।
नेशे महित्ववसितुं मनसान्तरेण साक्षात् तवैव किमुतात्मसुखानुभूतेः ॥ २२७ ॥

अस्य "नौमीड्य ते" (भा० १०।१४।१) इत्यादिना वर्णितलक्षणस्य श्रीमन्नराकारस्य तव सम्प्रति बालकवत्साद्यंशैर्दर्शितेषु तेष्वेकमपि देवरूपं चतुर्भुजाकारं यद् वपुस्तस्यापि । अस्तु तावत् समस्तानामित्यर्थः ।
एवं च सति साक्षादेतद्रूपस्यांशिनस्तव किमुत देववपुषो विशेषणं मदनुग्रहस्येत्यादि । ममानुग्रहो यस्मात् तस्य बालवत्सयष्टिवेण्वाद्यंशतस्तादृशरूपप्रकटनदर्शनेनैव भवन्महिमज्ञानात् ।
कथम्भूतस्य तव ? आत्मसुखानुभूतेः । आत्मना स्वेनैव न त्वन्येन सुखस्यानुभूतिरनुभवो यस्य तस्यानन्यवेद्यानन्दस्येत्यर्थः ॥ ब्रह्मा श्रीभगवन्तम् ॥

१०३ । कैमुत्येन स्वयं रूपत्वनिर्देशश्च (भा० १०।१२।३९) —

सकृद् यदङ्गप्रतिमान्तराहिता मनोमयी भागवतीं ददौ गतिम् ।
स एव नित्यात्मसुखानुभूत्यभिव्युदस्तमायः परमोऽङ्गो हि किं पुनः ॥ २२८ ॥

स्पष्टम् ॥ श्रीशुकः ॥

१०४ । अत एव साक्षात् परब्रह्मत्वमेव दर्शितम् "अद्यैव त्वदृतेऽस्य" (भा० १०।१४।१८) इत्यादौ ।
"अहो भाग्यमहो भाग्यम्" (भा० १०।१४।३२) इत्यादौ च ।
अत एवोक्तम् "गूढं परं ब्रह्म मनुष्यलिङ्गम्" (भा० ७।१५।७५) इति । वैष्णवे च (वि० पु० ४।११।२) —

यदोर्वंशं नरः श्रुत्वा सर्वपापैः प्रमुच्यते ।
यत्रावतीर्णं कृष्णाख्यं परं ब्रह्म नराकृति ॥ २२९ ॥ इति ।

"नराकृति परं ब्रह्म" इति बृहत्सहस्रनामस्तोत्रे च ।
एतेन श्रीकृष्णस्य नराकृतित्वमेवेति । द्विभुजत्व एव श्रीकृष्णत्वं नराकृतिकैवल्यान् मुख्यम् । चतुर्भुजत्वे तु श्रीकृष्णत्वं नराकृतिभूयिष्ठत्वात् तदनन्तरमेव । अत एव चतुर्भुजत्वेऽपि मनुषरूपत्वं वर्णितं श्रीमदर्जुनेन "तेनैव रूपेण चतुर्भुजेन सहस्रबाहो भव विश्वमूर्ते" (गीता ११।४६) इत्युक्त्वा "दृष्ट्वेदं मानुषं रूपं तव सौम्यं जनार्दन" (गीता ११।५१) इत्युक्तत्वात् । एवञ्जातीयकानि बहूनि वाक्यानि सन्ति, तानि च द्रष्टव्यानि ।

अत एव सा नराकारा मूर्तिरेव परमकारणं वस्तुतत्त्वमित्याह “नारायणे कारणमर्त्यमूर्तौ” (भा० १०।४६।३३) इति ।
सर्वकारणं यत् तत्त्वं तदेव मर्त्याकारा मूर्तिर्यस्य । तदुक्तम् “तत्त्वं परं योगिनाम्” (भा० १०।४३।१७) इति ।
तथा च पाद्मनिर्माणखण्डे श्रीवेदव्यासवाक्यम् —

गोपालमबलासङ्गे मुदितं वेणुवादिनम् ।
दृष्ट्वातिहृष्टो ह्यभवं सर्वभूषणभूषणम् ॥ २३० ॥
ततो मामाह भगवान् वृन्दावनचरः स्मयन् ।
यदिदं मे त्वया दृष्टं रूपं दिव्यं सनातनम् ॥ २३१ ॥
निष्कलं निष्क्रियं शान्तं सच्चिदानन्दविग्रहम् ।
पूर्णं पद्मपलाशाक्षं नातःपरतरं मम ।
इदमेव वदन्त्येते वेदाः कारणकारणम् ॥ २३२ ॥ इत्यादि । उद्धवः श्रीव्रजेश्वरम् ॥

१०५ । अत एव बहूंश्चतुर्भुजान् दृष्टवानपि नराकारस्यैव विशेषतः स्तुत्यर्थं प्रतिजानीते “नौमीड्य तेऽभ्रवपुषे” (भा० १०।१४।१) इत्यादि ।
इदमेव तव परमं तत्त्वमित्यज्ञात्वा पूर्वमहं भ्रान्तवान् । अधुना तु “अद्यैव त्वदृतेऽस्य” (भा० १०।१४।१८) इत्यादिदर्शिकया भवतः कृपया ज्ञातवानित्यत एव तदाकारमेव त्वां लब्ध्युं स्तौमीति तात्पर्यम् ॥ ब्रह्मा श्रीभगवन्तम् ॥

१०६ । तदेवं साधूक्तं तत्तद्वचनमन्यार्थत्वेन दृश्यमिति । तथा हि पूर्वरीत्या चतुर्भुजत्वद्विभुजत्वयोर्द्वयोरपि ध्यानधिष्ण्यत्वे सति यत् पूर्वस्य जनन्या निगूहनप्रार्थनं तत् तु तस्य प्रसिद्धतया सर्व एव ज्ञास्यतीति “जन्म ते मय्यसौ पापो मा विद्यान् मधुसूदन” (भा० १०।३।२९) इत्याद्युक्तलक्षणया कंसभिया
“विश्वं यदेतत् स्वतनौ निशान्ते” (भा० १०।३।३१) इत्याद्युक्तलक्षणया मांसदृक्शब्दोक्तभगवत्स्वरूपशक्तिविलासतत्तज्जन्मादिलीलातत्त्वानभिज्ञप्राकृतदृग्भ्यो लज्जया च ।
न पुनरपरस्य “गूढं परं ब्रह्म मनुष्यलिङ्गम्” (भा० ७।१५।३५) इत्यादौ गूढत्वेन कथितस्य ध्यानधिष्ण्यत्वाभावविवक्षया ।
श्रीगोपालतापनीश्रुतावप्युभयोरपि ध्यानधिष्ण्यत्वं श्रूयते (गो० ता० उ० २।५९-६०) —

मथुरायां विशेषेण मां ध्यायन् मोक्षमश्नुते ।
अष्टपत्रं विकसितं हृत्पद्मं तत्र संस्थितम् ॥ २३३ ॥

इत्यादिषु मध्ये “चतुर्भुजं शङ्खचक्र” (गो० ता० उ० २।६१) इत्यादिकमुक्त्वा सर्वान्ते “वेणुशृङ्गधरं तु वा” (गो० ता० उ० २।६३) इत्यप्युक्तम् । एवमागमेऽपि द्विभुजध्यानं श्रूयते । तस्मान् निगूढत्वविवक्षैव समीचीना ।

तथैव तद्विवक्षया “नान्यथा मद्भवं ज्ञानं मर्त्यलिङ्गेन जायते” (भा० १०।३।४४) इति श्रीभगवतोक्तम् ।
तथा च पाद्मनिर्माणखण्डे श्रीभगवद्वाक्यं व्यासवाक्ये (प० पु० ५।७३।१८–१९) —

पश्य त्वं दर्शयिष्यामि स्वरूपं वेदगोपितम् ।
ततोऽपश्यमहं भूप बालं कालाम्बुदप्रभम् ।
गोपकन्यावृतं गोपं हसन्तं गोपबालकैः ॥ २३४ ॥ इति ।

एवम् “इत्युक्त्वासीद्धरिस्तूष्णीम्” (भा० १०।३।४६) इत्यादौ च व्याख्येयम् ।
आत्ममायया स्वेच्छया “आत्ममाया तदिच्छा स्यात्” इति महासंहितोक्तेः । प्रकृत्या स्वरूपेणैव व्यक्तः प्राकृतः । न त्वौपाधिकतया । शैषिकोऽण् । तत्र हि भगवद्विग्रहे शिशुत्वादयो विचित्रा एव धर्माः स्वाभाविकाः सन्तीति “को वेत्ति भूमन्” (भा० १०।१४।२१) इत्यस्य व्याख्याने (अनु० ३९) द्वितीयसन्दर्भे दर्शितमेव ।
अत्र श्रीरामानुजाचार्यसम्मतिरपि । श्रीगीतासु “प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायया” (गीता ४।६) इत्यत्र स्वमेव स्वभावमास्थाय आत्ममायया स्वसङ्कल्परूपेण ज्ञानेनेत्यर्थः । “माया वयूनं ज्ञानम्” इति नैघण्टुकाः ।
महाभारते च अवताररूपस्याप्यप्राकृतत्वमुच्यते “न भूतसङ्घसंस्थानो देहोऽस्य परमात्मनः” इति ।
अथो बृहद्वैष्णवेऽपि —

यो वेत्ति भौतिकं देहं कृष्णस्य परमात्मनः ।
स सर्वस्माद् बहिष्कार्यः श्रौतस्मार्तविधानतः ॥ २३५ ॥
मुखं तस्यावलोक्यापि सचैलं स्नानमाचरेत् ।
पश्येत् सूर्यं स्पृशेद् गां च घृतं प्राश्य विशुद्ध्यति ॥ २३६ ॥ इति ।

अथ “ययाहरद् भुवो भारम्” (भा० १।१५।३४) इत्यादौ चैवं मन्तव्यम् ।
तनुरूपकलेवरशब्दैरत्र श्रीभगवतो भूभारजिहीर्षालक्षणो देवादिपिपालयिषालक्षणश्च भाव एवोच्यते । यथा तृतीये विंशतितमे तत्तच्छब्दैर्ब्रह्मणो भाव एवोक्तः । यदि तत्रैव तथा व्याख्येयं तदा सुतरामेव श्रीभगवतीति ।
ततश्च तस्य भावस्य भगवति तदाभासरूपत्वात् कण्टकदृष्टान्तः सुसङ्गत एव । तथा द्वयमेवेशितुः साम्यमपि । तत् तु तृतीयसन्दर्भ एव विवृतम् । “मत्स्यादिरूपाणि” (भा० १।१५।३५) मत्स्याद्यवतारेषु तत्तद्भावान् ।
अथ नटदृष्टान्तेऽपि नटः श्रव्यकाव्यरूपकाभिनेता । व्याख्यातं च टीकाकृद्भिः प्रथमस्यैकादशे “नटा नवरसाभिनयचतुराः” (भा० दी० १।११।२१) इति । ततो यथा श्रव्यरूपकाभिनेता नटः स्वरूपेण स्ववेशेन च स्थित एव पूर्ववृत्तमभिनयेन गायन् नायकनायिकादिभावं धत्ते जहाति च तथेति । अत एव तृतीये (भा० ३।२।११) —

प्रदर्श्यातप्ततपसामवितृप्तदृशां नृणाम् ।
आदायान्तरधाद् यस्तु स्वबिम्बं लोकलोचनम् ॥ २३७ ॥

इत्यत्रापि लोकलोचनरूपं स्वबिम्बं निजमूर्तिं प्रदर्श्य पुनरादायैव च अन्तरधात् न तु त्यक्त्वेत्युक्तम् ।
श्रीसूतेन "यथा मत्स्यादिरूपाणि" (भा० १।१५।३५) इत्यनन्तरमपि तथोक्तम् "यदा मुकुन्दो भगवानिमां महीं जहौ स्वतन्वा" (भा० १।१५।३६) इति ।
त्यागोऽत्र स्वतनुकरणक इति न तु स्वतन्वा सहेति व्याख्येयम् सहेत्यध्याहार्यापेक्षागौरवात् "उपपदविभक्तेः कारकविभक्तिर्बलीयसी" इति न्यायाच्च ।
अथवा "नाहं प्रकाशः सर्वस्य योगमायासमावृतः" (गीता ७।२५) इति श्रीगीतावचनेन ।
प० पु० ६।२३८।८३—

योगिभिर्दृश्यते भक्त्या नाभक्त्या दृश्यते क्वचित् ।
द्रष्टुं न शक्यो रोषाच्च मत्सराच्च जनार्दनः ॥ २३८ ॥

इति पाद्मोत्तरखण्डनिर्णयेन ।
"मल्लानामशनिः" (भा० १०।४३।१७) इति श्रीभागवतदर्शनेन ।
"आत्मविनाशाय भगवदस्तचक्रांशुमालोज्ज्वलमक्षयतेजःस्वरूपं परमब्रह्मभूतमपगतद्वेषादिदोषो भगवन्तमद्राक्षीत्" (वि० पु० ४।१५।१५) इति शिशुपालमुद्दिश्य विष्णुपुराणगद्येन चासुरेषु यद् रूपं स्फुरति तत् तस्य स्वरूपं न भवति किन्तु मायाकल्पितमेव । स्वरूपे दृष्टे द्वेषश्चापयातीति ततश्चासुरेषु स्फुरत्या यया तन्वा भुवो भाररूपमसुरवृन्दमहरत् तां तनुं विजहौ । पुनस्तत्प्रत्यायनं न चकारेत्यर्थः ।
भक्तिदृश्या तनुस्तु तस्य नित्यसिद्धैवेत्याह "अजः" इति । "देवक्यां देवरूपिण्याम्" (भा० १०।३।८) इत्यादेः । "कृष्णं च तत्र छन्दोभिः स्तूयमानम्" (भा० १०।२८।१७) इत्यत्र गोलोकाधिष्ठातृत्वनिर्देशाच्च ।
ततश्च "यथा मत्स्यादिरूपाणि" इत्यस्याप्ययमेवार्थः—यथा नट ऐन्द्रजालिकः कश्चित् स्वभक्षकानां बकादीनां निग्रहाय मत्स्याद्याकारान् धत्ते स्वस्मिन् प्रत्याययति तन्निग्रहे सति यथा च तानि जहाति तथा सोऽयमजोऽपि येन मायित्वेन लक्ष्यतां प्रापितेन रूपेण भूभाररूपासुरवर्गः क्षपितः । तद्वर्गं क्षपितवानित्यर्थः । तच्च कलेवरमजो जहौ अन्तर्धापितवानित्यर्थः ।
किन्तु श्रीगीतापद्ये "योगमायासमावृतः" (गीता ७।२५) सर्पकञ्चुकवन्मायारचितवपुराभाससमावृत इत्यर्थः ।
विष्णुपुराणगद्ये "आत्मविनाशाय" इति आत्मनः स्वस्य शिशुपालस्येत्यर्थः । भगवता अस्तं क्षिप्तं यच् चक्रं तस्यांशुमालया उज्ज्वलं यथा स्यात् तथाद्राक्षीत् । यतः "अपगतद्वेषादिदोषः" इति । तया तस्य दृष्टावुज्ज्वलायां सत्यामपगतद्वेषादिदोषः सन् दूरीकृतमायिकनिजावरणं भगवन्तमद्राक्षीदित्यर्थः ।

किं च तन्मते कल्पान्तरगततत्कथायां शिशुपालादिद्वयमुक्तिविषयकमैत्रेयपराशरप्रश्नोत्तररीत्या जयविजययोः शापसङ्गतिर्नास्तीत्यन्यावेव तावसुरौ ज्ञेयौ । युक्तं च तत् प्रतिकल्पं तयोः शापकदर्थनाया अयुक्तत्वात् ॥

अथ “सूतीगृहे” (भा० १०।८५।२०) इत्यस्यार्थः — एतत्प्राक्तनवाक्येषु श्रीभगवन्महिमज्ञानभक्तिप्रधानोऽसौ विशुद्धसत्त्वप्रादुर्भावस्यात्मनो मनुष्यलीलामेव दैन्यातिशयतः प्राकृतमानुषत्वेन स्थापयित्वा श्रीभगवत्यपत्यबुद्धिमाक्षिप्तवान् । ततश्च ननु तर्हि कथमपत्यबुद्धिं कुरुष इति भगवत्प्रश्नमाशङ्क्य तत्र तद्वाक्यगौरवमेव मम प्रमाणं न तूपपत्तिरित्याह “सूतीगृहे” इति ।

नौ आवयोरनुयुगम् । अत एव भवानजोऽपि सञ्जज्ञे अवतीर्णवानिति सूतीगृहे भवाननुजगाद ।

ननु मया तदपि भवदादितनुप्रवेशनिर्गमापेक्षयैव सञ्जज्ञ इत्युक्तं न तु मम प्रवेशनिर्गमलिङ्गेनैव जन्म वाच्यम् । जीवसखेन व्यष्टेः समष्टेर्वान्तर्यामिरूपेण “तं दुर्दशं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम्” (कठ १।२।१२) इत्यादौ ।

“तत् सृष्ट्वा तदेवानुप्राविशत्” (तै० २।६।२) इत्यादौ च तत्तदनुप्रवेशादिदर्शनसामान्यात् । ततस्तद्वदिदमुपचरितमेवेति मन्यताम् ।

तत्राह — नानेति “स्वकृतविचित्रयोनिषु विशन्निव हेतुतया” (भा० १०।८७।१९) इत्यादिश्रवणात् गगनवदसङ्ग एव त्वं यज्जीवानां नानातनूर्विदधत् प्रविशन् जहासि मुहुः प्रविशसि त्यजसि चेत्यर्थः ।

तद्भूम्नस्तव विभूतिविशेषरूपां मायां को वेद बहुमन्यते ? न कोऽपीत्यर्थः । इदं त्वावाभ्यां जन्म सर्वैरेव स्तूयत इति भावः । ततो विद्वदादरोऽप्यत्रास्तु प्रमाणं मम तु तत् सर्वथा न बुद्धिगोचर इति व्यञ्जितम् ।

अत्र विदधातेः प्रवेशार्थो नानुपपन्नः । यथोक्तं सहस्रनामभाष्ये “शिष्टान् करोति पालयति” इति । सामान्यवचनो धातुर्विशेषवचने दृष्टः । कुरु काष्ठानीत्याहरणे तथा तद्वदिति ।

तदेवं श्रीकृष्णस्य स्वयं भगवत्त्वम् । तस्यैव नराकृतिपरब्रह्मणो नित्यमेव तद्रूपेणावस्थायित्वं दर्शितम् । तथा प्रथमे पृथिव्यापि “सत्यं शौचं दया क्षान्तिः” (भा० १।१६।२७) इत्यादिना तदीयानां कान्तिसहओजोबलानां स्वाभाविकत्वमव्यभिचारित्वं च दर्शितम् । अत एव ब्रह्माण्डे चाष्टोत्तरशतनामस्तोत्रे नराकृतित्वं प्रकृत्यैवोक्तम् —

> नन्दव्रजजनानन्दी सच्चिदानन्दविग्रहः ।
> नवनीतविलिप्ताङ्गो नवनीतनटोऽनघः ॥ २३९ ॥ इति ।

श्रीगोपालपूर्वतापन्यामपि तथैव (गो० ता० उ० १।२२) —

> नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् ।
> तं पीठगं येऽनुभजन्ति धीरास्तेषां सिद्धिः शाश्वती नेतरेषाम् ॥ २४० ॥ इति ।

“तमेकं गोविन्दं सच्चिदानन्दविग्रहम्” (गो० ता० उ० १।३५) इत्यादि च ।

तस्माच् चतुर्भुजत्वे च द्विभुजत्वे च श्रीकृष्णत्वस्याव्यभिचारित्वमेवेति सिद्धम् ।
अथ कतमत् तत्पदं यत्रासौ विहरति ? तत्रोच्यते —

या यथा भुवि वर्तन्ते पुर्यो भगवतः प्रियाः ।
तास्तथा सन्ति वैकुण्ठे तत्तल्लीलार्थमादृताः ॥ २४१ ॥

इति स्कान्दवचनानुसारेण वैकुण्ठे यद् यत् स्थानं वर्तते तत् तदेवेति मन्तव्यम् ।
तच् चाखिलवैकुण्ठोपरिभाग एव । यतः पाद्मोत्तरखण्डे दशावतारगणने श्रीकृष्णमेव नवमत्वेन वर्णयित्वा क्रमेण पूर्वादिषु तद्दशावतारस्थानानां परमव्योमाभिधवैकुण्ठस्यावरणत्वेन गणनया श्रीकृष्णलोकस्य ब्रह्मदिशि प्राप्ते सर्वोपरिस्थायित्वमेव पर्यवसायितम् । आगमादौ हि दिक्क्रमस्तथैव दृश्यते । अत्रास्माभिस्तु तत्तच्छ्रवणात् ।
श्रीकृष्णलोकस्य स्वतन्त्रैवावस्थितिः । किन्तु परमव्योमपक्षपातित्वेनैव पाद्मोत्तरखण्डे तदावरणेषु प्रवेशितोऽसाविति मन्तव्यम् । पाद्मोत्तरखण्डप्रतिपाद्यस्य गौणत्वं तु श्रीभागवतप्रतिपाद्यापेक्षया वर्णितमेव ।
स्वायम्भुवागमे स्वतन्त्रतयैव सर्वोपरि तत्स्थानमुक्तम् । यथा ईश्वरदेवीसंवादे चतुर्दशाक्षरध्यानप्रसङ्गे पञ्चाशीतितमे पटले —

ध्यायेत् तत्र विशुद्धात्मा इदं सर्वं क्रमेण तु ।
नानाकल्पलताकीर्णं वैकुण्ठं व्यापकं स्मरेत् ॥ २४२ ॥
अधःसाम्यं गुणानां च प्रकृतिं सर्वकारणम् ।
प्रकृतेः कारणान्येव गुणांश्च क्रमशः पृथक् ॥ २४३ ॥
ततस्तु ब्रह्मणो लोकं ब्रह्मचिह्नं स्मरेत् सुधीः ।
ऊर्ध्वं तु सीम्नि विरजां निःसीमां वरवर्णिनि ॥ २४४ ॥
वेदाङ्गस्वेदजनिततोयः प्रस्राविताां शुभाम् ।
इमाश्च देवता ध्येया विरजायां यथाक्रमम् ॥ २४५ ॥

इत्याद्यनन्तरम् —

ततो निर्वाणपदवीं मुनीनामूर्ध्वरेतसाम् ।
स्मरेत् तु परमव्योम यत्र देवाः सनातनाः ॥ २४६ ॥
ततोऽनिरुद्धलोकं च प्रद्युम्नस्य यथाक्रमम् ।
सङ्कर्षणस्य च तथा वासुदेवस्य च स्मरेत् ॥ २४७ ॥

“लोकाधिपान् स्मरेत्” ।
इत्याद्यनन्तरं च —

पीयूषलतिकाकीर्णां नानासत्त्वनिषेविताम् ।
सर्वर्तुसुखदां स्वच्छां सर्वजन्तुसुखावहाम् ॥ २४८ ॥
नीलोत्पलदलश्यामां वायुना चालितां मृदु ।
वृन्दावनपरागैस्तु वासितां कृष्णवल्लभाम् ॥ २४९ ॥
सीम्नि कुञ्जतटां योषित्क्रीडामण्डपमध्यमाम् ।
कालिन्दीं संस्मरेद् धीमान् सुवर्णतटपङ्कजाम् ॥ २५० ॥
नित्यनूतनपुष्पादिरञ्जितं सुखसङ्कुलम् ।
स्वात्मानन्दसुखोत्कर्षशब्दादिविषयात्मकम् ॥ २५१ ॥
नानाचित्रविहङ्गादिध्वनिभिः परिरम्भितम् ।
नानारत्नलताशोभिमत्तालिध्वनिमन्द्रितम् ॥ २५२ ॥
चिन्तामणिपरिच्छिन्नं ज्योत्स्नाजालसमाकुलम् ।
सर्वर्तुफलपुष्पाढ्यं प्रवालैः शोभितं परि ॥ २५३ ॥
कालिन्दीजलसंसर्गवायुना कम्पितं मुहुः ।
वृन्दावनं कुसुमितं नानावृक्षविहङ्गमैः ॥ २५४ ॥
संस्मरेत् साधको धीमान् विलासैकनिकेतनम् ।
एकीभावो द्वयोर्यत्र वृक्षयोर्मध्यदेशतः ॥ २५५ ॥
तदधश्चिन्तयेद् देवि मणिमण्डपमुत्तमम् ।
त्रिलोकीसुखसर्वस्वं सुयन्त्रं केलिवल्लभम् ॥ २५६ ॥
तत्र सिंहासने रम्ये नानारत्नमये सुखे ।
सुमनोऽधिकमाधुर्यकोमले सुखसंस्तरे ॥ २५७ ॥
धर्मार्थकाममोक्षाख्यचतुष्पादैर्विराजिते ।
ब्रह्मविष्णुमहेशानां शिरोभूषणभूषिते ॥ २५८ ॥
तत्र प्रेमभराक्रान्तं किशोरं पीतवाससम् ।
कलायकुसुमश्यामं लावण्यैकनिकेतनम् ॥ २५९ ॥
लीलारससुखाम्भोधिसम्मग्नं सुखसागरम् ।
नवीननीरदाभासं चन्द्रिकाञ्चितकुन्तलम् ॥ २६० ॥ इत्यादि ।

मृत्युञ्जयतन्त्रे च —

ब्रह्माण्डस्योर्ध्वतो देवि ब्रह्मणः सदनं महत् ।
तदूर्ध्वं देवि विष्णूनां तदूर्ध्वं रुद्ररूपिणाम् ॥ २६१ ॥
तदूर्ध्वं च महाविष्णोर्महादेव्यास्तदूर्ध्वगम् ।
कालातिकालयोश्चाथ परमानन्दयोस्ततः ॥ २६२ ॥
पारे पुरी महादेव्याः कालः सर्वभयावहः ।
ततः श्रीरत्नपीयूषवारिधिर्नित्यनूतनः ॥ २६३ ॥
तस्य तीरे महाकालः सर्वग्राहकरूपधृक् ।

तस्योत्तरे समुद्भासी रत्नद्वीपः शिवाह्वयः ॥ २६४ ॥
उद्यच्चन्द्रोदयः क्षुब्धरत्नपीयूषवारिधेः ।
मध्ये हेममयीं भूमिं स्मरेन् माणिक्यमण्डिताम् ॥ २६५ ॥
षोडशद्वीपसंयुक्तां कलाकौशलमण्डिताम् ।
वृन्दावनसमूहैश्च मण्डितां परितः शुभैः ॥ २६६ ॥
तन्मध्ये नन्दनोद्यानं मदनोन्मादनं महत् ।
अनल्पकोटिकल्पद्रुवाटीभिः परिवेष्टितम् ॥ २६७ ॥ इत्यादि ।
तन्मध्ये विपुलां ध्यायेद् वेदिकां शतयोजनाम् ।
सहस्रादित्यसङ्काशाम् ॥ २६८ ॥ इत्यादि ।
तस्यान्तरे महापीठं महाचक्रसमन्वितम् ।
तन्मध्ये मण्डपं ध्यायेद् व्याप्तब्रह्माण्डमण्डलम् ॥ २६९ ॥ इत्यादि ।
ध्यायेत् तत्र महादेवीं स्वयमेव तथाविधः ।
रक्तपद्मनिभां देवीं बालार्ककिरणोपमाम् ॥ २७० ॥ इत्यादि ।
पीतवस्त्रपरिधानां वंशयुक्तकराम्बुजाम् ।
कौस्तुभोद्दीप्तहृदयां वनमालाविभूषिताम् ।
श्रीमत्कृष्णाङ्कपर्यङ्कनिलयां परमेश्वरीम् ॥ २७१ ॥ इत्यादि ।
इति ध्यात्वा तथा भूत्वा तस्या एव प्रसादतः ।
तदाज्ञया परानन्दमेत्यानन्दकलावृतम् ॥ २७२ ॥
तदाकर्णय देवेशि कथयामि तवानघे ।
एतदन्तर्महेशानि श्वेतद्वीपमनुत्तमम् ॥ २७३ ॥
क्षीराम्भोनिधिमध्यस्थं निरन्तरसुरद्रुमम् ।
उद्यदर्धेन्दुकिरणदूरीकृततमोभरम् ॥ २७४ ॥
कालमेघसमालोकनृत्यद्बर्हिकदम्बकम् ।
कूजत्कोकिलसङ्घेन वाचालितजगत्त्रयम् ॥ २७५ ॥
नानाकुसुमसौगन्ध्यवाहिगन्धवहान्वितम् ।
कल्पवल्लीनिकुञ्जेषु गुञ्जद्भृङ्गगणान्वितम् ॥ २७६ ॥
रम्यावाससहस्रेण विराजितनभस्तलम् ।
रम्यनारीसहस्रौघैर्गायद्भिः समलङ्कृतम् ॥ २७७ ॥
गोवर्धनेन महता रम्यावासविनोदिना ।
शोभितं शुभचिह्नेन मानदण्डेन चापरम् ॥ २७८ ॥
अवाचीप्राच्युदीच्याशाः क्रमायतविवृद्धया ।
व्याप्ता यमुनया देव्या नीलमेघाम्बुशोभया ।
तन्मध्ये स्फटिकमयं भवनं महदद्भुतम् ॥ २७९ ॥ इत्यादि ।
तत्तदन्तर्महाकल्पमन्दारादिद्रुमैर्वृतम् ।
तत्तन्मध्ये समुद्भासिवृन्दावनकुलाकुलम् ॥ २८० ॥ इत्यादि ।
कुत्रचिद् रत्नभवनं कुत्रचित् स्फटिकालयम् ॥ २८१ ॥ इत्यादि ।

> गोपगोपैरसङ्घातैः सर्वतः समलङ्कृतम् ।
> विपापं विलयं रम्यं सदा षडूर्मिवर्जितम् ॥ २८२ ॥ इत्यादि ।
> तस्य मध्ये मणिमयं मण्डपं तोरणान्वितम् ।
> तन्मध्ये गरुडोद्वाहिमहामणिमयासनम् ॥ २८३ ॥ इत्यादि ।
> कल्पवृक्षसमुद्भासिरत्नभूधरमस्तके ।
> ध्यायेत् तत्र परमानन्दं रमोपास्यं परं महः ॥ २८४ ॥
> स्मरेद् वृन्दावने रम्ये मोहयन्तमनारतम् ।
> वल्लवीवल्लभं कृष्णं गोपकन्याः सहस्रशः ॥ २८५ ॥ इत्यादि ।

"फुल्लेन्दीवरकान्तिमिन्दुवदनम्" (श्रीपद्यावली ४६) इत्यादि च ।
एतदनन्तरं नित्यानित्यलोकविवेके देव्या पृष्टे श्रीशिव आह—

> श्रृणु देवि महामाये यन्नित्यं यदनित्यकम् ।
> ब्रह्मादीनां च सर्वेषां भवनानां च पार्वति ।
> विनाशोऽस्तीह सर्वेषां विना तद्भवनं तयोः ॥ २८६ ॥ इति ।

पूर्वोक्तयोः श्रीभगवन्महादेव्योरित्यर्थः ।
तस्मात् "या यथा भुवि वर्तन्ते" इति न्यायाच्च स्वतन्त्र एव द्वारकामथुरागोकुलात्मकः श्रीकृष्णलोकः स्वयं भगवतो विहारास्पदत्वेन भवति सर्वोपरीति सिद्धम् । अत एव वृन्दावनगोकुलमेव सर्वोपरिविराजमानं गोलोकत्वेन प्रसिद्धम् ।
ब्रह्मसंहितायाम् "ईश्वरः परमः कृष्णः" (ब्र० सं० ५।१) इत्युपक्रम्य (ब्र० सं० ५।२-९)—

> सहस्रपत्रकमलं गोकुलाख्यं महत् पदम् ।
> तत्कर्णिकारं तद्धाम तदनन्तांशसम्भवम् ॥ २८७ ॥
> कर्णिकारं महद् यन्त्रं षट्कोणं वज्रकीलकम् ।
> षडङ्गषट्पदीस्थानं प्रकृत्या पुरुषेण च ॥ २८८ ॥
> प्रेमानन्दमहानन्दरसेनावस्थितं हि यत् ।
> ज्योतीरूपेण मनुना कामबीजेन सङ्गतम् ॥ २८९ ॥
> तत्किञ्जल्कं तदंशानां तत्पत्राणि श्रियामपि ॥ २९० ॥
> चतुरस्रं तत्परितः श्वेतद्वीपाख्यमद्भुतम् ।
> चतुरस्रं चतुर्मूर्तेश्चतुर्धाम चतुष्कृतम् ॥ २९१ ॥
> चतुर्भिः पुरुषार्थैश्च चतुर्भिर्हेतुभिर्वृतम् ।
> शूलैर्दशभिरानद्धमूर्ध्वाधो दिग्विदिक्ष्वपि ॥ २९२ ॥
> अष्टभिर्निधिभिर्जुष्टमष्टभिः सिद्धिभिस्तथा ।
> मनुरूपैश्च दशभिर्दिक्पालैः परितो वृतम् ॥ २९३ ॥
> श्यामैर्गौरैश्च रक्तैश्च शुक्लैश्च पार्षदर्षभैः ।
> शोभितं शक्तिभिस्ताभिरद्भुताभिः समन्ततः ॥ २९४ ॥ इति ।

तत्राग्रे ब्रह्मस्तवे “चिन्तामणिप्रकरसद्मसु कल्पवृक्षलक्षावृतेषु सुरभीरभिपालयन्तम्” (ब्र० सं० ५।४०)
इत्युपक्रम्य (ब्र० सं० ५।५४) —

> गोलोक नाम्नि निज धाम्नि तले च तस्य देवीमहेशहरिधामसु तेषु तेषु ।
> ते ते प्रभावनिचया विहिताश्च येन गोविन्दमादि पुरुषं तमहं भजामि ॥ २९५ ॥
> इति ।

व्याख्यामाह — सहस्राणि पत्राणि यत्र तत् कमलं चिन्तामणिमयं पद्मं तद्रूपम् । तच्च महत् सर्वोत्कृष्टं पदं महतो महाभगवतो वा पदं श्रीमहावैकुण्ठमित्यर्थः ।

तत् तु नानाप्रकारमित्याशङ्क्य प्रकारविशेषत्वेण निश्चिनोति — गोकुलाख्यमिति । गोकुलमित्याख्या रूढिर्यस्य तत् गोगोपालसरूपमित्यर्थः । “रूढिर्योगमपहरति” इति न्यायेन तस्यैव प्रतीतेः । तत एतदनुगुणत्वेनैवोत्तरग्रन्थोऽपि व्याख्येयः ।

तस्य श्रीकृष्णस्य धाम श्रीनन्दयशोदादिभिः सह वासयोग्यं महान्तःपुरम् । तस्य स्वरूपमाह — तदिति । अनन्तस्य श्रीबलदेवस्यांशात् सम्भवो नित्याविर्भावो यस्य तत् । तथा तन्त्रेणैतदपि बोध्यते । अनन्तोऽंशो यस्य तस्य श्रीबलदेवस्यापि सम्भवो निवासो यत्र तदिति ।

सर्वमन्त्रगणसेवितस्य श्रीमदष्टादशाक्षराख्यमहामन्त्रराजस्य बहुपीठस्य मुख्यं पीठमिदमेवेत्याह “कर्णिकारम्” इति द्वयेन । “महद् यन्त्रम्” इति यत्प्रतिकृतिरेव सर्वत्र यन्त्रत्वेन पूजार्थं लिख्यत इत्यर्थः ।

यन्त्रत्वम् दर्शयति — षट्कोणा अभ्यन्तरे यस्य तद् “वज्रकीलकम्” कर्णिकारे बीजरूपहीरककीलकशोभितम् । षट्कोणत्वे प्रयोजनमाह — षटङ्गानि यस्याः सा या षट्पदी श्रीमदष्टादशाक्षरी तस्याः स्थानम् ।

प्रकृतिर्मन्त्रस्य स्वरूपं स्वयमेव श्रीकृष्णः कारणरूपत्वात् । पुरुषश्च स एव तदधिष्ठातृदेवतारूपः । ताभ्यामवस्थितमधिष्ठितम् । ऋष्यादिस्मरणे हि तथा प्रसिद्धम् । किं च द्वयोरपि विशेषणं प्रेमेति । प्रेमरूपा ये आनन्दा महानन्दरसास्तत्परिपाकभेदास्तदात्मकेन ।

तथा ज्योतीरूपेण स्वप्रकाशेन मनुना मन्त्ररूपेण च । कामबीजेनावस्थितमिति मूलमन्त्रान्तर्गतत्वेऽपि पृथगुक्तिः कुत्रचित् स्वातन्त्र्यापेक्षया ।

तदेवं तद्धामोक्त्वा तदावरणान्याह — तदिति । तस्य कर्णिकारस्य किञ्जल्कं किञ्जल्कास्तल्लग्नाभ्यन्तरवलय इत्यर्थः । तदंशानां तस्मिन्नंशो दायो विद्यते येषां तेषां सजातीयानां धामेत्यर्थः । गोकुलाख्यमित्युक्तेरेव तेषां तज्जातीयत्वमेवोक्तं श्रीशुकेन च (भा० १०।३६।१५) —

> एवं ककुद्मिनं हत्वा स्तूयमानः स्वजातिभिः ।
> विवेश गोष्ठं सबलो गोपीनां नयनोत्सवः ॥ २९६ ॥ इति ।

तस्य कमलस्य पत्राणि श्रियां तत्प्रेयसीनां श्रीराधादीनामुपवनरूपाणि धामानीत्यर्थः । अत्र पत्राणामुच्छ्रितप्रान्तानां मूलसन्धिषु वर्त्मानि । अग्रिमसन्धिषु गोष्ठानि ज्ञेयानि । अखण्डकमलस्य गोकुलाख्यत्वात् तथैव समावेशाच्च ।
अथ गोकुलावरणान्याह "चतुरस्रम्" इति । तस्य गोकुलस्य बहिः सर्वतश्चतुरस्रं चतुष्कोणात्मकं स्थानं श्वेतद्वीपाख्यम् । तदंशे गोकुलमिति नामविशेषाभावात् । किन्तु चतुरस्राभ्यन्तरमण्डलं वृन्दावनाख्यं बहिर्मण्डलं केवलं श्वेतद्वीपाख्यं ज्ञेयम् । गोलोक इति यत्पर्यायः । तदेतदुपलक्षणं गोलोकाख्यं चेत्यर्थः । यद्यपि गोकुलेऽपि श्वेतद्वीपत्वमस्त्येव तदवान्तरभूमिमयत्वात् तथापि विशेषनाम्नाम्नातत्वात् तेनैव तत् प्रतीयत इति तथोक्तम् । किन्तु चतुरस्रेऽप्यन्तर्मण्डलं श्रीवृन्दावनाख्यम्, ज्ञेयं बृहद्वामनस्वायम्भुवागमयोस्तथा दृष्टत्वात् ।
चतुर्मूर्तेश्चतुर्व्यूहस्य श्रीवासुदेवादिचतुष्टयस्य चतुष्कृतं चतुर्धा विभक्तं चतुर्धाम । किन्तु देवलीलत्वात् तदुपरि व्योमयानस्था एव ते ज्ञेयाः ।
हेतुभिः पुरुषार्थसाधनैः । मनुरूपैः स्वस्वमन्त्रात्मकैरिन्द्रादिभिः ।
श्यामैरिति चतुर्भिर्वेदैरित्यर्थः । "कृष्णं च तत्र छन्दोभिः स्तूयमानम् सुविस्मिताः" (भा० १०।२८।१७) इति श्रीदशमोक्तेः । शक्तिभिरिति श्रीविमलादिभिरित्यर्थः ।
इयं च बृहद्वामनपुराणप्रसिद्धिः । यथा श्रीभगवति श्रुतीनां प्रार्थनापूर्वकाणि पद्यानि—

आनन्दरूपमिति यद् विदन्ति हि पुराविदः ।
तद्रूपं दर्शयास्माकं यदि देयो वरो हि नः ॥ २९७ ॥
श्रुत्वैतद् दर्शयामास स्वलोकं प्रकृतेः परम् ।
केवलानुभवानन्दमात्रमक्षरमव्ययम् ॥ २९८ ॥
यत्र वृन्दावनं नाम वनं कामदुघैर्द्रुमैः ।
मनोरमनिकुञ्जाढ्यं सर्वर्तुसुखसंयुतम् ॥ २९९ ॥
यत्र गोवर्धनो नाम सुनिर्झरदरीयुतः ।
रत्नधातुमयः श्रीमान् सुपक्षिगणसङ्कुलः ॥ ३०० ॥
यत्र निर्मलपानीया कालिन्दी सरितां वरा ।
रत्नबद्धोभयतटा हंसपद्मादिसङ्कुला ॥ ३०१ ॥
शश्वद्रासरसोन्मत्तं यत्र गोपीकदम्बकम् ।
तत्कदम्बकमध्यस्थः किशोराकृतिरच्युतः ॥ ३०२ ॥ इति ।

एतदनुसारेण श्रीहरिवंशवचनमप्येव व्याख्येयम् । तद् यथाह शक्रः—

स्वर्गादूर्ध्वं ब्रह्मलोको ब्रह्मर्षिगणसेवितः ।
तत्र सोमगतिश्चैव ज्योतिषां च महात्मनाम् ॥ ३०३ ॥
तस्योपरि गवां लोकः साध्यास्तं पालयन्ति हि ।
स हि सर्वगतः कृष्ण महाकाशगतो महान् ॥ ३०४ ॥

उपर्युपरि तत्रापि गतिस्तव तपोमयी ।
यां न विद्मो वयं सर्वे पृच्छन्तोऽपि पितामहम् ॥ ३०५ ॥
गतिः शमदमाढ्यानां स्वर्गः सुकृतकर्मणाम् ।
ब्राह्म्ये तपसि युक्तानां ब्रह्मलोकः परा गतिः ।
गवामेव तु गोलोको दुरारोहो हि सा गतिः ॥ ३०६ ॥
स तु लोकस्त्वया कृष्ण सीदमानः कृतात्मना ।
धृतो धृतिमता वीर निघ्नतोपद्रवान् गवाम् ॥ ३०७ ॥ इति ।

अस्यार्थः — स्वर्गशब्देन (भा० २।५।४२) —

भूर्लोकः कल्पितः पद्भ्यां भुवर्लोकोऽस्य नाभितः ।
स्वर्लोकः कल्पितो मूर्ध्ना इति वा लोककल्पना ॥ ३०८ ॥

इति द्वितीयोक्तानुसारेण स्वर्लोकमारभ्य सत्यलोकपर्यन्तं लोकपञ्चकमुच्यते । तस्मादूर्ध्वमुपरि ब्रह्मलोको ब्रह्मात्मको लोको वैकुण्ठाख्यः सच्चिदानन्दरूपत्वात् । ब्रह्मणो भगवतो लोक इति वा "ददृशुर्ब्रह्मणो लोकं यत्राक्रूरोऽध्यगात् पुरा" (भा० १०।२८।१६) इति श्रीदशमात् । एवं द्वितीये "मूर्धभिः सत्यलोकस्तु ब्रह्मलोकः सनातनः" (भा० २।५।३९) इति । टीका च "ब्रह्मलोको वैकुण्ठाख्यः । सनातनो नित्यः । न तु सृज्य-प्रपञ्चान्तर्वर्तीत्यर्थः" इत्येषा ।
ब्रह्माणि मूर्तिमन्तो वेदाः । ऋषयश्च श्रीनारदादयः । गणाश्च श्रीगरुडविष्वक्सेनादयः । तैर्निषेवितः ।
एवं नित्याश्रितानुक्त्वा तद्गमनाधिकारिण आह । तत्र ब्रह्मलोके उमया सह वर्तत इति सोमः श्रीशिवस्तस्य गतिः (भा० ४।२४।२९) —

स्वधर्मनिष्ठः शतजन्मभिः पुमान् विरिञ्चतामेति ततः परं हि माम् ।
अव्याकृतं भागवतोऽथ वैष्णवं पदं यथाहं विबुधाः कलात्यये ॥ ३०९ ॥
इति चतुर्थे श्रीरुद्रगीतात् ।

सोमेति "सुपां सुलुक्" इत्यादिना षष्ठ्या लुक् छान्दसः । तत उत्तरत्रापि गतिपदान्वयः । ज्योतिर्ब्रह्म तदैकात्म्यभावानां मुक्तानामित्यर्थः । न तु तादृशानामपि सर्वेषामेवेत्याह — महात्मनां महाशयानां मोक्षनिरादरतया भजतां श्रीसनकादितुल्यानामित्यर्थः (भा० ६।१४।५) —

मुक्तानामपि सिद्धानां नारायणपरायणः ।
सुदुर्लभः प्रशान्तात्मा कोटिष्वपि महामुने ॥ ३१० ॥ इत्यादौ ।

गीता ६।४७ —

> योगिनामपि सर्वेषां मद्गतेनान्तरात्मना ।
> श्रद्धावान् भजते यो मां स मे युक्ततमो मतः ॥ ३११ ॥

इत्यादावपि तेष्वेव महत्त्वपर्यवसनात् ।
तस्य च ब्रह्मलोकस्योपरि सर्वोर्ध्वप्रदेशे गवां लोकः श्रीगोलोक इत्यर्थः । तं च श्रीगोलोकं साध्या अस्माकं प्रापञ्चिकदेवानां प्रसादनीया मूलरूपा नित्यतदीयदेवगणाः पालयन्ति । तत्र दिक्पालत्वेनावरणरूपा वर्तन्ते "ते ह नाकं महिमानः सचन्तः । यत्र पूर्वे साध्याः सन्ति देवाः" (ऋग्वेद १०।९०।१६) इति श्रुतेः ।
प० पु० ६।२२७।७५-६—

> तत्र पूर्वे ये च साध्या विश्वे देवाः सनातनाः ।
> ते ह नाकं महिमानः सचन्तः शुभदर्शनाः ॥ ३१२ ॥

इति महावैकुण्ठवर्णने पाद्मोत्तरखण्डाच्च ।
यद्वा "तद् भूरिभाग्यमिह जन्म किमप्यटव्यां यद् गोकुलेऽपि" (भा० १०।१४।३४) इत्याद्युक्त्यनुसारेण तद्विधपरमभक्तानामपि साध्यास्तादृशसिद्धिप्राप्तये प्रसादनीयाः श्रीगोपगोपीप्रभृतयः । तं पालयन्ति । अधिकृत्य भुञ्जन्ति । हि प्रसिद्धौ ।
स श्रीगोलोकः सर्वगतः श्रीकृष्णवत् सर्वप्रापञ्चिकाप्रापञ्चिकवस्तुव्यापकः । अत एव महान् भगवद्रूप एव "महान्तं विभुमात्मानम्" (कठ १।२।२२) इति श्रुतेः ।
तत्र हेतुः—महाकाशः परमव्योमाख्यं ब्रह्मविशेषणलाभात् "आकाशस्तल्लिङ्गात्" (ब्र० सू० १।१।२२) इति न्यायप्रसिद्धेश्च तद्गतः । ब्रह्माकारोदयानन्तरमेव वैकुण्ठप्राप्तेः । यथा श्रीगोपानां वैकुण्ठदर्शने तैरेव व्याख्यातम् । यथा वा श्रीमदजामिलस्य वैकुण्ठगमनम् ।
यद्वा महाकाशः परमव्योमाख्यो महावैकुण्ठस्तद्गतस्तदूर्ध्वभागे स्थितः । एवमुपर्युपरि सर्वोपर्यपि विराजमाने तत्र श्रीगोलोकेऽपि तव गतिः । नानारूपेण वैकुण्ठादौ क्रीडतस्तव तत्रापि श्रीगोविन्दरूपेण क्रीडा विद्यत इत्यर्थः ।
अत एव सा च गतिः साधारणी न भवति किन्तु तपोमयी अनवच्छिन्नैश्वर्यमयी "परमं यो महत्तपः" इत्यत्र सहस्रनामभाष्येऽपि तपःशब्देन तथैव व्याख्यातम् । अत एव ब्रह्मादिदुर्वितर्क्यत्वमप्याह—यामिति ।
अधुना तस्य श्रीगोलोकेत्याख्याबीजमभिव्यञ्जयति—गतिरिति । ब्राह्म्ये ब्रह्मलोकप्रापके तपसि विष्णुविषयकमनः प्रणिधाने युक्तानां रतचित्तानां प्रेमभक्तानामित्यर्थः । ब्रह्मलोको वैकुण्ठलोकः । परा प्रकृत्यतीता ।
गवाम् "मोचयन् व्रजगवां दिनतापम्" (भा० १०।३५।२५) इत्युक्तानुसारेण तत्रैव "निघ्नतोपद्रवान् गवाम्" इत्युक्त्या च गोकुलवासिमात्राणां स्वतस्तद्भावभावितानां च साधनवशेनेत्यर्थः । अत एव तद्भावस्यासुलभत्वाद् दुरारोहा ।
तदेवं गोलोकं वर्णयित्वा तस्य गोकुलेन सहाभेदमाह—स त्विति । स तु स एव लोको गोलोको धृतो रक्षितो गोवर्धनोद्धरणेन । यथा मृत्युञ्जयतन्त्रे—

एकदा सान्तरीक्षाच्च वैकुण्ठं स्वेच्छया भुवि ।
गोकुलत्वेन संस्थाप्य गोपीमयमहोत्सवा ।
भक्तिरूपा सतां भक्तिमुत्पादितवती भृशम् ॥ ३१३ ॥ इति ।

अत्र शब्दसाम्यभ्रमप्रतीतार्थान्तरे "स्वर्गादूर्ध्वं ब्रह्मलोकः" इत्ययुक्तम् । लोकत्रयमतिक्रम्योक्तेः । तथा सोमगतिरित्यादिकं न सम्भवति । यतो ध्रुवलोकादधस्तादेव चन्द्रसूर्यादीनां गतिर्महर्लोकेऽपि न वर्तते ।
तथावरसाध्यगणानां तुच्छत्वात् सत्यलोकस्यापि पालनं नोपयुज्यते कुतस्तदुपरिलोकस्य श्रीगोलोकाख्यस्य तथा सर्वगतत्वं चासम्भाव्यं स्यात् ? अत एव तत्रापि तव गतिरित्यपि शब्दो विस्मये प्रयुक्तः । "यां न विद्मः" इत्यादिकं च । अन्यथा तथोक्तिर्न सम्भवति, स्वेषां ब्रह्मणश्च तदज्ञानज्ञापनात् । तस्मात् प्राकृतगोलोकादन्य एवासौ सनातनो गोलोको ब्रह्मसंहितावत् श्रीहरिवंशेऽपि परोक्षवादेन निरूपितः ।
एवं च नारदपञ्चरात्रे विजयाख्याने —

तत् सर्वोपरि गोलोके श्रीगोविन्दः सदा स्वयम् ।
विहरेत् परमानन्दी गोपीगोकुलनायकः ॥ ३१४ ॥ इति ।

एवं चोक्तं मोक्षधर्मे नारायणीये तथा स्कान्दे च —

एवं बहुविधै रूपैश्चरामीह वसुन्धराम् ।
ब्रह्मलोकं च कौन्तेय गोलोकं च सनातनम् ॥ ३१५ ॥ इति ।

तदेवं सर्वोपरि श्रीकृष्णलोकोऽस्तीति सिद्धम् । स च लोकस्तत्तल्लीलापरिकरभेदेनांशभेदात् द्वारकामथुरागोकुलाख्यस्थानत्रयात्मक इति निर्णीतम् । अन्यत्र तु भुवि प्रसिद्धान्येव तत्तदाख्यानि स्थानानि तद्रूपत्वेन श्रूयन्ते । तेषामपि वैकुण्ठान्तरवत् प्रपञ्चातीतत्वनित्यत्वालौकिकरूपत्वभगवन्नित्यास्पदत्वकथनात् ।
तत्र द्वारकायास्तत्तद्विष्णुपुराणादिवचनैरुदाहरिष्यते । इयं च श्रुतिरुदाहरणीया —

अन्तःसमुद्रे मनसा चरन्तं ब्रह्मान्वविन्दन् दशहोतारमर्णे ।
समुद्रेऽन्तः कवयो विचक्षते मरीचीनां पदमन्विच्छन्ति वेधसः ॥ ३१६ ॥
इत्याद्या ।

श्रीमथुरायाः प्रपञ्चातीतत्वम् यथा वाराहे "अन्यैव काचित् सा सृष्टिर्विधातुर्व्यतिरेकिणी" इति ।
नित्यत्वमपि यथा पाद्मे पातालखण्डे "ऋषिर्माथुरनामात्र तपः कुर्वति शाश्वते" इति । अत्र मथुरामण्डले शाश्वते नित्ये कुर्वति करोति ।
अलौकिकरूपत्वं यथा आदिवाराहे —

भूर्भुवः स्वस्तलेनापि न पातालतलेऽमलम् ।
नोर्ध्वलोके मया दृष्टं तादृक् क्षेत्रं वसुन्धरे ॥ ३१७ ॥ इति ।

श्रीभगवन्नित्यास्पदत्वं यथा "अहोऽतिधन्या मथुरा यत्र सन्निहितो हरिः" इति ।
न च वक्तव्यमुपासनास्थानमेवेदम् । यतो आदिवाराहे —

मथुरायाः परं क्षेत्रं त्रैलोक्ये न हि विद्यते ।
तस्यां वसाम्यहं देवि मथुरायां तु सर्वदा ॥ ३१८ ॥ इति ।

तत्र वासस्यैव कण्ठोक्तिः । अत्रेदृशं श्रीवराहदेववाक्यमंशांशिनोरैक्यविवक्षयैव न तु तस्यैवासौ निवासः श्रीकृष्णक्षेत्रत्वेनैव प्रसिद्धेः । तथैव पातालखण्डे "अहो मधुपुरी धन्या यत्र तिष्ठति कंसहा" इति ।
वायुपुराणे तु स्वयं साक्षादेवेत्युक्तम् —

चत्वारिंशद् योजनानां ततस्तु मथुरा स्मृता ।
यत्र देवो हरिः साक्षात् स्वयं तिष्ठति कंसहा ॥ ३१९ ॥ इति ।

अत्र साक्षाच्छब्देन सूक्ष्मरूपता । स्वयंशब्देन श्रीमत्प्रतिमारूपता च निषिद्धा । तत इति पूर्वोक्तात् पुष्कराख्यतीर्थादित्यर्थः । "मथुरायाः परं क्षेत्रम्" इत्यनेन वराहवचनेन पूर्यामेव तिष्ठतीत्यपि निरस्तम् ।
अत्र श्रीगोपालतापनीश्रुतिश्च "स होवाच तं हि नारायणो देवः सकाम्या मेरोः शृङ्गे यथा सप्तपूर्यो भवन्ति तथा निष्काम्याः सकाम्याश्च भूगोलचक्रे सप्तपूर्यो भवन्ति । तासां मध्ये साक्षाद् ब्रह्म गोपालपुरी हि" इति । "सकाम्या निष्काम्या देवानां सर्वेषां भूतानां भवति । यथा हि वै सरसि पद्मं तिष्ठति तथा भूम्यां तिष्ठतीति चक्रेण रक्षिता हि वै मथुरा तस्माद् गोपालपुरी हि भवति । बृहद्बृहद्वनं मधोर्मधुवनम्" (गो० ता० उ० २।३०–३१) इत्यादिका ।
पुनश्च "एतैरावृता पुरी भवति तत्र तेष्वेव गहनेष्वेवम्" इत्यादिका ।
तथा "द्वे वने स्तः कृष्णवनं भद्रवनं तयोरन्तर्द्वादशवनानि पुण्यानि पुण्यतमानि तेष्वेव देवास्तिष्ठन्ति सिद्धाः सिद्धिं प्राप्ताः । तत्र रामस्य राममूर्तिः" (गो० ता० उ० २।३४–३५) इत्यादिका ।
तदप्येते श्लोकाः (गो० ता० उ० २।३९–४०) —

प्राप्य मथुरां पुरीं रम्यां सदा ब्रह्मादिसेविताम् ।
शङ्खचक्रगदाशार्ङ्गरक्षितां मुषलादिभिः ॥ ३२० ॥
यत्रासौ संस्थितः कृष्णस्त्रिभिः शक्त्या समाहितः ।
रामानिरुद्धप्रद्युम्नै रुक्मिण्या सहितो विभुः ॥ ३२१ ॥ इति ।

किं तस्य स्थानमिति श्रीगान्धर्व्याः प्रश्नस्योत्तरमिदम् । एवमेव श्रीरघुनाथस्याप्ययोध्यायां श्रूयते । यथा स्कान्दायोध्यामाहात्म्ये स्वर्गद्वारमुद्दिश्य —

चतुर्धा च तनुं कृत्वा देवदेवो हरिः स्वयम् ।
अत्रैव रमते नित्यं भ्रातृभिः सह राघवः ॥ ३२२ ॥ इति ।

अत एव "यत्र यत्र हरेः स्थानं वैकुण्ठं तद् विदुर्बुधाः" इत्यनुसारेण महाभगवतः स्थानत्वात् महावैकुण्ठ एवासौ यतो वैकुण्ठात् तस्य गरीयस्त्वं श्रूयते । यथा पातालखण्डे —

एवं सप्तपुरीणां तु सर्वोत्कृष्टं च माथुरम् ।
श्रूयतां महिमा देवि वैकुण्ठो भुवनोत्तमः ॥ ३२३ ॥ इति ।

आदिवाराहे —

मथुरायां ये वसन्ति विष्णुरूपा हि ते खलु ।
अज्ञानास्तान् न पश्यन्ति पश्यन्ति ज्ञानचक्षुषः ॥ ३२४ ॥ इति ।

अत एव तत्रैव पातालखण्डे "अहो मधुपुरी धन्या वैकुण्ठाच्च गरीयसी" इति ।
अथ श्रीवृन्दावनस्य प्रपञ्चातीतत्वादिकं मथुरामण्डलस्यैव तत्त्वेन सिद्धम् । यथा च श्री-गोविन्दवृन्दावनाख्ये बृहद्गौतमीयतन्त्रे नारदप्रश्नानन्तरं श्रीकृष्णस्योत्तरम् । तत्र प्रश्नः —

किमिदं द्वादशाभिख्यं वृन्दारण्यं विशाम्पते ।
श्रोतुमिच्छामि भगवन् यदि योग्योऽस्मि मे वद ॥ ३२५ ॥

अथोत्तरम् —

इदं वृन्दावनं रम्यं मम धामैव केवलम् ।
अत्र ये पशवः पक्षिवृक्षाः कीटा नरामराः ।
ये वसन्ति ममाधिष्ण्ये मृता यान्ति ममालयम् ॥ ३२६ ॥
अत्र या गोपकन्याश्च निवसन्ति ममालये ।
योगिन्यस्ता मया नित्यं मम सेवापरायणाः ॥ ३२७ ॥
पञ्चयोजनमेवास्ति वनं मे देहरूपकम् ।
कालिन्दीयं सुषुम्नाख्या परमामृतवाहिनी ॥ ३२८ ॥
अत्र देवाश्च भूतानि वर्तन्ते सूक्ष्मरूपतः ।
सर्वदेवमयश्चाहं न त्यजामि वनं क्वचित् ॥ ३२९ ॥
आविर्भावस्तिरोभावो भवेन् मेऽत्र युगे युगे ।
तेजोमयमिदं रम्यमदृश्यं चर्मचक्षुषा ॥ ३३० ॥ इति ।

विशेषतस्तादृगलौकिकरूपत्वभगवन्नित्यधामत्वे तु दिव्यकदम्बाशोकादिवृक्षादीनां हम्बारववेणुवाद्यादीनामप्यद्यापि महाभागवतैः साक्षात्क्रियमानत्वप्रसिद्धेः । यथा वाराहे कालीयह्रदमाहात्म्ये —

तत्रापि महदाश्चर्यं पश्यन्ति पण्डिता जनाः ।
कालीयह्रदपूर्वेण कदम्बो महितो द्रुमः ॥ ३३१ ॥
शतशाखं विशालाक्षि पुण्यं सुरभिगन्धि च ।
स च द्वादशमासानि मनोज्ञः शुभशीतलः ।
पुष्पायति विशालाक्षि प्रभासन्तो दिशो दश ॥ ३३२ ॥ इति ।

शतानां शाखानां समाहारः शतशाखं तद् यत्र वर्तत इत्यर्थः । प्रभासन्तः प्रभासयन्नित्यर्थः । तत्रैव तदीयब्रह्मकुण्डमाहात्म्ये —

तत्राश्चर्यं प्रवक्ष्यामि तच्छृणु त्वं वसुन्धरे ।
लभन्ते मनुजाः सिद्धिं मम कर्मपरायणाः ॥ ३३३ ॥
तस्य तत्रोत्तरे पार्श्वेऽशोकवृक्षः सितप्रभः ।
वैशाखस्य तु मासस्य शुक्लपक्षस्य द्वादशी ॥ ३३४ ॥
स पुष्पति च मध्याह्ने मम भक्तसुखावहः ।
न कश्चिदपि जानाति विना भागवतं शुचिम् ॥ ३३५ ॥ इत्यादि ।

द्वादशीति द्वादश्यामित्यर्थः । "सुपां सुलुक्" इत्यादिनैव पूर्वसवर्णः । शुचित्वमत्र तदनन्य-वृत्तित्वम् । अनेन पृथिव्यापि तस्य तस्य तादृशरूपं न ज्ञायत इत्यायातम् । अत एव तदीयतीर्थान्तरमुद्दिश्य यथा चादिवाराहे —

कृष्णक्रीडासेतुबन्धं महापातकनाशनम् ।
वलभीं तत्र क्रीडार्थं कृत्वा देवो गदाधरः ॥ ३३६ ॥
गोपकैः सहितस्तत्र क्षणमेकं दिने दिने ।
तत्रैव रमणार्थं हि नित्यकालं स गच्छति ॥ ३३७ ॥ इति ।

पुनस्तदुद्दिश्य स्कान्दे —

ततो वृन्दावनं पुण्यं वृन्दादेवीसमाश्रितम् ।
हरिणाधिष्ठितं तच्च ब्रह्मरुद्रादिसेवितम् ॥ ३३८ ॥ इति ।

श्रुतिश्च दर्शिता "तमेकं गोविन्दं सच्चिदानन्दविग्रहं पञ्चपदं वृन्दावनसुरभूरुहतलासीनं सततं समरुद्गणोऽहं परमया स्तुत्या तोषयामि" (गो० ता० उ० १।३५) इति ।

एवं पातालखण्डे "यमुनाजलकल्लोले सदा क्रीडति माधवः" इति । यमुनाया जलकल्लोला यत्र एवम्भूते श्रीवृन्दावन इति प्रकरणलब्धम् । तत्राजहल्लक्षणया तीरह्रदावेव गृह्येते । तीरं च वृन्दावनलक्षणं तत्र प्रस्तुतम् । अत एवास्य वृन्दावनस्यावान्तरं गोकुलाख्यं वैकुण्ठमिति श्रीकृष्णोपनिषदि "गोकुलं वनवैकुण्ठम्" इति ।

तस्मान् नित्यधामत्वश्रवणाच्च श्रीमथुरादीनां तत्स्वरूपविभूतित्वमेव "स भगवः कस्मिन् प्रतिष्ठित इति स्वे महिम्नि" इति श्रुतेः । अत एव तापन्याम् "साक्षाद् ब्रह्म गोपालपुरी हि" (गो० ता० उ० २।२६) इति । बृहद्गौतमीयतन्त्रे "तेजोमयमिदं रम्यमदृश्यं चर्मचक्षुषा" इति ।

तदीदृशरूपता काशीमुद्दिश्य ब्रह्मवैवर्ते त्वित्थं समाधीयते । यथा तत्र श्रीविष्णुं प्रति मुनीनां प्रश्नः —

छत्राकारं तु किं ज्योतिर्जलादूर्ध्वं प्रकाशते ।
निमग्नायां धरायां तु न वै मज्जति तत् कथम् ॥ ३३९ ॥
किमेतच्छाश्वतं ब्रह्म वेदान्तशतरूपितम् ।
तापत्रयार्तिदग्धानां जीवनं छत्रतां गतम् ॥ ३४० ॥
दर्शनादेव चास्याथ कृतार्थाः स्मो जगद्गुरो ।
वारं वारं तवाप्यत्र दृष्टिर्लग्ना जनार्दन ।
परमाश्चर्यरूपोऽपि साश्चर्य इव पश्यसि ॥ ३४१ ॥

अथ श्रीविष्णूत्तरम् —

छत्राकारं परं ज्योतिर्दृश्यते गगनेचरम् ।
तत्परं परमं ज्योतिः काशीति प्रथितं क्षितौ ॥ ३४२ ॥
रत्नं सुवर्णे खचितं यथा भवेत् तथा पृथिव्यां खचिता हि काशिका ।
न काशिका भूमिमयी कदाचित् ततो न मज्जेन् मम सद्गतिर्यतः ।
जडेषु सर्वेष्वपि मज्जमानेष्वियं चिदानन्दमयी न मज्जेत् ॥ ३४३ ॥ इत्यादि ।

तथाग्रे च —

चेतनाजडयोरैक्यं यद्वन् नैकस्थयोरपि ।
तथा काशी ब्रह्मरूपा जडा पृथ्वी च सङ्गता ॥ ३४४ ॥
निर्माणं तु जडस्यात्र क्रियते न परात्मनः ।
उद्धरिष्यामि च महीं वाराहं रूपमास्थितः ।
तदा पुनः पृथिव्यां हि काशी स्थास्यति मत्प्रिया ॥ ३४५ ॥ इति ।

चेतनाशब्देनात्रान्तर्यामी उपलक्ष्यते । जडशब्देन तु देहः परात्मन इत्युक्तत्वात् । ततश्च "केचित् स्वदेहान्तर्हृदयावकाशे प्रादेशमात्रं पुरुषं वसन्तम्" (भा० २।२।८) इत्यादिना

चतुर्भुजत्वेन वर्णितोऽन्तर्यामी देहे स्थितोऽपि यथा देहक्लेदादिना न स्पृश्यते तद्वदिति ज्ञेयम् ।

तदेवं तद्धाम्नामुपर्यधः प्रकाशमानत्वे नोभयविधत्वं प्रसक्तम् । वस्तुतस्तु श्रीभगवन्नित्याधिष्ठानत्वेन तच्च श्रीविग्रहवदुभयत्र प्रकाशाविरोधात् समानगुणनामरूपत्वेनाम्नातत्वाल् लाघवाच् चैकविधत्वमेव मन्तव्यम् । एकस्यैव श्रीविग्रहस्य बहुत्वप्रकाशश्च (अनु० ४१) द्वितीयसन्दर्भे दर्शितः । भा० १०।६९।२ —

चित्रं बतैतदेकेन वपुषा युगपत् पृथक् ।
गृहेषु द्व्यष्टसाहस्रं स्त्रिय एक उदावहत् ॥ ३४६ ॥ इत्यादिना ।

एवंविधत्वं च तस्याचिन्त्यशक्तिस्वीकारेण सम्भावितमेव । स्वीकृतं चाचिन्त्यशक्तित्वम् "श्रुतेस्तु शब्दमूलत्वात्" (ब्र० सू० २।१।२७) इत्यादौ । तदेवमुभयाभेदाभिप्रायेणैव श्रीहरिवंशेऽपि गोलोकमुद्दिश्य "स हि सर्वगतो महान्" इत्युक्तम् ।

भेदे तु ब्रह्मसंहितायामपि "गोलोक एव निवसत्यखिलात्मभूतः" (ब्र० सं० ५।३७) इत्येवकारोऽत्र स्वकीयनित्यविहारप्रतिपादकवाराहादिवचनैर्विरुध्येत । अविरोधस्तूभयेषामैक्येनैव भवतीति तं न्यायसिद्धमेवार्थं ब्रह्मसंहितानुगृह्णाति । अत एव श्रीहरिवंशेऽपि शक्रेण (ह० वं० २।१९।३५) —

स तु लोकस्त्वया कृष्ण सीदमानः कृतात्मना ।
धृतो धृतिमता वीर निघ्नतोपद्रवान् गवाम् ॥ ३४७ ॥

इति गोलोकगोकुलयोरभेदेनैवोक्तम् । तस्मादभेदेन भेदेन चोपक्रान्तत्वादेकविधान्येव श्रीमथुरादीनि प्रकाशभेदेनैव तूभयविधत्वेनाम्नातानीति स्थितम् । दर्शयिष्यते चाग्रे क्षौणिप्रकाशमान एव श्रीवृन्दावने श्रीगोलोकदर्शनम् । ततोऽस्यैवापरिच्छिन्नस्य गोलोकाख्यवृन्दावनीयप्रकाशविशेषस्य वैकुण्ठोपर्यपि स्थितिर्माहात्म्यावलम्बनेन भजतां स्फुरतीति ज्ञेयम् । अयमेव मथुराद्वारकागोकुलप्रकाशविशेषात्मकः श्रीकृष्णलोकस्तद्विरहिणा श्रीमदुद्धवेनापि समाधावनुभूत इत्याह (भा० ३।२।६) —

शनकैर्भगवल्लोकान् नृलोकं पुनरागतः ।
विमृज्य नेत्रे विदुरं प्रीत्याहोद्धव उत्स्मयन् ॥ ३४८ ॥

स्पष्टम् ॥ श्रीशुकः ॥

१०७ । इममेव लोकं द्युशब्देनाप्याह (भा० १२।२।२९-३०) —

विष्णोर्भगवतो भानुः कृष्णाख्योऽसौ दिवं गतः ।
तदाविशत् कलिर्लोकं पापे यद् रमते जनः ॥ ३४९ ॥
यावत् स पादपद्माभ्यां स्पृशन्नास्ते रमापतिः ।
तावत् कलिर्वै पृथिवीं पराक्रन्तुं न चाशकत् ॥ ३५० ॥

यदा गुणावतारस्य भगवतो विष्णोस्तदंशत्वाद् रश्मिस्थानीयस्य कृष्णाख्यो भानुः सूर्यमण्डलस्थानीयो दिवं प्रापञ्चिकलोकागोचरं मथुरादीनामेव प्रकाशविशेषरूपं वैकुण्ठं गतः । तदा कलिर्लोकमाविशत् । एषां स च प्रकाशः पृथिवीस्थोऽप्यन्तर्धानशक्त्या तामस्पृशन्नेव विराजते । अतस्तया न स्पृश्यते पृथिव्यादिभूतमयैरस्माभिर्वाराहोक्तमहाकदम्बादिरिव ।

यस्तु प्रापञ्चिकलोकगोचरो मथुरादिप्रकाशः सोऽयं कृपया पृथिवीं स्पृशन्नेवावतीर्णः । अतस्तया च स्पृश्यते तादृशैरस्माभिर्दृश्यमानकदम्बादिरिव । अस्मिंश्च प्रकाशे यदावतीर्णो भगवांस्तदा तत्स्पर्शेनापि तत्स्पर्शात् तां स्पृशन्नेवास्ते स्म ।

सम्प्रति तदस्पृष्टप्रकाशे विहरमाणः पुनरस्पृशन्नेव भवति । यद्यप्येवं तथापि क्वचिद् द्वयोर्भेदेन क्वचिदभेदेन च विवक्षा तत्रावगन्तव्या । तदेतदभिप्रेत्याह — यावदिति । पराक्रन्तुमित्यनेन तत्पूर्वमपि कञ्चित् कालं वाप्य प्रविष्टोऽसाविति ज्ञापितम् ॥ श्रीशुकः ॥

१०८ । "तेने धीरा अपि यन्ति ब्रह्मविद उत्क्रम्य स्वर्गलोकमितो विमुक्ताः" (बृ० ४।४।८) इति श्रुत्यनुसारेण स्वर्गशब्देनाप्याह "यातुधान्यपि सा स्वर्गमवाप जननीगतिम्" (भा० १०।६।३८) इति ।

अत्र "जननीगतिम्" इति विशेषणेन लोकान्तरं निरस्तम् । तत्प्रकरण एव तदादीनां बहुशो गत्यन्तरनिषेधात् । "सद्वेषादिव पूतनापि सकुला त्वामेव देवापिता" (भा० १०।१४।३५) इत्यत्र साक्षात् तत्प्राप्तिनिर्धारणाच्च ।

तथा च केनोपनिषदि दृश्यते "केनेषितं मनः पतति प्राणस्य प्राणश्चक्षुषश्चक्षुरतिमुच्य धीराः प्रेत्यास्माल् लोकादमृता भवन्ति" (केन १।१–२) इत्युपक्रम्य "तदेव ब्रह्म त्वं विद्धि" (केन १।४) इति मध्ये प्रोच्य "अमृतत्वं हि विदन्ते" (केन २।४) "सत्यमायतनम्" (केन ४।८) "यो वा एतामेवमुपनिषदं वेदापहत्य पाप्मानमनन्ते स्वर्गे लोके प्रतिष्ठति" (केन ४।९) इति उपसंहृतम् ।

ततः को वासुदेवः ? किं तद्वनम् ? को वा स्वर्गः ? किं तद् ब्रह्म ? इत्यपेक्षायां नारायणोपनिषद्याह "पुरुषो ह वै नारायणः" इत्युपक्रम्य पुनश्चाभ्यासेन "नित्यो देव एको नारायणः" इत्युक्त्वा नारायणोपासकस्य च स्तुतिं कृत्वा "तद् ब्रह्म नारायण एव" इति व्यज्य स्वर्गं प्रतिपादयितुम् "वैकुण्ठलोकं गमिष्यति तदिदं पुरमिदं पुण्डरीकं विज्ञानघनं तस्मात् तडिदावभासम्" इति वनलोकाकारस्य वैकुण्ठस्यानन्दात्मकत्वं प्रतिपाद्य स च तदधिष्ठाता नारायणः कृष्ण एवेत्युपसंहरति "ब्रह्मण्यो देवकीपुत्रः" इति ॥ श्रीशुकः ॥

१०९ । काष्ठाशब्देनापि तमेवोद्दिशति (भा० १।१।२३) —

> ब्रूहि योगेश्वरे कृष्णे ब्रह्मण्ये धर्मवर्मणि ।
> स्वां काष्ठामधुनोपेते धर्मः कं शरणं गतः ॥ ३५१ ॥

स्वां काष्ठां दिशम् । यत्र स्वयं नित्यं तिष्ठति तत्रैव प्रापञ्चिकलोकसम्बन्धं त्यक्त्वा गते सतीत्यर्थः ॥ श्रीशौनकः ॥

११० । तदेवमभिप्रेत्य द्वारकायास्तावन् नित्यश्रीकृष्णधामत्वमाह (भा० १०।६०।३५) —

सत्यं भयादिव गुणेभ्य उरुक्रमान्तः शेते समुद्र उपलम्भनमात्र आत्मा ।
नित्यं कदिन्द्रियगणैः कृतविग्रहस्त्वं त्वत्सेवकैर्नृपपदं विधुतं तमोऽन्धम् ॥ ३५२ ॥

अयमर्थः । पूर्वं श्रीकृष्णदेवेन श्रीरुक्मिणीदेव्यै (भा० १०।६०।११-१२) —

राजभ्यो बिभ्यतः सुभ्रु समुद्रं शरणं गतान् ।
बलवद्भिः कृतद्वेषान् प्रायस्त्यक्तनृपासनान् ॥ ३५३ ॥

भा० १०।६०।११ — "कस्मान् नो ववृषे" इति परिहसितम् ।
तत्रोत्तरमाह — सत्यमिति । अत्र आत्मा त्वमित्येतयोः पदयोर्युगपच्छेत इति क्रियान्वयायोगात् विशेषणविशेष्यभावः प्रतिहन्यते । वाक्यच्छेदभेदे तु कष्टतापतेत् । ततश्चोपमानोपमेयभावेनैव ते उपतिष्ठतः । इयं च लुप्तोपमा ।
तथा च आत्मा साक्षी यथा गुणेभ्यः सत्त्वादिविकारेभ्यस्तदस्पर्शलिङ्गाद् भयादिव समुद्रे तद्वदगाधे विषयाकारैरपरिच्छिन्ने उपलम्भनमात्रे ज्ञानमात्रस्वशक्त्याकारेऽन्तर्हृदये नित्यं शेते । अक्षुभिततया नित्यं प्रकाशते ।
हे उरुक्रम ! तथा त्वमपि तेभ्यः सम्प्रति तद्विकारमयेभ्यो राजभ्यो भयादिव उपलम्भनमात्रे वैकुण्ठान्तरवत् चिदेकविलासे अन्तःसमुद्रे द्वारकाख्ये धाम्नि नित्यमेव शेषे स्वरूपानन्दविलासैर्गूढं विहरसि । अर्थवशाद् विभक्तिविपरिणामः प्रसिद्ध एव ।
उदाहरिष्यते च तत्र नित्यस्थायित्वम् "द्वारकां हरिणा त्यक्ताम्" (भा० ११।३१।२३) इत्यादौ "नित्यं सन्निहितस्तत्र भगवान् मधुसूदनः" (भा० ११।३१।२४) इति ।
अतो वस्तुतस्तस्य त्वदाश्रयकस्य जीवचैतन्यस्य यदि तेभ्यो भयं नास्ति तदा सुतरामेव तव नास्ति किन्तूभयत्रापि स्वधामैकविलासित्वात् तत्रौदासीन्यमेव भयत्वेनोत्प्रेक्षत इति भावः । एवं तस्य तव च समञ्जसता ।
तेषां तु दौरात्म्यमेवेत्याह । तथाप्यात्मा कुत्सितानामिन्द्रियाणां गणैस्तदीयनानावृत्तिरूपैः कृतो विग्रहो यत्र तथाविधस्त्वमपि कुत्सितेन्द्रियगणो येषां तथाभूतै राजभिः कृतविग्रहः । उभयत्राप्यावरणधाष्टर्यम् । यद्येवम्भूतस्त्वं तर्हि का तव नृपासनपरित्यागे हानिः ? तत्तु त्वत्सेवकैः प्राथमिकत्वद्भजनोन्मुखैरेव विधुतं त्यक्तम् । तच्चोक्तं तयैव "यद्वाञ्छया नृपशिखामणयः" (भा० १०।६०।४१) इत्यादिना ।
यतोऽन्धं तम एव तत् प्राकृतसुखमयत्वात् । अतः श्रीद्वारकाया नित्यत्वमपि ध्वनितम् ॥ श्रीरुक्मिणीदेवी श्रीभगवन्तम् ॥

१११ । अथ श्रीमथुरायाः "मथुरा भगवान् यत्र नित्यं सन्निहितो हरिः" (भा० १०।१।२८) इति । अर्थात् तत्रत्यानाम् ॥ श्रीशुकः ॥

११२ । भा० ४।८।४२ —

तत् तात गच्छ भद्रं ते यमुनायास्तटं शुचिः ।
पुण्यं मधुवनं यत्र सान्निध्यं नित्यदा हरेः ॥ ३५४ ॥

स्पष्टम् ॥ श्रीनारदो ध्रुवम् ॥

११३ । तस्य हरेः श्रीकृष्णत्वमेव व्यनक्ति (भा० ४।८।६२) —

इत्युक्तस्तं परिक्रम्य प्रणम्य च नृपार्भकः ।
ययौ मधुवनं पुण्यं हरेश्चरणचर्च्चितम् ॥ ३५५ ॥

पाद्मकल्पारम्भकथने प्रथमस्वायम्भुवमन्वन्तरे तस्मिन् हरेश्चरणचर्च्चितत्वं श्रीमथुराया-स्तन्नित्यत्वात् श्रीकृष्णावतारस्य । तथा हरिशब्देनाप्यत्र श्रीकृष्ण एव विवक्षितः । श्रु-त्यादौ तदवस्थितिप्रसिद्धेः ।
प्रतिकल्पमाविर्भावात् तस्यैव चरणाभ्यां चर्च्चितमिति श्रीकृष्णस्यैव नित्यसान्निध्यं गम्यते । अत एव द्वादशाक्षरविद्यादैवतस्य श्रीध्रुवाराध्यस्य त्वन्यत एव तत्रागमनम-भिहितम् "मधोर्वनं भृत्यदिदृक्षया गतः" (भा० ४।९।१) इत्यनेनेति ॥ श्रीमैत्रेयः ॥

११४ । अथ श्रीवृन्दावनस्य (भा० १०।१८।३) —

स च वृन्दावनगुणैर्वसन्त इव लक्षितः ।
यत्रास्ते भगवान् साक्षाद् रामेण सह केशवः ॥ ३५६ ॥

अत्र यत्रासीदित्यप्रोच्य यत्रास्त इत्युक्त्या नित्यस्थितित्वमेव व्यक्तीकृतम् ॥ श्रीशुकः ॥

११५ । अथवा त्रिष्वप्येतदेवोदाहरणीयम् (भा० १०।९०।४८) —

जयति जननिवासो देवकीजन्मवादो यदुवरपरिषत् स्वैर्दोर्भिरस्यन्नधर्मम् ।
स्थिरचरवृजिनघ्नः सुस्मितश्रीमुखेन व्रजपुरवनितानां वर्धयन् कामदेवम् ॥ ३५७ ॥

यदुवराः परिषत् सभ्यरूपा यस्य सः । देवकीजन्मवादस्तज्जन्मत्वेन लब्धख्यातिः । देवक्यां जन्मेति वादस्तत्त्वबुभुत्सुकथा यस्य स इति वा । श्रीकृष्णो जयति परमोत्कर्षेण सदैव विराजते ।
लोहितोष्णीषाः प्रचरन्तीतिवत् यदुवरसभ्यविशिष्टतयैव जयाभिधानम् । अत्र यदुवरश-ब्देन श्रीव्रजेश्वरतद्भ्रातरोऽपि गृह्यन्ते तेषामपि यदुवंशोत्पन्नत्वेन प्रसिद्धत्वात् । तथा च भारततात्पर्ये श्रीमध्वाचार्यैरेवं ब्रह्मवाक्यत्वेन लिखितम् —

तस्मै वरः स मया सन्निसृष्टः स चास नान्दाख्य उतास्य भार्या ।
नाम्ना यशोदा स च शूरतातसुतस्य वैश्याप्रभवस्य गोपः ॥ ३५८ ॥ इति ।

शूरतातसुतस्य शूरसपत्नीमातृजस्य वैश्यायां तृतीयवर्णायां जातस्य सकाशादास बभूवेत्यर्थः । अत एव श्रीमदानकदुन्दुभिना तस्मिन् भ्रातरिति मुहुः सम्बोधनमक्लिष्टार्थं भवति "भ्रातरं नन्दमागतम्" (भा० १०।५।२०) इति श्रीमन्मुनीन्द्रवचनं च । तदेतदप्युपलक्षणं तद्भ्रातॄणाम् ।

यथा स्कान्दे मथुराखण्डे "रक्षिता यादवाः सर्वे इन्द्रवृष्टिनिवारणात्" इति । "यत्राभिषिक्तो भगवान् मघोना यदुवैरिणा" इति च । "यादवानां हितार्थाय धृतो गिरिवरो मया" इति चान्यत्र ।

यथा च यादवमध्यपातितत्वेनैव तेषु निर्धारणमयं श्रीरामवचनं श्रीहरिवंशे "यादवेष्वपि सर्वेषु भवन्तो मम बान्धवाः" इति ।

सप्तम्या ह्यस्य जातावेव निर्धारणमुच्यते "पुरुषेषु क्षत्रियः शूरतमः" इतिवत् । विजातीयत्वे तु "श्रौघ्नेभ्यो माथुरा ह्याढ्यतमाः" इतिवत् । "यादवेभ्योऽपि सर्वेभ्यः" इत्येवोच्येतेति ज्ञेयम् ।

अत्र जयतीत्यत्र लोडर्थत्वं न सङ्गच्छते सदैवोत्कर्षानन्त्यमिति तस्मिन्नाशीर्वादानवकाशात् ।

तदवकाशो वा आशीर्वादविषयस्य तदानीमाशीर्वादककृतानुवादविशेषविशिष्टतयैव स्थितेरवगमात् प्रतिपिपादयिषितं तादृशत्वेनैव तात्कालिकत्वमागच्छत्येव । यथा "धार्मिकसभ्योऽयं राजा वर्धताम्" इति । तदेवम् "पतिर्गतिश्चान्धकवृष्णिसात्वताम्" (भा० २।४।२०) इत्यत्राप्यनुसन्धेयम् ।

अनेन यदुवराणामपि तथैव जयो विवक्षितः ।

नन्वेवं तथा विहरणशीलश्चेत् पुनः कथमिव देवकीजन्मवादोऽभूत् ? तत्राह — स्वैर्दोर्भिर्दोर्भ्यां चतुर्भिश्चतुर्भुजैरधर्मं तद्बहुलमसुरराजवृन्दमस्यन् निहन्तुम् । लक्षणहेत्वोः क्रियायाः शतृप्रत्ययविधानात् । तदर्थमेव लोकेऽपि तथा प्रकटीभूत इत्यर्थः ।

किं वा किं कुर्वन् जयति ? स्वैः कालत्रयगतैरपि भक्तैरेव दोर्भिरिव दोर्भिस्तद्द्वारा अधर्मं जगद्गतपाप्मानमस्यन् नाशयन्नेव । तदुक्तम् "मद्भक्तियुक्तो भुवनं पुनाति" (भा० ११।१४।२४) इति ।

पुनः किमर्थं देवकीजन्मवादः ? तत्राह — स्थिरचरवृजिनघ्नो निजाभिव्यक्त्या निखिलजीवानां दुःखहन्ता तदर्थमेवेत्यर्थः । तदुक्तम् "यत एतद् विमुच्यते" (भा० १०।२९।१६) इति ।

किं वा कथम्भूतो जयति ? व्रजपुरवासिनां स्थावरजङ्गमानां निजचरणवियोगदुःखहन्ता सन् ।

नित्यविहारे प्रमाणमाह — जननिवासः । जनशब्दोऽत्र स्वजनवाचकः । "सालोक्य" (भा० ३।२९।१३) इत्यादिपद्ये जना इतिवत् ।

स्वजनहृदये तत्तद्विहारत्वेन सर्वदैवावभासमान इत्यर्थः । सर्वप्रमाणचयचूडामणिभूतो विद्वदनुभव एवात्र प्रमाणमिति भावः ।

स्वयं तु किं कुर्वन् जयति ? व्रजवनितानां मथुराद्वारकापुरवनितानां च कामलक्षणो यो देवः स्वयमेव तद्रूपस्तं वर्धयन् सदैवोद्दीपयन् । अत्र तदीयहृदयस्थकामतदधिदेवयोरभे-

दविवक्षा तादृशतद्भावस्य तद्वदेव परमार्थताबोधनाय श्रीकृष्णस्फूर्तिमयस्य तादृशभावस्याप्राकृतत्वात् परमानन्दपरमकाष्ठारूपत्वाच्च ।
श्रीकृष्णस्य कामरूपोपासना चागमे व्यक्तास्ति "वनिता जनितात्यर्थानुरागायां च योषिति" इति नामलिङ्गानुशासनम् । व्रजेति श्रैष्ठ्येन पूर्वनिपातः । अत एव पूर्वं मेरुदेव्यां सुदेवीति सञ्ज्ञावत् देवकीशब्देन श्रीयशोदा च व्याख्येया —

द्वे नाम्नी नन्दभार्याया यशोदा देवकीति च ।
अतः सख्यमभूत् तस्या देवक्या शौरिजायया ॥ ३५९ ॥

इति स्कान्दवचनात् । तदेवं त्रिष्वपि नित्यविहारित्वं सिद्धम् ॥ श्रीशुकः ॥

११६ । अथ यदुक्तं श्रीवृन्दावनस्यैव प्रकाशविशेषे गोलोकत्वं तत्र प्रापञ्चिकलोकाप्रकटलीलावकाशत्वेनावभासमानप्रकाशो गोलोक इति समर्थनीयम् । प्रकटलीलायां तस्मिंस्तच्छब्दप्रयोगादर्शनात् भेदांशश्रवणाच्च । प्रकटाप्रकटतया लीलाभेदश्चाग्रे दर्शयितव्यः । तदेवं वृन्दावन एव तस्य गोलोकाख्यप्रकाशस्य दर्शनेनाभिव्यनक्ति (भा० १०।२८।१०–१७) —

नन्दस्त्वतीन्द्रियं दृष्ट्वा लोकपालमहोदयम् ।
कृष्णे च सन्नतिं तेषां ज्ञातिभ्यो विस्मितोऽब्रवीत् ॥ ३६० ॥
ते चौत्सुक्यधियो राजन् मत्वा गोपास्तमीश्वरम् ।
अपि नः स्वगतिं सूक्ष्मामुपाधास्यदधीश्वरः ॥ ३६१ ॥
इति स्वानां स भगवान् विज्ञायाखिलदृक् स्वयम् ।
सङ्कल्पसिद्धये तेषां कृपयैतदचिन्तयत् ॥ ३६२ ॥
जनो वै लोक एतस्मिन्नविद्याकामकर्मभिः ।
उच्चावचासु गतिषु न वेद स्वां गतिं भ्रमन् ॥ ३६३ ॥
इति सञ्चिन्त्य भगवान् महाकारुणिको हरिः ।
दर्शयामास लोकं स्वं गोपानां तमसः परम् ॥ ३६४ ॥
सत्यं ज्ञानमनन्तं यद् ब्रह्मज्योतिः सनातनम् ।
यद्धि पश्यन्ति मुनयो गुणापाये समाहिताः ॥ ३६५ ॥
ते तु ब्रह्महृदं नीता मग्नाः कृष्णेन चोद्धृताः ।
ददृशुर्ब्रह्मणो लोकं यत्राक्रूरोऽध्यगात् पुरा ॥ ३६६ ॥
नन्दादयस्तु तं दृष्ट्वा परमानन्दनिर्वृताः ।
कृष्णं च तत्र च्छन्दोभिः स्तूयमानं सुविस्मिताः ॥ ३६७ ॥

अतीन्द्रियमदृष्टपूर्वम् । लोकपालो वरुणः ।
स्वगतिं स्वधाम । सूक्ष्मां दुर्ज्ञेयाम् । उपाधास्यतुपधास्यति नोऽस्मान् प्रति प्रापयिष्यतीति सङ्कल्पितवन्त इत्यर्थः ।

जन इति जनशब्देनात्र तदीयस्वजन एवोच्यते । "सालोक्यसार्ष्टि" (भा० ३।२९।१३) इत्यादि पद्ये जना इतिवत् । अत्रैते मत्सेवनं विना प्राप्यमाणसालोक्यादिपरित्यागेन तत्सेवैकवाञ्छाव्रताः साधका एवेति लभ्यते ।
"न वेद स्वां गतिम्" इत्यत्र तु श्रीभगवता तस्मिन् लोके स्वीयत्वतदीयत्वयोरेकत्वमननेन स्वाभेद एव प्रतिपादित इति परम एवासौ तदीयस्वजनः । अत एव (भा० १०।२५।१८) —

तस्मान् मच्छरणं गोष्ठं मन्नाथं मत्परिग्रहम् ।
गोपाये स्वात्मयोगेन सोऽयं मे व्रत आहितः ॥ ३६८ ॥

इति स्वयमेव भगवता मत्परिग्रहमित्यनेन स्वस्मिंस्तत्परिकरतामच्छरणमित्यादिक्रम-प्राप्तबहुव्रीहिणा दर्शिता "सोऽयं मे व्रतः" इत्यनेन स्वस्य तद्गोपनव्रतता च । तदेवं व्रज-वासिजन एव लब्धे तं प्रत्येव करुणया दर्शितवान् न त्वन्यान् ।
"स्वां गतिम्" इति सामानाधिकरण्य एव व्यक्ते न तु ताभ्यां पदाभ्यां वस्तुद्वयमुच्यते । स्वगतिं सूक्ष्मामिति पूर्वोक्तमपि तथा । तस्मात् तल्लोकदर्शनमेवोभयत्र विवक्षितम् । विवक्षिते च तल्लोके स तु जनमात्रस्य स्वगतिर्न भवतीति च जनशब्देन तद्विशेष एव व्याख्यातः ।
तदेवं सत्ययमर्थः — जनोऽसौ व्रजवासी मम परमस्वजनः । एतस्मिन् प्रापञ्चिकलोके अविद्यादिभिः कृता या उच्चावचा गतयो देवतिर्यगादयस्तासु स्वां गतिं भ्रमन् ताभिस्तु-ल्यतया जानन् तामेव स्वां गतिं न वेदेत्यर्थः । ततो मामपि सर्वोत्तमतया प्रेमभक्त्या सर्वो-त्तमतया द्रष्टुरेतस्य यद्यपि तत्तल्लीलारसपोषाय मदीयलीलाशक्त्यैव भ्रमादिकं कल्पितं न पुनरविद्यादिभिः (भा० १०।११।५८) —

इति नन्दादयो गोपाः कृष्णरामकथां मुदा ।
कुर्वन्तो रममाणाश्च नाविन्दन् भववेदनाम् ॥ ३६९ ॥ इति ।

"यद्धामार्थसुहृत्प्रियात्मतनयप्राणाशयास्त्वत्कृते" (भा० १०।१४।३५) इत्यादि ।
तथाप्येतस्येच्छानुसारेण क्षणकतिपयमेतदीयां सर्वविलक्षणां स्वां गतिं दर्शयन् तदपने-ष्यामीति भावः । वैलक्षण्यं त्वग्रे व्यञ्जनीयम् ।
गोपानां स्वं लोकं श्रीगोलोकम् । यः खलु "गोपीगोपैरसङ्ख्यातैः सर्वतः समलङ्कृतम्" इति मृत्युञ्जयतन्त्रे वर्णितम् । तथा —

पद्माकृतिपुरोद्वारि लक्षमण्डलनायिकाः ।
रामादयस्तु गोपालाश्चतुर्दिक्षु महेश्वराः ॥ ३७० ॥

इति नारदपञ्चरात्रे विजयाख्याने वर्णितः ।

"चिन्तामणिप्रकरसद्मसु" (ब्र० सं० ५।४०) इत्यादिना ब्रह्मसंहितादिषु वर्णितव्यक्तवैभवातिक्रान्तप्रपञ्चाप्रपाञ्चलोकमहोदयस्तमेवेत्यर्थः । तमसः प्रकृतेः परं प्रपञ्चानभिव्यक्तत्वात् तदीयेनाप्यसङ्करम् ।

अत एव सच्चिदानन्दरूप एवासौ लोक इत्याह — सत्यमिति । सत्यादिरूपं यद् ब्रह्म यच्च मुनयो गुणात्यये पश्यन्ति तदेव स्वरूपशक्तिवृत्तिविशेषप्राकट्यविशेषेण सत्यादिरूपाव्यभिचारिणं गोलोकरूपं दर्शयामासेति पूर्वेणान्वयः ।

यथान्यत्रापि वैकुण्ठे भगवत्सन्दर्भोदाहृतं पाद्मादिवचनं ब्रह्माभिन्नतावाचित्वेन दर्शितं तद्वत् ।

अथ श्रीवृन्दावने च तादृशदर्शनं कतमदेशस्थितानां तेषां जातमित्यपेक्षायामाह — ब्रह्महृदमक्रूरतीर्थं श्रीकृष्णेन नीताः पुनश्च तदाज्ञयैव मग्नाः पुनश्च तस्मात् तीर्थात् श्रीकृष्णेनैवोद्धृताः । उद्धृत्य वृन्दावनमध्यदेशमानीतास्तस्मिन्नेव नराकृतिपरब्रह्मणः श्रीकृष्णस्य लोकं गोलोकाख्यं ददृशुः ।

कोऽसौ ब्रह्महृदः ? तत्राह — यत्रेति । पुरेत्येतत्प्रसङ्गाद् भाविकाल इत्यर्थः । "पुरा पुराणे निकटे प्रबन्धातीतभाविषु" इति कोषकाराः । अध्यगादस्तौदधिगतवानिति वा ।

सर्वत्रैव श्रीवृन्दावने यद्यपि तत्प्रकाशविशेषोऽसौ गोलोको दर्शयितुं शक्यः स्यात् तथापि तत्तीर्थमाहात्म्यज्ञापनार्थं विनोदार्थमेव वा तत्र तेषाम् नयनादिकमिति ज्ञेयम् ।

नन्दादय इति कर्त्रन्तरानिर्देशाच्छन्दोभिरेव मूर्तैः कर्तृभिः । तदभिज्ञापनार्थं तज्जन्मादिलीलया स्तूयमानम् । अन्तरङ्गाः परिकरास्तु पूर्वदर्शितरीत्या गोगोपादय एव । अत एव कृष्णं यथा ददृशुस्तथा तत्परिकरान्तराणां दर्शनानुक्तेस्तत्र क एव तत्र परिकरा इत्यभिव्यज्यते ।

त एव च पूर्वदर्शितमृत्युञ्जयादितन्त्रहरिवंशवचनानुसारेण प्रकटाप्रकटप्रकाशगततया द्विधाभूताः सम्प्रत्यप्रकटप्रकाशप्रवेशे सत्येकरूपा एव जाता इति न पृथग्दृष्टाः । यदा तत्प्रकाशभेदो भवति तदा तत्तल्लीलारसपोषाय तेषु प्रकाशेषु तत्तल्लीलाशक्तिरेवाभिमानभेदं परस्परमननुसन्धानं च प्रायः सम्पादयतीति गम्यते । उदाहरिष्यते चाग्रे । अत एवोक्तम् "न वेद स्वां गतिं भ्रमन्" इति ।

तथा च सतीदानीं श्रीव्रजवासिनां कथञ्चिज् जातया तादृश्येच्छया तेभ्यस्तेषामेव तादृशलोकप्रकाशविशेषादिकं दर्शितमिति गम्यते । न च प्रकाशान्तरमसम्भावनीयम् । परमेश्वरत्वेन तच्च श्रीविग्रहपरिकरधामलीलादीनां युगपदेकत्राप्यनन्तविधवैभवप्रकाशशीलत्वात् ।

तत्र स्वां गतिमिति तदीयतानिर्देशो गोपानां स्वं लोकमिति षष्ठीस्वशब्दयोर्निर्देशः । कृष्णमिति साक्षात् तन्निर्देशश्च वैकुण्ठान्तरं व्यवच्छिद्य श्रीगोलोकमेव प्रतिपादयति । अत एव तेषां तद्दर्शनात् परमानन्दनिर्वृतत्वं सुविस्मितत्वमपि युक्तमुक्तम् । तस्यैव पूर्णत्वात् तथा तेषां पुत्रादिरूपेणोदयाच्च । तदेवमुक्तोऽर्थः समञ्जस एव ॥ श्रीशुकः ॥

११७ । एवं श्रीद्वारकादीनां तस्य नित्यधामत्वं सिद्धम् । अथ तत्र के तावदस्य परिकराः ? उच्यते —

पूर्योर्यादवादयो वृन्दावने गोपादयश्चेति । श्रीकृष्णस्य द्वारकादिनित्यधामत्वेन तेषां स्वतः सिद्धेः । तद्रूपत्वे परिकरान्तराणामयुक्तत्वादश्रवणत्वाच्च । तत्परिकरत्वेनैवाराधनादिवाक्यानि दर्शितानि दर्शयितव्यानि च ।
अत एवोक्तं पाद्मे कार्तिकमाहात्म्ये श्रीकृष्णसत्यभामासंवादे —

> एते हि यादवाः सर्वे मद्गणा एव भामिनि ।
> सर्वदा मत्प्रिया देवि मत्तुल्यगुणशालिनः ॥ ३७१ ॥

एवकारान् न देवादयः । श्रीहरिवंशेऽप्यनिरुद्धान्वेषणे तादृशत्वमेवोक्तमक्रूरेण "देवानां च हितार्थाय वयं याता मनुष्यताम्" (ह० वं० २।१२१।५७) इति ।
श्रीमथुरायां त्ववतारावसरेऽनभिव्यक्ता अपि निगूढतया केचित् तस्यामेव वर्तमानाः श्रूयन्ते । यथा श्रीगोपालोत्तरतापन्याम् (गो० ता० उ० २।३६) —

> यत्रासौ संस्थितः कृष्णस्त्रिभिः शक्त्या समाहितः ।
> रामानिरुद्धप्रद्युम्नै रुक्मिण्या सहितो विभुः ॥ ३७२ ॥ इति ।

श्रीवृन्दावने तैः सदा विहारश्च । यथा पाद्मपातालखण्डे श्रीयमुनामुद्दिश्य —

> अहो अभाग्यं लोकस्य न पीतं यमुनाजलम् ।
> गोगोपगोपिकासङ्गे यत्र क्रीडति कंसहा ॥ ३७३ ॥ इति ।

स्कान्दे च —

> वत्सैर्वत्सतरीभिश्च सदा क्रीडति माधवः ।
> वृन्दावनान्तरगतः सरामो बालकैर्वृतः ॥ ३७४ ॥ इति ।

न तु प्रकटलीलागतेभ्य एते भिन्नाः । "एते हि यादवाः सर्वे" इत्यनुसारात् । तथा हि पाद्मनिर्माणखण्डे च श्रीभगवद्वाक्यम् —

> नित्यां मे मथुरां विद्धि वनं वृन्दावनं तथा ।
> यमुनां गोपकन्याश्च तथा गोपालबालकान् ।
> ममावतारो नित्योऽयमत्र मा संशयं कृथाः ॥ ३७५ ॥ इति ।

अतस्तानेवोद्दिश्य श्रुतौ च तत्र ऋक्षु "तां वां वास्तून्युश्मसि गमध्यै यत्र गावो भूरिशृङ्गा अयासः । अत्राह तदुरुगायस्य वृष्णः परमं पदमवभाति भूरि" (ऋग्वेद १।१५४।६) इति ।
व्याख्यातं च — तां तानि वां युवयोः कृष्णरामयोर्वास्तूनि लीलास्थानानि गमध्यै गन्तुं उश्मसि कामयामहे । तानि किं विशिष्टानि ? यत्र येषु भूरिशृङ्गा महाशृङ्ग्यो गावो

वसन्ति । यथोपनिषदि भूमवाक्ये धर्मिपरेण भूमशब्देन महिष्ठमेवोच्यते न तु बहुतरमिति । यूथदृष्ट्यैव वा भूरिशृङ्गा बहुशृङ्ग्यो बहुशुभलक्षणा इति वा । अयासः शुभाः । “अयः शुभावहो विधिः” इत्यस्य देवास इतिवत् जसन्तं पदमिदम् ।

अत्र भूमौ तल्लोकवेदप्रसिद्धं श्रीगोकुलाख्यं उरुगायस्य स्वयं भगवतो वृष्णः सर्वकामदुघचरणारविन्दस्य परमं प्रपञ्चातीतं पदं स्थानम् “भूरि” बहुधा अवभातीत्याह — वेद इति ।

यजुःसु माध्यन्दिनीयास्तु या ते धामन्युश्मसीत्यादौ विष्णोः परमं पदमवभाति भूरीत्यन्ते पठन्ति ।

पाद्मोत्तरखण्डे यत् त्वियं श्रुतिः परमव्योमप्रस्ताव उदाहृता । तत् खलु परमव्योमगोलोकयोरेकतापत्त्यपेक्षयेति मन्तव्यम् । गोशब्दस्य सास्नादिमत्येव प्रचुरप्रयोगेण झटित्यर्थप्रतीतेः श्रीगोलोकस्य ब्रह्मसंहिताहरिवंशमोक्षधर्मादिषु प्रसिद्धत्वाच्च ।

अथर्वसु च श्रीगोपालतापन्याम् “जन्मजराभ्यां भिन्नः स्थाणुरयमच्छेद्योऽयं योऽसौ सौर्ये तिष्ठति योऽसौ गोषु तिष्ठति योऽसौ गाः पालयति योऽसौ गोपेषु तिष्ठति” (गो० ता० उ० २।२२) इत्यादि ।

सौर्य इति सौरी यमुना तस्या अदूरभवे देशे श्रीवृन्दावन इत्यर्थः । सहस्रनामसु यामुन इत्यत्र हि तथा व्याख्यातं भाष्यकृद्भिः ।

आगमे च “सकललोकमङ्गलो नन्दगोपतनयो देवता” इति । तदीयपरमहामन्त्रगतर्ष्यादिषु तदीयाराध्यत्वेन तस्य स्मरणम् ।

तदेवमुभयेषामपि नित्यपार्षदत्वे सिद्धे यत् तु शस्त्राघातक्षतविषपानमूर्च्छातत्त्वबुभुत्सासंसारसारनिस्तारोपदेशास्पदत्वादिकं श्रूयते तद्भगवत इव नरलीलौपायिकतया प्रपञ्चितमिति मन्तव्यम् । यथा “तवेयं विषमा बुद्धिः” (भा० १०।५४।४२) इत्यादिकं साक्षात् श्रीरुक्मिणीं प्रति श्रीबलदेववाक्ये ।

यच्च श्रीमदुद्धवमुद्दिश्य “स कथं सेवया तस्य कालेन जरसं गतः” (भा० ३।२।३) इत्युक्तम् । तदपि चिरकालसेवातात्पर्यकमेव । “तत्र प्रवयसोऽप्यासन् युवानोऽतिबलौजसः” (भा० १०।४५।१९) इति विरोधात् ।

क्वचिच्च प्रकटलीलायाः प्रापञ्चिकलोकमिश्रत्वाद् यथार्थमेव तदादिकम् । यथा शतधन्ववधादौ (भा० १०।५७।२१) ।

उभयेषां विभागश्च श्रीदशमान्ते दृश्यते (भा० १०।९०।४३–४५) —

> देवासुराहवहता दैतेया ये सुदारुणाः ।
> ते चोत्पन्ना मनुष्येषु प्रजा दृप्ता बबाधिरे ॥ ३७६ ॥
> तन्निग्रहाय हरिणा प्रोक्ता देवा यदोः कुले ।
> अवतीर्णाः कुलशतं तेषामेकाधिकं नृप ॥ ३७७ ॥
> तेषां प्रमाणं भगवान् प्रभुत्वेनाभवद्धरिः ।
> ये चानुवर्तिनस्तस्य ववृधुः सर्वयादवाः ॥ ३७८ ॥

इत्यनुवर्तिनां पृथङ्निर्देशात् । अन्तरङ्गानां भगवत्साधारण्यं तु यादवानुद्दिश्योक्तम् "मत्तुल्यगुणशालिनः" इति । गोपानुद्दिश्य च "गोपैः समानगुणशीलवयोविलासवेशैश्च" इति ।

पाद्मनिर्माणखण्डे "गोपाला मुनयः सर्वे वैकुण्ठानन्दमूर्तयः" । यतो यो वैकुण्ठः श्रीभगवान् स इवानन्दमूर्तयस्ते ततस्तत्परमभक्तत्वादेव मुनय इत्युच्यते । न तु मुन्यवतारत्वादिति ज्ञेयम् ।

"नैते सुरेशा ऋषयो न चैते" (भा० १०।१३।३९) इत्यादिकं श्रीबलदेववाक्यं च भगवदाविर्भावलक्षणगोपादीनाम् "केयं वा कुत आयाता दैवी वा नार्युतासुरी" (भा० १०।१३।३७) इत्यादिप्राप्तमन्यत्वमेव निषेधति न तु पूर्वेषां च तद् विदधाति कल्पनागौरवादिति ज्ञेयम् । "इत्थं सतां ब्रह्मसुखानुभूत्या" (भा० १०।१२।११) इत्यादेः । "तद् भूरिभाग्यम्" (भा० १०।१४।३४) इत्यादेश्च ।

युक्तं चैषां तत्सादृश्यम् (भा० ६।३।१८) —

> तस्यात्मतन्त्रस्य हरेरधीशितुः परस्य मायाधिपतेर्महात्मनः ।
> प्रायेण दूता इह वै मनोहराश्चरन्ति तद्रूपगुणस्वभावाः ॥ ३७९ ॥

इति श्रीयमवाक्यानुगतत्वात् ।

दृष्टं च यथा प्रथमे "प्राविशत् पुरम्" (भा० १।११।१०) इत्यारभ्य । "मधुभोजदशार्हार्हकुकुरान्धकवृष्णिभिः । आत्मतुल्यबलैर्गुप्ताम्" (भा० १।११।११) इत्यादौ ।

अत एव ब्रह्मणा हृतेषु बालवत्सेषु भगवता नान्येषां तत्तद्रूपाणां सृष्टिः किन्तु स्वेनैव तत्तद्रूपताप्राप्तिरित्युक्तम् । अत एव (भा० १०।१८।११) —

> गोपजातिप्रतिच्छन्ना देवा गोपालरूपिणम् ।
> ईडिरे कृष्णं रामं च नटा इव नटं नृपः ॥ ३८० ॥

इत्यत्र साम्यमेव सूचितम् ।

अर्थश्च — देवाः श्रीकृष्णावरणे "मद्भक्तपूजाभ्यधिका" (भा० ११।१९।२१) इति न्यायेन तद्भदेवोपास्या अपि श्रीदामादयो गोपजात्या प्रतिच्छन्ना अन्यगोपसामान्यभावेन प्रायस्तादृशतया लक्षयितुमशक्याः ।

तत्र कृष्णं रामं च गोपालरूपिणमिति दृष्टान्तगर्भे यथा तादृशावपि तौ तद्रूपिणौ तथा तेऽपीत्यर्थः । अत्र देवा इत्यनेन महत्त्वसाम्यम् । गोपालरूपिणमित्यनेन प्रकृतिवेशलीलासाम्यं नटा इव नटमित्यनेन गुणसाम्यं चाभिप्रेतमिति । तत्र यादवादीनां तत्पार्षदत्वं योजयति (भा० १०।८५।२३) —

> अहं यूयमसावार्य इमे च द्वारकौकसः ।
> सर्वेऽप्येवं यदुश्रेष्ठ विमृग्याः सचराचरम् ॥ ३८१ ॥

यूयं श्रीमदानकदुन्दुभ्यादयो विमृग्याः परमार्थरूपत्वादन्वेषणीयाः । तथान्यदपि द्वारकौको स्थावरजङ्गमसहितं यत्किञ्चित् तदन्वेष्यम् । अहं श्रीकृष्ण इति दृष्टान्तत्वेनोपन्यस्तम् । ततश्च नराकारपरब्रह्मणि स्वस्मिन्निव तन्नित्यपरिकरे सर्वत्रैव परमपुरुषार्थत्वमिति भावः ।

तस्माद् यथा पूर्वम् "सत्त्वं रजस्तमः" (भा० १०।८५।१३) इत्यादिना सत्त्वादिगुणानां तद्वृत्तीनां च ब्रह्मणि त्रैकालिकस्पर्शासम्भवान् माययैव तदध्यासो भवता वर्णितस्तथा दृष्टिरत्र तु न कार्येति तात्पर्यम् ॥

११८ । लौकिकाध्यात्मगोष्ठीत्येवमेवेत्याह द्वयेन । तत्र प्रथमेन यथा (भा० १०।८५।२४) —

> आत्मा ह्येकः स्वयञ्ज्योतिर्नित्योऽन्यो निर्गुणो गुणैः ।
> आत्मसृष्टैस्तत्कृतेषु भूतेषु बहुधेयते ॥ ३८२ ॥

अत्र द्वारकायामिति प्रकरणेन लभ्यते । हि यस्मादेक एवात्मा मल्लक्षणं भगवत्त्वमात्मसृष्टैः स्वरूपादेवोल्लसितैर्गुणैः स्वरूपशक्तिवृत्तिविशेषैः कर्तृभिस्तत्कृतेषु तस्मिन् स्वरूपे एव प्रादुर्भावितेषु भूतेषु परमार्थसत्येषु द्वारकान्तर्वर्तिवस्तुषु बहुधा तत्तद्रूपेण ईयते प्रकाशते । सहस्रनामभाष्ये "लोकनाथं महद्भूतम्" इत्यत्र च भूतं परमार्थसत्यमिति व्याख्यातम् ।

तथा तथा च प्रकाशः स्वरूपगुणापरित्यागेनैवेत्याह — स्वयञ्ज्योतिः स्वप्रकाश एव सन् नित्य एव सनन्यः प्रपञ्चेऽभिव्यक्तोऽपि तद्विलक्षण एव सन् निर्गुणः प्राकृतगुणरहित एव सन्निति ॥

११९ । तर्हि कथं भवत आत्यन्तिकं सममेवात्र सर्वम् ? इत्याशङ्क्य तथापि मय्यस्ति वैशिष्ट्यमित्याह (भा० १०।८५।२५) —

> खं वायुर्ज्योतिरापो भूस्तत्कृतेषु यथाशयम् ।
> आविस्तिरोऽल्पभूर्येको नानात्वं यात्यसावपि ॥ ३८३ ॥

सत्कार्यवादाभ्युपगमात् तस्य कारणानन्यत्वाभ्युपगमाच्च । यथा खादीनि भूतानि तत्कृतेषु तत्स्वरूपेणैव विकासितेषु वाय्वादिघटान्तेषु यथाशयं वाय्वाद्याविर्भावाद्यनुरूपमेवाविर्भावादिकं यान्ति न तु तेष्वधिकम् ।

यत्र यावान् वायुर्गृह्यते तत्र तावानाकाशधर्मः शब्दोऽपि गृह्यते । यावज् ज्योतिस्तावानेव वायुधर्मः स्पर्शोऽपीत्यादिकं ज्ञेयम् ।

तथा स्वरूपेणैव विकासितेषु द्वारकावस्तुषु असौ भगवदाख्य आत्मापि । तस्मादहं तु तत्तत्सर्वमयः सर्वस्मात् पृथक् परिपूर्णश्चेत्यस्ति वैशिष्ट्यमिति भावः । अनेन दृष्टान्तेन मत्त एवोल्लासिता मद्धर्मा एव ते भवितुमर्हन्ति न त्वाकाशे धूसरत्वादिवन् मयि केवलमध्यस्ता इति च ज्ञापितम् । अत्र यथा तथेति व्याख्यानमपिशब्देन द्योत्यते ॥ श्रीभगवान् श्रीमदानन्कदुन्दुभिम् ॥

१२० । अत्र एवाह (भा० १०।८२।३१) —

तद्दर्शनस्पर्शनानुपथप्रजल्पशय्यासनाशनसयौनसपिण्डबन्धः ।
येषां गृहे निरयवर्त्मनि वर्ततां वः स्वर्गापवर्गविरमः स्वयमास विष्णुः ॥ ३८४ ॥

येषां वो युष्माकं वृष्णीनां गृहे विष्णुः श्रीकृष्णाख्यो भगवान् स्वयमात्मना स्वभावत एव आस निवासं चक्रे न त्वन्येन हेतुनेति तद्वासस्य स्वाभाविकत्वमेव दर्शितम् ।
कथम्भूते गृहे ? अनिरयवर्त्मनि निरयः संसारस्तद्वर्त्म प्रपञ्चः । ततोऽन्यस्मिन् प्रपञ्चातीत इत्यर्थः । कीदृशानाम् ? वस्तस्मिन्नेव वर्तमानानाम् ।
स्वयं कथम्भूतः ? स्वर्गापवर्गविरमः स्वर्गस्यापवर्गस्य च विरमो येन । यो निजभक्तेभ्यस्तद्बहिर्मुखताकरं स्वर्गं न ददाति तद्भक्त्युदासीनं केवलं मोक्षं च न ददाति किन्तु तान् स्वचरणारविन्दतल एव रक्षतीत्यर्थः ।
येषां युष्माकं तु गृहे स एवम्भूत एवासेत्याह — तद्दर्शनेति । तस्य युष्मत्कर्तृकं दर्शनं च अनुपथोऽनुगतिश्च प्रजल्पो गोष्ठी च तथा युष्मत्संवलिता शय्या शयनं च आसनं च अशनं भोजनं च तैर्विशिष्टैश्चासौ सयौनसपिण्डबन्धश्चेति शाकपार्थिवादिवन् मध्यपदलोपी कर्मधारयः । तत्र वृष्णिभिः सह यौनबन्धो विवाहसम्बन्धः पिण्डबन्धो दैहिकसम्बन्धस्ताभ्यां सह वर्तमानोऽसाविति बहुव्रीहिगर्भता ॥ राजानः श्रीमदुग्रसेनम् ॥

१२१ । किं च (भा० १०।९०।४२) —

सङ्ख्यानं यादवानां कः करिष्यति महात्मनाम् ।
यत्रायुतानामयुतलक्षेणास्ते सदाहुकः ॥ ३८५ ॥

आहुक उग्रसेनः । "यत्रास्ते" इति वर्तमानप्रयोगेण तत्रापि सदेति नित्यतावाचकाव्ययेन तेषां नित्यपार्षदत्वं सुव्यक्तम् ॥ श्रीशुकः ॥

१२२ । अतस्तेषां श्रीभगवत्पार्षदत्वे योग्यतामव्यभिचारित्वमपि दृष्टान्तेन स्पष्टयति (भा० १०।७०।१८) —

तत्रोपविष्टः परमासने विभुर्बभौ स्वभासा ककुभोऽवभासयन
वृतो नृसिंहैर्यदुभिर्यदूत्तमो यथोडुराजो दिवि तारकागणैः ॥ ३८६ ॥

स्पष्टम् । एवमेव दुर्योधनं प्रति स्वयं विश्वरूपं दर्शयता श्रीभगवता तेषां यादवादीनां निजावरणरूपत्वं दर्शितमित्युद्यमपर्वणि प्रसिद्धिः ॥ श्रीशुकः ॥

१२३ । यश्चैषामेकादशस्कन्धान्ते तदन्यथाभावः श्रूयते स तु श्रीमदर्जुनपराजयविमोहपर्यन्तो मायिक एव । तथावचनं च ब्रह्मशापानिवर्त्यताख्यापनायैव गोब्राह्मणहितावतारिणा भगवता विहितमिति ज्ञेयम् । दृश्यते च कूर्मपुराणे व्यासगीतायां सदाचारप्रसङ्गे पतिव्रतामाहात्म्ये रावणहृतायाः सीताया मायिकत्वं यथा तद्वत् । तथा हि तदानीमेवाह (भा० ११।३०।४९) —

त्वं तु मद्धर्ममास्थाय ज्ञाननिष्ठ उपेक्षकः ।
मन्मायारचितामेतां विज्ञायोपशमं व्रज ॥ ३८७ ॥

त्वं तु दारुको ज्ञाननिष्ठो मदीयलीलातत्त्वज्ञः । मद्धर्मं मम स्वभक्तप्रतिपालयितृत्वरूपं स्वतुल्यपरिकरसङ्गित्वरूपं च स्वभावमास्थाय विश्रभ्य एतामधुना प्रकाशितां सर्वामेव मौषलादिलीलां मम माययैव इन्द्रजालवद् रचितां विज्ञायौपेक्षको बहिर्दृष्ट्या जातं शोकमुपेक्षमाण उपशमं चित्तक्षोभान् निवृत्तिं व्रज प्राप्नुहि ।
तुशब्देनान्ये तावन् मुह्यन्तु तव तु तथा मोहो न युक्त एवेति ध्वनितम् । अत्र श्रीमद्दारुकस्य स्वयं वैकुण्ठावतीर्णत्वेन सिद्धत्वादेतामित्यत्रातिसन्निहितार्थलाभाच् चान्यथाव्याख्यानमेव प्रथमप्रतीत्यविषय इति विवेक्तव्यम् ॥ श्रीभगवान् दारुकम् ॥

१२४ । तथा च पद्यत्रयम् (भा० ११।३१।११) —

राजन् परस्य तनुभृज्जननाप्ययेहा मायाविडम्बनमवेहि यथा नटस्य ।
सृष्ट्वात्मनेदमनुविश्य विहृत्य चान्ते संहृत्य चात्ममहिमोपरतः स आस्ते ॥ ३८८ ॥

परस्य श्रीकृष्णस्य ये तनुभृतः "प्रयुज्यमाने मयि तां शुद्धां भागवतीं तनुम्" (भा० १।६।२९) इति श्रीनारदोक्त्यनुसारेण तदीयां तनुमेव धारयन्तस्तत्पार्षदा यादवादयस्तेषां जननाप्ययरूपा ईहाश्चेष्टाः केवलं परस्यैव मायया विडम्बनमनुकरणमवेहि ।
यथेन्द्रजालवेत्ता नटः कश्चिज् जीवत एव मारयित्वेव पुनश्च दग्ध्वेव तद्देहं जनयित्वेव दर्शयति तस्येव । विश्वसर्गादिहेत्वचिन्त्यशक्तेस्तस्य तादृशशक्तित्वं न च चित्रमित्याह — सृष्ट्वेति ।
एवं सति सङ्कर्षणादौ मुग्धानामन्यथाभानहेतूदाहरणाभासः सुतरामेव मायिकलीलावर्णने प्रवेशितो भवति । स्कान्दे श्रीलक्ष्मणस्याप्यन्यादृशत्वं न सम्प्रतिपन्नम् । नारायणवर्मणि च शेषाद् विलक्षणशक्तित्वेन नित्यमेवोपासकपालकत्वेन तथैवानुमतमिति दर्शितम् । अत एव जरासन्धवाक्ये "तव राम यदि श्रद्धा" (भा० १०।५०।१९) इत्यत्र श्रीस्वामिभिरपीत्थं वास्तवार्थो व्यञ्जितः — अच्छेद्यदेहोऽसाविति स्वयमेव मत्वा अपरितोषात् पक्षान्तरमाह — यद्वा "मां जहि" इति ।
तदेवं चानेन व्याख्यानेन "लोकाभिरामाम्" (भा० ११।३१।६) इत्यादिपद्येषु योगिजनशक्तिविलक्षणभगवच्छक्तिव्यञ्जकं श्रीस्वामिचरणानाम् "अदग्ध्वा" इत्यादिपदच्छेदादिमयव्याख्यासौष्ठवं कैमुत्यातिशयेन सुष्ठ्वेव स्थापितम् ।
यत एव "दृश्यते चाद्यापि तदुपासकानाम्" इत्यादिकं च तदुक्तं सुसङ्गतं भवति । तत्तत्परिकरेणैव सार्धं तेषु तत्साक्षात्कार इति ॥

१२५ । अप्राकृतदेहानां तेषां तन् न सम्भवतीत्यास्तां श्रीकृष्णपाल्यत्वेनैव न सम्भवतीत्याह (भा० ११।३१।१२) —

मर्त्येन यो गुरुसुतं यमलोकनीतं त्वां चानयच्छरणदः परमास्त्रदग्धम् ।
जिग्येऽन्तकान्तकमपीशमसावनीशः किं स्वावने स्वरनयन् मृगयुं सदेहम् ॥ ३८९ ॥

यः श्रीकृष्णो यमलोकं गतमपि गुरुसुतं गुरोर्जातेन पञ्चजनभक्षितेन तेन मर्त्येन देहेनैव आनयत् । न च ब्रह्मतेजसो बलवत्त्वं मन्तव्यम् । त्वां च ब्रह्मास्त्रदग्धं यस्तस्माद् ब्रह्मास्त्रादनयद् रक्षितवानित्यर्थः ।
किमन्यद् वक्तव्यम् ? यश्चान्तकानामन्तकमीशं श्रीरुद्रमपि बाणसङ्ग्रामे जितवान् । अहो यश्च तं जराख्यं मृगयुमपि स्वः स्वर्गं वैकुण्ठविशेषं सशरीरमेव प्रापितवान् । स कथं स्वानां यदूनामवने ईशो न भवति ? तस्मात् तेष्वन्यथादर्शनं न तात्त्विकलीलानुगतम् । सशरीरं तु तेषां स्वलोकगमनमतीव युक्तमित्यर्थः ॥

१२६ । ननु गच्छन्तु ते सशरीरा एव स्वं धाम । तत्रापि स्वयं भगवान् विराजत एवेति न तेषां तद्विरहदुःखमपि । श्रीभगवांस्तु तथासमर्थश्चेत् तर्हि कथमन्यांस्तादृशानाविर्भाव्य तैः सह मर्त्यलोकानुग्रहार्थमपरमपि कियन्तं कालं मर्त्यलोकेऽपि प्रकटो नासीत् ? इत्यत्र सिद्धान्तयन् तेषां श्रीभगवतश्च सौहार्दभरेणापि परस्परमव्यभिचारित्वमाह (भा० ११।३१।१३) —

तथाप्यशेषस्थितिसम्भवाप्ययेष्वनन्यहेतुर्यदशेषशक्तिधृक् ।
नैच्छत् प्रणेतुं वपुरत्र शेषितं मर्त्येन किं स्वस्थगतिं प्रदर्शयन् ॥ ३९० ॥

यद्यप्युक्तप्रकारेणाशेषस्थितिसम्भवाप्ययेष्वनन्यहेतुः । यद्यस्मात् तदूर्ध्वमप्यनन्ततादृशशक्तिधृक् तथापि यादवानन्तर्धाप्य निजं वपुरत्र शेषितं प्रणेतुं किञ्चित् कालं स्थापयितुं नैच्छत् किन्तु स्वमेव लोकमनयत् । तत्र हेतुः — तान् विना मर्त्येन लोकेन किं मम प्रयोजनम् ? इति स्वस्थानां तद्धामगतानां तेषां गतिमेव स्वस्याभिरुचितत्वेन प्रकृष्टां दर्शयन्निति ॥ श्रीशुकः ॥

१२७ । अतस्तेषां श्रीभगवद्वदन्तर्धानमेव न त्वन्यदस्तीति श्रीभगवदभिप्रायकथनेनाप्याह (भा० ३।३।१५) —

मिथो यदैषां भविता विवादो मध्वामदाताम्रविलोचनानाम् ।
नैषां वधोपाय इयानतोऽन्यो मय्युद्यतेऽन्तर्दधते स्वयं स्म ॥ ३९१ ॥

एषां यदूनां यदा मिथो विवादस्तदाप्येषां पृथिवीपरित्याजने वधरूप उपायो न विद्यते किमुतान्येन विवादे स न स्यादिति । तर्हि तेषां मयाभिलषिते पृथिवीपरित्याजने कतम उपायो भवेत् ? तत्र पुनः परामृशति — अतो वधादन्य एव इयानेतावानेव उपायो वर्तते । कोऽसौ ? मय्युद्यते ममेच्छायां सत्यां एते स्वयमन्तर्दधत इति यः । स्मेति निश्चये ।

यद्वा वधस्योपायो न विद्यत इत्येवं व्याख्याय अतो वधोपायादन्य इयान् वधोपायतुल्य उपायो विद्यते इति व्याख्येयम् । अन्यत् समानम् ॥ श्रीमदुद्धवो विदुरम् ॥

१२८ । अत एवान्तर्हिते श्रीभगवति श्रीमदुद्धवस्य विदुरिति वर्तमानप्रत्ययनिर्देशवाक्येन तदानीमन्तर्हितस्यापि तद्वर्गस्यैव श्रीभगवतैव सह संवासो व्यज्यते यथा (भा० ३।२।८) —

दुर्भगो बत लोकोऽयं यदवो नितरामपि ।
ये संवसन्तो न विदुर्हरिं मीना इवोडुपम् ॥ ३९२ ॥

अयं मम हृदये स्फुरन् द्वारकावासी लोकः । ये संवसन्तः सह वसन्तोऽपि न विदुर्न जानन्ति । अहं तु संवासभाग्यहीनो न जानामीति नाश्चर्यमिति भावः । अत्र तदानीं यदि संवासभाग्यहीनो न जानामीति नाश्चर्यमिति भावः । अत्र तदानीं यदि संवासो नाभविष्यत् तदा नावेदिषुरित्येवावक्ष्यदिति ज्ञेयम् ॥

१२९ । नन्वधुनापि न जानन्तीति कथं जानासि ? इत्याशङ्क्य तत्र हेतुं प्राचीननिजानुभवमाह (भा० ३।२।९) —

इङ्गितज्ञाः पुरुप्रौढा एकारामाश्च सात्वताः ।
सात्वतामृषभं सर्वे भूतावासममंसत ॥ ३९३ ॥

यं सात्वतां स्वेषामेव ऋषभं नित्यकुलपतित्वेन वर्तमानं स्वयं भगवन्तमपि भूतावासं तदंशमेव भूतान्तर्यामिणमेवामंसतेति "एको देवः" इत्यादौ "सर्वभूताधिवासः" (श्वे० ६।११) इत्यन्तर्यामीति श्रुतेः । उक्तं च "वृष्णीनां परदेवता" (भा० १०।४३।१७) इति ॥ श्रीमदुद्धवः श्रीविदुरम् ॥

१३० । यमेव संवासं पूर्वमपि प्रार्थयामास (भा० ११।६।४३) —

नाहं तवाङ्घ्रिकमलं क्षणार्धमपि केशव ।
त्यक्तुं समुत्सहे नाथ स्वधाम नय मामपि ॥ ३९४ ॥

स्वधाम द्वारकाया एव प्रापञ्चिकाप्रकटप्रकाशविशेषमपीति । यथा यादवानन्यान् नयसि तथा मामपि नयेत्यर्थः । अर्थान्तरे त्वपि शब्दवैयर्थ्यं स्यात् ॥ श्रीमानुद्धवः ॥

१३१ । पाद्मोत्तरखण्डे कार्त्तिकमाहात्म्ये च यादवानां तादृशत्वम् —

यथा सौमित्रिभरतौ यथा सङ्कर्षणादयः ।
तथा तेनैव जायन्ते निजलोकाद् यदृच्छया ॥ ३९५ ॥
पुनस्तेनैव गच्छन्ति तत्पदं शाश्वतं परम् ।
न कर्मबन्धनं जन्म वैष्णवानां च विद्यते ॥ ३९६ ॥ इति ।

अत्र निजालोकादिति तत्पदमिति च रामकृष्णादिवैकुण्ठमेव पाद्ममतम् — श्रीमत्स्याद्यवताराणां पृथक् पृथग् वैकुण्ठावस्थितेस्तत्र साक्षादुक्तत्वात् ।
तादृशानां भगवत इव भगवदिच्छैव जन्मादिकारणं चोक्तं श्रीविदुरेण (भा० ३।१।४४) —

अजस्य जन्मोत्पथनाशनाय कर्माण्यकर्तुर्ग्रहणाय पुंसाम
नन्वन्यथा कोऽर्हति देहयोगं परो गुणानामुत कर्मतन्त्रम् ॥ ३९७ ॥ इति ।

"को वान्योऽपि" इति टीका च ।
तदेवं तेषां श्रीकृष्णनित्यपरिकरत्वे सिद्धे साधिते श्रीवसुदेवादीनां प्राग्जन्मनि साधकत्वादिकथनं च भगवत इव भगवदिच्छयैव लोकसङ्ग्रहाद्यर्थमंशेनैवावतारात् क्वचिज्जीवान्तरावेशात् सम्भवति ।
पुनश्च स्वयमवतरत्सु तेषु तदंशप्रवेशकथारीत्या त्वेकत्वेन कथनमिति ज्ञेयम् । यथा प्रद्युम्नस्य व्याख्यातम् । एवं तृतीये "वेदाहम्" (भा० ३।४।११) इत्यादि भगवद्वाक्ये उद्धवं प्रति वस्वंशत्वापेक्षयैव "वसो" इति सम्बोधनम् । तादृशांशपर्यवसानास्पदांशिरूपत्वेन चरमजन्मतोक्तिश्च ज्ञेया । अतः आह (भा० १०।३।३२) —

त्वमेव पूर्वसर्गेऽभूः पृश्निः स्वायम्भुवे सति ।
तदायं सुतपा नाम प्रजापतिरकल्मषः ॥ ३९८ ॥

त्वं श्रीदेवकीदेव्येव पृश्निरभूः । न तु पृश्निस्त्वमभूदिति । एवं तदायमपीति ॥ श्रीभगवान् ॥

१३२ । एवमेवाह "वसुदेवं हरेः स्थानं वदन्त्यानकदुन्दुभिम्" (भा० ९।२४।३०) इति ।
"सत्त्वं विशुद्धं वसुदेवशब्दितं यदीयते तत्र पुमानपावृतः" (भा० ४।३।२३) इत्यादौ प्रसिद्धं वसुदेवाख्यं हरेः स्थानमत्रानकदुन्दुभिं वदन्ति मुनय इति ॥ श्रीशुकः ॥

१३३ । तथात्राप्येवं व्याख्येयम् "देवक्यां देवरूपिण्याम्" (भा० १०।३।८) इति ।
देवो वसुदेवस्तद्रूपिण्यां विशुद्धसत्त्ववृत्तिरूपायामेवेति । अत एव विष्णुपुराणे तां प्रति देवस्तुतौ "त्वं परा प्रकृतिः सूक्ष्मा" (वि० पु० ५।२।७) इति बहुतरम् ॥ श्रीशुकः ॥

१३४ । अत एवाहमिव नित्यमेव मत्पितृरूपेणाप्रकटलीलायां वर्तमानौ युवामधुना प्रकटलीलामनुगतौ पुनरप्रकटलीलाप्रवेशं यदृच्छयैवाप्स्यथ इत्याह (भा० १०।३।४५) —

युवां मां पुत्रभावेन ब्रह्मभावेन चासकृत् ।
चिन्तयन्तौ कृतस्नेहौ यास्येथे मद्गतिं पराम् ॥ ३९९ ॥

ब्रह्मभावेन नराकृतिपरब्रह्मबुद्ध्या । परां प्रकटलीलातोऽन्यां मद्गतिं लीलाम् ॥

१३५ । युवयोः प्रागंशेनाविर्भूतयोरपि मदेकनिष्ठासीदित्याह (भा० १०।३।३९) —

अजुष्टग्राम्यविषयावनपत्यौ च दम्पती ।
न वव्राथेऽपवर्गं मे मोहितौ मम मायया ॥ ४०० ॥

मम मायया मद्विषयकस्नेहमय्या शक्त्येत्यर्थः । "वैष्णवीं व्यतनोन् मायां पुत्रस्नेहमयीं विभुः" (भा० १०।८।४३) इति व्रजराज्ञीं प्रति च तथादर्शनात् ।
तादृशस्नेहजनिकया मम कृपयेति वा "माया दम्भे कृपायां च" इति विश्वप्रकाशात् ।
तत्प्रेम्णैव ह्यपवर्गस्य तिरस्कारः सर्वत्र श्रूयते यद्यपि मोक्षवरणे हेतुरस्तीत्याह—अजुष्टेति । विषयावेशाभावाद् वैराग्योत्पत्तेरिति भावः ॥ श्रीभगवान् पितरौ ॥

१३६ । अथ श्रीगोपादीनामपि तन्नित्यपरिकरत्वम् "जयति जननिवासः" (भा० १०।९०।४८) इत्यादावेव व्यक्तम् ।
अत एवाह (भा० १०।२५।१८) —

तस्मान् मच्छरणं गोष्ठं मन्नाथं मत्परिग्रहम् ।
गोपाये स्वात्मयोगेन सोऽयं मे व्रत आहितः ॥ ४०१ ॥

स्पष्टम् ॥ श्रीभगवान् ॥

१३७ । तथा (भा० १०।५।१८) —

तत आरभ्य नन्दस्य व्रजः सर्वसमृद्धिमान् ।
हरेर्निवासात्मगुणै रमाक्रीडमभून् नृप ॥ ४०२ ॥

हरेर्निवासभूतो य आत्मा तस्य ये गुणास्तैरेव सर्वसमृद्धिमान् नित्ययोगे मत्वर्थीयेन नित्यमेव सर्वसमृद्धियुक्तः श्रीनन्दस्य व्रजः । ततस्तं श्रीकृष्णप्रादुर्भावं आरभ्य तु रमाक्रीडम् "चिन्तामणिप्रकरसद्मसु कल्पवृक्षलक्षावृतेषु सुरभिरभिपालयन्तम् । लक्ष्मीसहस्रशतसम्भ्रमसेव्यमानम्" (ब्र० सं० ५।२९) इत्यत्र प्रसिद्धरमाणां महालक्ष्मीरूपाणां श्रीव्रजदेवीनामपि साक्षाद् विहारास्पदं बभूव ।
हरिनिवासात्मनि तत्र श्रीकृष्णो यावन् निगूढतया विहरति स्म तावत् ता अपि तथैव विहरन्ति स्म । व्यक्ततया तु ता अपि व्यक्ततयेत्यर्थः ॥ श्रीशुकः ॥

१३८ । एतदेव प्रपञ्चयति षड्भिः (भा० १०।१४।३२) —

अहो भाग्यमहो भाग्यं नन्दगोपव्रजौकसाम् ।
यन्मित्रं परमानन्दं पूर्णं ब्रह्म सनातनम् ॥ ४०३ ॥

भाग्यमनिर्वचनीया कापि श्रीकृष्णकृपा तस्य पुनरुक्त्यादरेण सर्वथैवापरिच्छेद्यत्वमुक्तम् । पूर्णपरमानन्दब्रह्मत्वेनैव सनातनत्वे सिद्धे यत् पुनस्तदुपादानं तन्मित्रपदस्यैव विशेषणत्वेन लभ्यम् ।

अथवा विधेयस्य विशेषप्रतिपत्त्यर्थमनूद्यं विशिष्यते । यथा मनोरमं सुवर्णमिदं कुण्डलं जातमिति कुण्डलस्यैव मनोरमत्वं साध्यम् । तस्मादत्राप्यनूद्यस्य श्रीकृष्णाख्यस्य परब्रह्मणः परमानन्दत्वपूर्णत्वलक्षणं विशेषणद्वयं विधेयाया मित्रताया एव तत्तद्भावं साधयतीति तदेकार्थप्रवृत्तं सनातनत्वं तस्यास्तद्भावं साधयेत् ।
किं चात्र "मित्रम्" इति कालविशेषयोगनिर्देशाभावात् कालसामान्यमेव भजते । ततश्च तस्य मित्रतालक्षणस्य विधेयस्य कालत्रयावस्थायित्वमेव स्पष्टम् । कालान्तरासञ्जनं तु कष्टम् । अत्र चोत्तरयोरर्थयोः श्रीकृष्णस्य सनातनत्वे शब्दलब्धे सति तदीयमैत्रीमतां परिकराणामपि सनातनत्वं नासम्भवमपि । श्रीरुक्मिणीप्रभृतीनाम् तथा दर्शनात् ॥

१३९ । अहो अस्तु तावदेषां नित्यमेव श्रीकृष्णमैत्रीपरमानन्दमनुभवतां भाग्यं सम्प्रत्यस्माकमपि तत् किमपि जातमित्याह (भा० १०।१४।३३) —

> एषां तु भाग्यमहिमाच्युत तावदास्तामेकादशैव हि वयं बत भूरिभागाः ।
> एतद्धृषीकचषकैरसकृत् पिबामः शर्वादयोऽङ्घ्र्युदजमध्वमृतासवं ते ॥ ४०४ ॥

एका अखण्डिता नित्येति यावत् । सा भाग्यमहिमा भाग्यमाहात्म्यमेषां तावदास्तां सम्प्रति शर्वादयो दशदिक्पालदेवता एव वयं भूरिभागाः । परमभक्तत्वात् तेषु मुख्यत्वाच्च शर्वादय इत्युक्तम् ।
भूरिभागत्वमेव दर्शयति — हृषीकचषकैश्चक्षुरादिलक्षणपानपात्रैः कृत्वा वयमप्येतत् साक्षादेव यथा स्यात् तथा ते तव अङ्घ्र्युदजमध्वमृतासवमसकृत् पुनः पुनरिहागत्य पिबाम इति ।
चरणकमलसौन्दर्यादिकमेवातिमनोहरत्वात् मध्वादितया त्रिधापि रूपितं समाहारद्वन्द्वेन । एतदिति चास्यैव वा विशेषणम् ।
अत्र "तुष्यतु दुर्जनः" इति न्यायेन श्रीव्रजवासिनां प्राकृतदेहित्वमतेऽपि तेषां करणैर्देवताकर्तृकभोगो न युज्यते "तस्य च नित्यत्वात्" (ब्र० सू० २।४।१७) इत्यत्र श्रीशङ्कराचार्येण च "करणपक्षस्यैव हि देवता न भोक्तृत्वपक्षस्य" इत्यात्मन एव भोक्तृत्वनिर्धारणात् ॥

१४० । अतः पूर्वमपि "तदस्तु मे नाथ स भूरिभागः" (भा० १०।१४।३०) इत्यादिना यत् प्रार्थितं तदेतदेवेत्याह (भा० १०।१४।३४) —

> तद् भूरिभाग्यमिह जन्म किमप्यटव्यां
> यद् गोकुलेऽपि कतमाङ्घ्रिरजोऽभिषेकम् ।
> यज् जीवितं तु निखिलं भगवान् मुकुन्दस्
> त्वद्यापि यत्पदरजः श्रुतिमृग्यमेव ॥ ४०५ ॥

अनेन श्रीगोकुलजन्मलाभादेव तव पादनिषेवालक्षणो याचितो भूरिभागः सदैव सेत्स्यतीति सूचितम् । तस्मात् तेषां भागधेयं किं वर्णनीयम् ॥

१४१ । अहो येषां भक्त्या भवानपि नित्यमृणितामापन्नो येषु रुद्ध इवास्ते इत्याह (भा० १०।१४।३५) —

> एषां घोषनिवासिनामुत भवान् किं देव रातेति नश्
> चेतो विश्वफलात् फलं त्वदपरं कुत्राप्ययन् मुह्यति ।
> सद्वेषादपि पूतनापि सकुला त्वामेव देवापिता
> यद्धामार्थसुहृत्प्रियात्मतनयप्राणाशयास्त्वत्कृते ॥ ४०६ ॥

सतां शुद्धचित्तानां धात्र्यादिजनानामिव वेषादित्यर्थः । "लेभे गतिं धात्र्युचिताम्" (भा० ३।२।२३) इति तृतीयोक्तेः । तदेवमनादिकल्पपरम्परागतत्वादवतारत एवैवं प्राप्तत्वेन तैरेकैरेव भक्तिरुद्धत्वात् सनातनं मित्रमित्येवं साधूक्तम् । ततश्च "तद्भूरिभाग्यम्" इत्यादिकमपि साध्वेव प्रार्थितमिति भावः ॥

१४२ । नन्वेषां मनुषान्तरवद् रागादिकं दृश्यते । कथं तर्हि स्वयं भगवतो मम नित्यपरिकरत्वम् ? तत्र कैमुत्येनाह (भा० १०।१४।३६) —

> तावद् रागादयः स्तेनाः तावत् कारागृहं गृहम् ।
> तावन् मोहोऽङ्घ्रिनिगडो यावत् कृष्ण न ते जनाः ॥ ४०७ ॥

स्तेनाः पुरुषसारहराः । अन्येषां प्राकृतजनानामपि तावदेव रागादयश्चौरादयो भवन्ति यावत् ते जनास्ते तव न भवन्ति सर्वतोभावेन त्वय्यात्मानं न समर्पयन्ति । समर्पिते चात्मनि तेषां रागादयोऽपि त्वन्निष्ठा एवेति रागादीनां प्राकृतत्वाभावान् न चौरादित्वं प्रत्युत परमानन्दरूपत्वमेवेत्यर्थः । तथैव प्रार्थितं श्रीप्रह्लादेन (वि० पु० १।२०।१९) —

> या प्रीतिरविवेकानां विषयेष्वनपायिनी ।
> त्वामनुस्मरतः सा मे हृदयान् नापसर्पतु ॥ ४०८ ॥ इति ।

अतो यदि साधकानामेवं वार्ता तदा किं वक्तव्यम् ? नित्यमेव तादृशप्रियत्वेन सतां श्रीगोकुलवासिनामेवमिति । इत्थमेवोक्तम् (भा० १०।११।५८) —

> इति नन्दादयो गोपाः कृष्णरामकथां मुदा ।
> कुर्वन्तो रममाणाश्च नाविन्दन् भववेदनाम् ॥ ४०९ ॥ इति ।

भवन्त्यस्मिन्निति भवः प्रपञ्चः । यद्यपि प्रपञ्चजनेष्वभिव्यक्तास्ते तथापि तत्सम्बन्धिनी या वेदना विषयदुःखादिज्ञानं तां नाविन्दन्नित्यर्थः । "वेदना ज्ञानपीडयोः" इति कोषज्ञाः ॥

१४३ । तर्हि कथं गोकुले प्रपञ्चवद् भानं लोकानां भवति ? तत्राह (भा० १०।१४।३७) —

प्रपञ्चं निष्प्रपञ्चोऽपि विडम्बयसि भूतले ।
प्रपन्नजनतानन्दसन्दोहं प्रथितुं प्रभो ॥ ४१० ॥

प्रपञ्चातीतोऽपि त्वं भूतले स्थितं प्रपञ्चं विडम्बयसि जन्मादिलीलया "ममायं पिता ममेयं माता" इत्यादि भावालिङ्गतः स्वयमनेन प्रस्तुतेन गोकुलरूपेणानुकरोषि । वस्तु-तस्तु श्रीगोकुलरूपमिदं तव स्वरूपं प्रपञ्चवदेव भाति न तु प्रपञ्चरूपमेवेति तात्पर्यम् । तद्वच्च भानं किमर्थम् ? तत्राह — प्रपन्नेति । एतादृशलौकिकाकारलीलयैव हि प्रपन्नजनवृ-न्दस्य परमानन्दो भवतीत्येतदर्थम् । तस्मात् साधूक्तम् "अहो भाग्यम्" इत्यादि ॥ ब्रह्मा श्रीभगवन्तम् ॥

१४४ । अत एवाह (भा० १० ।६ ।४०) —

तासामविरतं कृष्णे कुर्वतीनां सुतेक्षणम् ।
न पुनः कल्पते राजन् संसारोऽज्ञानसम्भवः ॥ ४११ ॥

तासां श्रीगोपपुरस्त्रीणां संसारः संसारित्वं प्रापञ्चिकत्वं न पुनः कल्पते न तु घटते किन्तु अप्रापञ्चिकत्वमेव घटत इत्यर्थः । यतोऽसावज्ञानसम्भवः ।
तासां तु कथम्भूतानाम् ? अज्ञानतमः सूर्यस्य ज्ञानस्योपरिविराजमानो यः प्रेमा तस्याप्यु-परि विराजमानं यत् सुतेक्षणं पुत्रभावो वात्सल्याभिधः प्रेमा तदेव तत्राप्यविरतं नित्यम-नादित एव श्रीकृष्णे कुर्वतीनामिति स्थिते तन्नामसिद्धश्रीकृष्णनामविशेषाङ्कितविदितानां श्रीकृष्णेन सहान्तरङ्गतया तन्महायोगपीठध्येयानां तद्वदन्यास्वपि लीलासु तादृशतया दर्शयितव्यानां तासां श्रीकृष्णप्रेयसीनां तु किं वक्तव्यम् ॥ श्रीशुकः ॥

१४५ । तदेवमेव तासां श्रीकृष्णवदानन्दविग्रहाणां तैरेव विग्रहैः श्रीकृष्णसङ्गः प्रोक्तः । उक्तं च तासां विग्रहमाहात्म्यम् "तत्रातिशुशुभे ताभिर्भगवान् देवकीसुतः" (भा० १० ।३३ ।७) इत्यादिभिः ।
श्रीमदुद्धवेन च तान् नमस्यता प्रथमम् "एताः परं तनुभृतः" (भा० १० ।४७ ।५८) इति
अनेन तासामेव परमतनुभृत्त्वं प्रदर्श्य मध्ये "क्वेमाः स्त्रियः" (भा० १० ।४७ ।५९) इति
अनेन परमतमनुद्य तत् खण्डयता "नायं श्रियोऽङ्ग" (भा० १० ।४७ ।६०) इति
अनेन लक्ष्मीतोऽपि विलक्षणं तासु तत्प्रेयसीरूपत्वं प्रदर्श्य परमनित्यत्वं स्थापयित्वा तत्र च "यः प्रसाद उदगात्" इत्यनेन तत्प्रसादस्य सदान्तर्भूय स्थायित्वं सूचयित्वा पुनः "आसामहो चरण" (भा० १० ।४७ ।६१) इत्यादिना स्वीयपरमपुरुषार्थचरणरेणुत्वं दर्शि-तम् ।
यत्र "भेजुर्मुकुन्दपदवीं श्रुतिभिर्विमृग्याम्" (भा० १० ।४७ ।६१) इत्यनेन यदेव पुरुषार्थतया स्थापितम् । यत्र "वृन्दावने" इत्यादिना वृन्दावनस्य च तादृशत्वं स्थापितम् ।
तदेतद् व्यतिरेकेण द्रढयितुमन्यासामागन्तुकानामसिद्धदेहानां विग्रहत्यागेनैव तत्स-ङ्गप्राप्तिरित्याह "अन्तर्गृहगताः" (भा० १० ।२९ ।९) इत्यादिकेन "न चैवं विस्मयः कार्यः" (भा० १० ।२९ ।१६) इत्याद्यन्तेन ।

"अन्तर्गृहगताः" "शुश्रूषन्त्यः पतीन् काश्चित्" (भा० १०।२९।६) इत्यत्रोक्ता इत्यर्थः। विशेषव्याख्या च क्रमसन्दर्भे दर्शयिष्यते। तत्र अन्तरिति स्फुटमेव।

"अशुभम्" श्रीकृष्णप्राप्तावन्तरायरूपं गुरुभयादिकम्। मङ्गलं श्रीकृष्णप्राप्तौ साधनं सख्यादिसाहाय्यचिन्तनम् "न कर्मबन्धनं जन्म वैष्णवानां च विद्यते" इति ह्युक्तमेव।

दृश्यते चान्यत्रापि तदसम्भवस्थले तच्छब्दप्रयोगः "वत्स्यत्युरसि मे भूतिर्भवत्पादहतांहसः" (भा० १०।८९।११) इत्यादौ। तत्र यथा श्रीभगवद्वाक्ययाथार्थ्यायार्थान्तरमनुसन्धेयं तद्वदिहापीति।

"परमात्मानम्" इति ब्रह्मस्तवान्तनिर्दिष्टसिद्धान्तरीत्या श्रीकृष्णस्य स्वभावत एव परमप्रेमास्पदत्वं दर्शितम्। जार इति या बुद्धिस्तयापि तन्मात्रेणापि सङ्गताः। न तु साक्षादेव जाररूपेण प्राप्त्येति।

तद्भावपुरस्कारेण भजनस्य प्राबल्यं व्यञ्जितम्। जारशब्देन निर्देशात् लोकधर्ममर्यादातिक्रमं दर्शयित्वा तथाविधभावस्यातिनिरर्गलत्वं दर्शितम्। बन्धनं श्रीकृष्णप्राप्तिविरोधिगुरुजनमध्यवासादिरूपम्।

तत्र गुणमयं देहं जहुरित्यत्र राज्ञः सन्देहः "कृष्णं विदुः" इति।

हे मुने! ताः श्रीकृष्णं परं केवलं कान्तं निगूढवल्लभं विदुः। न तु ब्रह्मेति। तर्हि कथं तासां गुणप्रवाहस्योपरमः सम्भवति? यस्य ब्रह्मभावना स्यात् तत्र तस्य निर्गुणस्यैवोदयाद् भवेत् प्राचीनमायिकगुणप्रवाहोपरमः। तासु तु कान्ततयैव भावयन्तीषु प्राकृतगुणातीतगुणस्यैव तस्योदयात् प्राकृतगुणाभावेऽपि तद्गुणानुबन्धगुणत्वात् परमपुरुषार्थानुगतानां तेषां गुणानां कथमुपरम इत्यर्थः।

यद्वा तासां गुणप्रवाहः कथमुपरमः पारमार्थिको न भवति येन ततो मुक्तिं कथयसीति भावः। ब्रह्मतया वेदनावैलक्षण्यं प्रतिपादयति — गुणधियां ब्रह्मनिष्ठाया अपि त्याजके तस्य परमसौन्दर्यादिगुणे धीश्चेतो यासाम्।

तत्रोत्तरम् "उक्तम्" (भा० १०।२९।१३–१४) इति। पुरञ्जनेतिहासादिवद् दुरूहत्वात् स्वयमुक्तस्य व्याख्यानमिदम्। एवं हि दृष्टान्तबलेन लभ्यते। यथा चैद्यशब्देनात्र कारुषोऽपि गृहीतः। तौ च जयविजयौ। तयोश्च (भा० ७।१।३४) —

> देहेन्द्रियासुहीनानां वैकुण्ठपुरवासिनाम्।
> देहसम्बन्धसम्बद्धमेतदाख्यातुमर्हसि॥ ४१२॥

इति श्रीयुधिष्ठिरप्रश्नदिशा त्वप्राकृतविग्रहत्वेनानश्वरविग्रहयोरेव सतोः।
भा० ३।१६।२९ —

> भगवाननुगावाह यातं मा भैष्टमस्तु शम्।
> ब्रह्मतेजः समर्थोऽपि हन्तुं नेच्छे मतं तु मे॥ ४१३॥

इति भगवदुक्त्यनुसारेण।

"इत्थं जयविजयौ सनकादिशापव्याजेन केवलं भगवतो लीलार्थं संसृतावववतीर्य" इति पाद्मोत्तरखण्डगद्यानुसारेण च स्वभक्तचित्ताकर्षविनोदाय युद्धादिक्रीडानिमित्ततया तस्य दुर्घटघटनाकारिण्येच्छयैव वारत्रयं स्वीयस्य अणिमादिसिद्धिमयपरमज्योतिर्देहस्य गुणमयपार्थिवदेहान्तरप्रवेशः । अत एव सप्तमे "कृष्णचक्रहतांहसौ" (भा० ७।१।४५) इत्यत्र टीका च "कृष्णचक्रेण हतमंहो ययोस्तौ तयोः पापमेव हतं न तु तावित्यर्थः" इत्येषा ।
तथा तदर्थमेव श्रीकृष्णेच्छयैवात्रापि तासामप्राकृतविग्रहाणामेव तदभिसारप्रतिरोधसमये (भा० १०।३३।३८) —

नासूयन् खलु कृष्णाय मोहितास्तस्य मायया ।
मन्यमानाः स्वपार्श्वस्थान् स्वान् स्वान् दारान् व्रजौकसः ॥ ४१४ ॥

इतिवत् तात्कालिककल्पितो यो गुणमयो देहस्तत्र प्रवेशः ।
इममेवापेक्ष्य दार्ष्टान्तिकेऽप्युक्तम् "जहुर्गुणमयं देहम्" (भा० १०।२९।११) इति विशेषणवैयर्थ्यान् न तु स्वमित्यर्थः । तत्र च यथा तयोः सद्वेषस्याप्यनुस्मरणस्य प्रभावेन तादृशोपाधिपरित्यागात् ततोऽन्तर्धाय भगवतः प्राप्तिस्तथा सुतरामेव सप्रीतेस्तस्य प्रभावेन तत्प्राप्तिः ।
अत्र च भक्तचित्ताकर्षणमेवं सम्भवति — अहो तादृशोऽसौ श्रीकृष्णे मधुरिमा येन ताः स्वसाक्षात्काराय प्राणानपि त्याज्यन्ते स्मेति ।
"नृणाम्" इति सामान्यतो जीवानामेव निःश्रेयसाय व्यक्तौ सत्यां भक्तानां तु सुतरामेवेत्यायातम् । अन्यथा तस्य व्यक्तिरेव न सम्भवेदित्याह — अव्ययस्येति । निर्गुणस्य प्राकृतगुणरहितस्य गुणात्मनः । तत्र ये चैश्वर्यादयो गुणास्ते आत्मनः स्वरूपाण्येव यस्य तस्य । तर्ह्येतादृशलीलया कथं नृणां निःश्रेयसं भवति ? उच्यते — एतद्बोधनेन भवतीत्याह "कामम्" इति ।
अत्र तन्मयताशब्देन तत्प्रचुरतोच्यते । तत्र कामस्नेहादिषु तदुपरक्तात्मतेति पर्यवसानम् । स्त्रीमयो जाल्म इतिवत् । क्रोधभयैक्येषु तु प्रायस्तत्प्रलीनतेति दुग्धमयं जलमितिवत् । एकस्यैव शब्दस्य विशेषणवशादर्थभेदश्च युज्यते "स्याच् चैकस्य ब्रह्म शब्दवत्" (ब्र० सू० २।३।४) इति न्यायेन । क्रोधभययोरत्र पठनमन्येषु कैमुत्योपपादनायैव न तु तदुपदेशविवक्षया ।
न च श्रीगोपिकादीनां ये कामादयो भावास्तदनुसरणेनान्ये कृतार्था भवन्तीति चित्रमित्याह — न चेति ।
किं वक्तव्यमेकेषां विमुक्तिर्जगतोऽपि सम्भवतीत्याह — यत इति ।
एके तु प्रकटलीलायामाराधनपाकादागन्तुक्य एवैता न तु नित्यसिद्धवत् सच्चिदानन्ददेहं प्राप्ताः । ततो न दोष इति वर्णयन्ति ॥ श्रीशुकः ॥

१४६ । अथ पूर्ववदिहापि श्रीव्रजेश्वरादीनां प्राचीनजन्मादिकं व्याख्येयम् । तथा हि (भा० १०।८।४५) —

त्रय्या चोपनिषद्भिश्च साङ्ख्ययोगैश्च सात्वतैः ।
उपगीयमानमाहात्म्यं हरिं सामन्यतात्मजम् ॥ ४१५ ॥

इत्येतत् "नेमं विरिञ्चो न भवः" (भा० १०।९।२०) इति वक्ष्यमाणानुसारिमहामाहात्म्यं श्रुत्वा विस्मितमनाः श्रीराजोवाच (भा० १०।८।४६-७) —

नन्दः किमकरोद् ब्रह्मन् श्रेय एवं महोदयम् ।
यशोदा च महाभागा पपौ यस्याः स्तनं हरिः ॥ ४१६ ॥
पितरौ नान्वविन्देतां कृष्णोदारार्भकेहितम् ।
गायन्त्यद्यापि कवयो यल् लोकशमलापहम् ॥ ४१७ ॥

ययोः प्रसन्नोऽवतीर्णस्तौ पितरावपि ॥

१४७ । तदेवं प्रश्नमवधार्य श्रीशुक उवाच (भा० १०।८।४८) —

द्रोणो वसूनां प्रवरो धरया भार्यया सह ।
करिष्यमाण आदेशान् ब्रह्मणस्तमुवाच ह ॥ ४१८ ॥

आदेशान् गोपालनादिलक्षणान् ॥

१४८ । किमुवाच ? तदाह (भा० १०।८।४९) —

जातयोर्नौ महादेवे भुवि विश्वेश्वरे हरौ ।
भक्तिः स्यात् परमा लोके ययाञ्जो दुर्गतिं तरेत् ॥ ४१९ ॥

स्पष्टम् ॥

१४९ । ततश्च (भा० १०।८।५०-५१) —

अस्त्वित्युक्तः स एवेह व्रजे द्रोणो महायशाः ।
जज्ञे नन्द इति ख्यातो यशोदा सा धराभवत् ॥ ४२० ॥
ततो भक्तिर्भगवति पुत्रीभूते जनार्दने ।
दम्पत्योर्नितरामासीद् गोपगोपीषु भारत ॥ ४२१ ॥

अन्येषां यः पुत्रो नासीत् तस्मिंस्तु तयोः पुत्रतां प्राप्त इति च्विप्रत्ययार्थः — भक्तिविशेषमात्रेणैवोदयविशेषनियमात् । वात्सल्याभिधप्रेमविशेषेणैव श्रीकृष्णः पुत्रतयोदेति न तु स्वदेहादाविर्भावेन ।

हिरण्यकशिपुसभास्तम्भे श्रीनृसिंहस्य ब्रह्मणि श्रीवराहस्य च पितृत्वाप्रयोगात् न च गर्भ-प्रवेशेन परीक्षिद्रक्षणार्थं तत्प्रविष्टस्यापि तस्योत्तरामातृत्वाश्रवणात् । तादृशप्रेमा तु शुद्धः समुद्रिक्तश्च श्रीव्रजेश्वरयोरेव ।

अत एव गर्भप्रवेशादिकं विनापि तयोः पुत्रतया तस्य प्रसिद्धिः । यथा "नन्दस्त्वात्मज उत्पन्ने" (भा० १०।५।१) इत्यादौ तथा चोपासना च यथा "सकललोकमङ्गलो नन्दगोपतनयः" इत्यादौ । न त्वेवं स्तम्भादेः ।

किं च श्रीमदानकदुन्दुभिप्रभृतिष्वाविर्भावोऽपि न प्राकृतवत् तदीयचरमधात्वादौ प्रवेशः । किं तु सच्चिदानन्दविग्रहस्य तस्य तन्मनस्यावेश एव । तदुक्तम् (भा० १०।२।१८) —

ततो जगन्मङ्गलमच्युतांशं समाहितं शूरसुतेन देवी ।
दधार सर्वात्मकमात्मभूतं काष्ठा यथानन्दकरं मनस्तः ॥ ४२२ ॥ इति ।

ततः श्रीनारदप्रह्लादध्रुवादिषु दर्शनात् सर्वसम्मतत्वात् तादृशप्रेमविषयत्वेन साक्षाच्च श्रीभगवदाविर्भावाव्यवहितपूर्वप्रचुरकालं व्याप्य सन्ततस्तदावेशः श्रीव्रजेश्वरयोरप्यवश्यमेव कल्प्यते । ब्रह्मवरप्रार्थनयापि तदेव लभ्यत इति समान एव पन्थाः ।

वात्सल्यं त्वत्राधिकं येन विना तस्य पुत्रभावो न सम्भवतीत्यत्रैव पुत्रतां मन्यामह इति पुत्रीभूत इत्यस्य भावः ।

इदं प्रकटलीलायामेव समाहितमन्यस्यान् तु तयोर्नित्यसिद्धत्व एव पुरतोऽवधारयिष्यमाणे लक्ष्मीविष्णोरनादितया आदिरससिद्धदाम्पत्यवत् श्रीव्रजेश्वरयोस्तस्य चानादितो वत्सलरससिद्धपितृपुत्रभावो विद्यत एव ।

अतः पुत्रभूत इति च क्वचित् पाठः "प्रागयं वसुदेवस्य क्वचिज् जातस्तवात्मजः" (भा० १०।८।१४) इत्यत्र सत्यवचसः श्रीगर्गस्याप्ययमभिप्रायः ।

श्रीदेवक्याम् "उपसंहर विश्वात्मन्नदो रूपमलौकिकम्" (भा० १०।३।३०) इति प्रार्थितवत्यां श्रीभगवान् श्रीदेवकीमनसि स्फुरितचरं सम्प्रति बहिश्चाविर्भूतं चतुर्भुजत्वमन्तर्भाव्य श्रीव्रजेश्वरी मनसि स्फुरितं द्विभुजत्वं तत्राविर्भावितवान् । तस्यास्तस्या मनसि स्फूर्तिभेदश्च तथा तथाविर्भावभेदाद् गम्यते "फलेन हि फलकारणमनुमीयते" इति ।

अत एव "न ह्यस्यास्ति प्रियः कश्चित्" (भा० १०।४६।३७) इत्यादि प्रकरणे (भा० १०।४६।४२) —

युवयोरेव नैवायमात्मजो भगवान् हरिः ।
सर्वेषामात्मजो ह्यात्मा पिता माता स ईश्वरः ॥ ४२३ ॥

इत्येतत् श्रीव्रजेश्वरौ प्रति श्रीमदुद्धववाक्यम् ।

तदौदासीन्यप्रकटनेनापातसान्त्वनमात्रतात्पर्यकबाह्यार्थमपि वास्तवमर्थं त्वेवं वहति — पूर्वोक्तप्रकारेणायं प्रियाप्रियादिमातापितादिरहितोऽपि भगवान् हरिर्यः सोऽयं कृष्णरूप-

त्वेन विशेषाकारः सन् युवयोरेवात्मजो भवति नैव सर्वेषाम् । स एवेश्वररूपत्वेन सामान्याकारतस्तु सर्वेषामात्मजादिसर्वरूपः स्यात् । किन्तु परत्र मायामयत्वान् नास्माकमादरः । पूर्वत्र तु मुमुक्षुमुक्तभक्तश्लाघ्यप्रेममयत्वादत्यादर इति भावः । तथोक्तं प्रागेव (भा० १०।४६।२९-३०) —

तयोरित्थं भगवति कृष्णे नन्दयशोदयोः ।
वीक्ष्यानुरागं परमं नन्दमाहोद्धवो मुदा ॥ ४२४ ॥
युवां श्लाघ्यतमौ नूनं देहिनामिह मानद ।
नारायणेऽखिलगुरौ यत् कृता मतिरीदृशी ॥ ४२५ ॥ इति ।

तथा (भा० १०।४५।२२) —

स पिता सा च जननी यौ पुष्णीतां स्वपुत्रवत् ।
शिशून् बन्धुभिरुत्सृष्टानकल्पैः पोषरक्षणे ॥ ४२६ ॥

इति श्रीव्रजेश्वरं प्रति श्रीरामकृष्णाभ्यां सान्त्वनं च । श्रीरामस्यैव परपुत्रमपेक्ष्येति ज्ञेयम् । यथोक्तं तत्रैव तेन (भा० १०।४५।२३) —

यात यूयं व्रजं तात वयं च स्नेहदुःखितान् ।
ज्ञातीन् वो द्रष्टुमेष्यामो विधाय सुहृदां सुखम् ॥ ४२७ ॥ इति ।

"द्रष्टुमेष्यामः" इति मम तत्रागमनस्य भवद्दर्शनमेव पुरुषार्थ इत्यनेन युष्मानपश्यन्त एव स्थास्याम इत्यर्थः ।
यद्वा "तथापि भूमन् महिमागुणस्य ते विबोद्धुमर्हति" (भा० १०।१४।६) इत्यत्र विबोद्धुं बोधगोचरीभवितुमितिवद् द्रष्टुं दर्शनगोचरीभवितुमित्यर्थः । तत्र हेतुः — ज्ञातीनिति । तस्मादनयोरेव मुख्यं पुत्रत्वं श्रीकृष्णे विराजत इति सिद्धम् ॥

१५० । प्रकृतमनुसरामः । गोपगोपीनामपि तस्मिन् प्रेमासीदेव । दम्पत्योस्तयोस्तु तास्वपि नितरामासीदित्युपसंहरति (भा० १०।८।५२) —

कृष्णो ब्रह्मण आदेशं सत्यं कर्तुं व्रजे विभुः ।
सहरामो वसंश्चक्रे तेषां प्रीतिं स्वलीलया ॥ ४२८ ॥

स्वेषु भक्तजनविशेषेषु या लीला तद्भक्तिविशेषवशलीलाविशेषस्तयैव तेषां सर्वेषामपि प्रीतिं चक्रे । द्वावेव तौ प्रति तेन वरदानादिति भावः । यद्यप्येवं तथापि ब्रह्मण आदेशं सत्यं कर्तुमहदाशीरन्यथा न स्यादिति दर्शयितुमपीत्यर्थः ।
यद्वा स्वलीलया तेषां प्रीतिं कर्तुं व्रजे वसन् ब्रह्मण आदेशं सत्यं चक्रे । तदनुषङ्गतः स्वयमादृत्य सर्वत्राव्यभिचारिणं चकारेति ॥ श्रीशुकः ॥

१५१ । तदेतदपि कारणं तदाभासमेव मन्यमानस्तयोर्ब्रह्मादिभ्योऽपि सौभाग्यातिशयस्य ख्यापनार्थमनन्तरमेव "एकदा गृहदासीषु" (भा० १०।९।१) इत्याद्यध्यायमारब्धवान् । तत्रैव च साक्षाच्छ्रीभगवद्बन्धनरूपमहावशीकरणकारणवात्सल्यमपि विदितं तेन ब्रह्मणा शिवलक्ष्मीभ्यामपि दुर्लभं भगवत्प्रसादभरमाह (भा० १०।९।२०) —

नेमं विरिञ्चो न भवो न श्रीरप्यङ्गसंश्रया ।
प्रसादं लेभिरे गोपी यत् तत् प्राप विमुक्तिदात् ॥ ४२९ ॥

"स आदिदेवो जगतां परो गुरुः" (भा० २।९।५) इत्युक्तेर्विरिञ्चस्तावद् भक्तादिगुरुः स च । भवस्तु "वैष्णवानां यथा शम्भुः" (भा० १२।१३।१६) इत्यादिदर्शनात् ततोऽप्युत्कर्षवान् स च । श्रीस्तु तयोरपि भगवद्भक्तिशिक्षानिदर्शनप्रथमरूपत्वात् परमोत्कर्षवती ।

तदेवमुत्तरोत्तरविन्यासेन यथोत्तरमहिमानं सूचयित्वा श्रीस्तु न केवलं भक्तिमात्रेण तादृश्येव । किं तर्हि परमसख्येन ततोऽप्यनिर्वचनीयमाहात्म्येत्याह — अङ्गसंश्रयेति । एवम्भूतापि सा च प्रसादं लेभिरे एव । कस्मात् ? विमुक्तिदात् "अस्त्वेवमङ्ग भगवान् भजतां मुकुन्दो मुक्तिं ददाति कर्हिचित् स्म न भक्तियोगम्" (भा० ५।६।१८) इत्युक्तरीत्या प्रायो विमुक्तिमेव ददाति न तु तथाभूतं प्रसादं तस्माच्च श्रीभगवत एव किन्तु गोपी श्रीगोपेश्वरी यत्तदनिर्वचनीयं प्रसादशब्देनापि वक्तुं शङ्कनीयं तस्मात् प्राप तद्रूपं प्रसादं विरिञ्चश्च भवश्च श्रीश्च न लेभिरे न लेभिरे न लेभिरे इत्यर्थः । "लेभिरे" इत्यस्य प्रत्येकं नञ्त्रयेणान्वयः । नञस्त्रिरावृत्तिश्च निषेधस्यातिशयार्था ।

पूर्वोत्तराध्यायद्वये श्रीबादरायणैर्विवक्षितमिदम् । द्रोणधरयोस्तावत् साधारणदेवतात्वं चेत् तर्हि तयोः श्रीशिवादिदुर्लभचरणारविन्दस्फूर्तिलेशस्य श्रीकृष्णस्य तथा प्राप्तौ स्वतः सम्भावना नास्ति । न च तयोस्तादृशगाढभजनादिकं कुत्रचिद् वर्ण्यते । अन्यथा तदेवाहमाख्यास्यम् । न च ताभ्यां यदीदृशं फलं लब्धं तद्ब्रह्मणि पूर्वं प्रार्थितं किन्तु दुर्गतितरणहेतुत्वेनोत्तमभक्तिमात्रं प्रार्थितम् । न च ब्रह्मापि श्रीकृष्णस्य महाभक्तैरपि दुर्लभपुत्रत्वादिकं विशिष्य ताभ्यां च वरं दत्तवान् । न च "नेमं विरिञ्चः" इत्यादिनोच्यमानतादृशप्रसादाप्तिराहित्यस्य ब्रह्मणो वरस्तादृशफलदाने भवति समर्थः । वक्ष्यते च तस्य तत्प्रसादाप्तिराहित्यातिशयः "तद् भूरिभाग्यमिह जन्म किमप्यटव्यां यद् गोकुलेऽपि कतमाङ्घ्रिरजोऽभिषेकम्" (भा० १०।१४।३४) इत्यादिना ।

तस्मात् तयोस्तादृशमहोदये कारणं नास्ति किन्तु निष्कारणत्वेन तयोर्नित्यामेव तादृशीं स्थितिं विज्ञाय मया स्वभक्तिविशेषप्रचारकारणकश्रीभगवदिच्छयैव द्रोणधरारूपेणांशेनैवावतीर्णयोरैक्यविवक्षया यथा कथञ्चित् कारणाभास एवोपन्यस्त इति ।

किं च श्रीमद्भागवतेऽस्मिन् श्रीभगवत्प्रेमैव सर्वपुरुषार्थशिरोमणित्वेनोद्घुष्यते । तस्य च परमाश्रयरूपं श्रीगोकुलमेव । तत्रापि श्रीव्रजेश्वरौ । ततस्तत् परमाश्रयनित्यत्वे सिद्ध एव तादृशग्रन्थप्रयत्नः सफलः स्यात् । यत एव श्रीब्रह्मादिभिस्तत्र यत् किञ्चिज् जन्म प्रार्थ्यत इति ॥

१५२ । तस्मात् स्वाभाविक्येव तयोस्तादृशी स्थितिरिति प्रतिपादयंस्तत्सम्बन्धेनैव भजतां सुखापो नान्येषामित्याह (भा० १०।९।२१) —

नायं सुखापो भगवान् देहिनां गोपिकासुतः ।
ज्ञानिनां चात्मभूतानां यथा भक्तिमतामिह ॥ ४३० ॥

सुखेनाप्यत इति सुखापः । अयं श्रीगोपिकासुतो भगवान् देहिनां देहाभिमानिनां तपआदिना न सुखापः । न सुलभः । किन्तु तैरतिचिरेणैव तेन शुद्धेऽन्तःकरणे कथञ्चिद् भक्तावलोकनलेशेन जातसद्बुद्धिभिस्तदेव तपआदिकं तस्मिन्नर्पयद्भिः कथञ्चिदेवासौ लभ्यते ।
तथा चात्मभूतानामाविर्भूताद्वैतवृत्तीनां निवृत्तदेहाभिमानानां ज्ञानिनामपि तादृशेन ज्ञानेन न सुखापः किन्तु पूर्वेणैव कारणेन जाततदासत्तिभिस्तेन ज्ञानेन यद्ब्रह्म स्फुरति तदेवायमिति चिन्तयद्भिस्तैः कथञ्चिदेवासौ लभ्यते ।
ततश्च द्वयोरपि तयोः साधनयोर्हीनत्वात् तल्लाभश्च न साक्षात् किन्तु केनचिदंशेनैवेति व्यञ्जितम् “ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः” (गीता १२।४) । “क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम्” (गीता १२।५) इति श्रीभगवदुक्तेः ।
“शाब्दे परे ब्रह्मणि धर्मतो व्रतैः स्नातस्य मे न्यूनमलं विचक्ष्व” (भा० १।५।७) इति श्रीव्यासप्रश्नानन्तरात् (भा० १।५।८) —

भवतानुदितप्रायं यशो भगवतोऽमलम् ।
येनैवासौ न तुष्येत मन्ये तद् दर्शनं खिलम् ॥ ४३१ ॥

इति श्रीनारदप्रतिवचनाच्च ।
सुखापस्तु केषामित्यपेक्षायां निदर्शनमाह — इह श्रीगोपिकासुते भक्तिमतां यथा सुखाप इति । तथा च श्रीब्रह्मोक्तिः “ज्ञाने प्रयासमुदपास्य” (भा० १०।१४।३) इत्यादि ।
श्रीनारदोक्तिश्च “यजते यज्ञपुरुषं स सम्यग्दर्शनः पुमान्” (भा० १।५।३८) इति ।
श्रीगोपिकायास्तु सुखाप इति एवं किं वक्तव्यम् ? तस्याः सुत एवायं भगवानित्यतो गोपिकासुत इति विशेषणं दत्तम् ।
सुखमापयतीति वा सुखापः । ततश्चायं न देहाभिमानिनां सुखापः । यतो गोपिकासुतस्तत्सुतत्वलीलायाः स्वसाधारणदृष्ट्यानादरात् ।
तथा ज्ञानिनामपि न सुखापः । यत एव गोपिकासुतः — सर्वात्मैकवृत्त्युदयेन भगवत्स्वरूपानन्दवैचित्रीसारोपरिचरतल्लीलातत्त्वानुभवात् । यथेह श्रीगोपिकासुते भक्तिमतामिति निदर्शनम् ।
सुखेनाप्यते ज्ञायते इति वा सुखापः सुबोधः । ततश्चायं देहाभिमानिभिस्तर्कादिना न सुबोधः । तथा ज्ञानिभिरपि ज्ञानेन न सुबोधः । तत्र पूर्ववद्धेतुर्गोपिकासुत इति ।
ननु देहाभिमानिभिरपि तत्तदलौकिककर्मलिङ्गकात् तर्कात् ज्ञानिभिरप्यनावृतब्रह्मत्वावगमात् सुबोध एव । सत्यं तथापि यथेह श्रीगोपिकासुते भक्तिमद्भिः सुबोधस्तथा न ।

ते हि श्रीकृष्णभक्ताः “स्वसुखनिभृतचेतास्तद्व्युदस्तान्यभावोऽप्यजितरुचिरलीलाकृष्ट-सारः” (भा० १२।१२।६८) इत्यादिदर्शनात् तादृशलीलानुभवस्यैव परमपुरुषार्थत्वमवगच्छन्तीति भावः ।

अत्रार्थत्रयेऽपीहपदेन श्रीपरव्योमनाथादिभक्तिमन्तोऽपि व्यावृत्ताः । गोपिकासुत इति विशेषणेन च त्रैकालिकतद्भक्तानां तत्सम्बन्धिसुखापत्वं प्रति तत्सुतत्वायोगतदन्यत्व-योगौ व्यवच्छिद्येते । इत्यतो विद्वदनुभवयाथार्थ्येन नित्य एव तत्सम्बन्धो विवक्षितः । अत एवायं गोपिकासुत इति स्वयमपि साक्षादङ्गुल्या निर्दिश्यते । तस्मादपि साधूक्तं नित्य एव श्रीव्रजेश्वरयोस्तत्सम्बन्ध इति ।

अत्र “एकदा गृहदासीषु” (भा० १०।९।१) इत्यादिकम् । “नेमं विरिञ्चः” (भा० १०।९।२०) इत्यादि पद्यद्वयान्तमिदमुत्तरवाक्यम् “द्रोणो वसूनां प्रवरः” (भा० १०।८।४८) इत्यादिकस्य पूर्ववाक्यस्य बाधकत्वेनैवोक्तं पूर्वविरोधधर्मान्तरप्रतिपादनादयुक्तत्वाच्च पूर्वस्य “असद्व्यपदेशान् नेति चेन् न धर्मान्तरेण वाक्यशेषात्” (ब्र० सू० २।१।१७) इतिवत् । तत्र च यथैवासच्छब्दस्य गत्यन्तरं चिन्त्यते तथात्रापि । तच्च पूर्वमेव दर्शितं पूर्वोत्तरा-ध्यायद्वये बादरायणे विवक्षितमिदमारभ्य प्रकरणेन ॥ श्रीशुकः ॥

१५३ । तदेवं श्रुतिपुराणादिनिगमोक्त्यनुसारेण श्रीकृष्णस्य नित्याभिव्यक्तित्वं द्वारकादिषु नित्यविहारित्वं नित्ययादवादिपरिकरत्वं च दर्शितम् । इत्थमेव च “कृष्णस्तु भगवान् स्वयम्” (भा० १।३।२८) इति सुसिद्धम् ।

अथाशङ्कते—यदि नित्यमेव तथाविधः श्रीकृष्णाख्यः स्वयं भगवान् तत्र तत्र तैर्निजपरि-करैः सार्धं विहरति तर्हि कथं ब्रह्मादिप्रार्थनया श्रीनारायण एवावततारेति श्रूयते ? तस्य यदि श्रीकृष्णे प्रवेशस्तर्हि च कथं नित्यं द्वारकादिषु विराजमानं स्वयं भगवन्तं परित्य-ज्य ते तस्मै निवेदयितुं गताः ? कथं वा जन्मादिलीलया क्रमेण मथुरां गोकुलं पुनर्मथुरां द्वारकां च त्यक्त्वा वैकुण्ठमारूढवानिति ।

अत्रेदमुच्यते—यो द्वारकादौ नित्यं विहरति स श्रीकृष्णाख्यः स्वयं भगवान् परात्परो ब्रह्मादिष्वप्रकट एव प्रायशः । यस्तु क्षीरोदादिलीलाधामा नारायणादिनामा पुरुषः स एव विष्णुरूपः साक्षाद्वा निजांशेन वा तेषु प्रकटः सन् ब्रह्माण्डपालनादिकर्तेत्युक्तमेव । तत्र ब्रह्माण्डाधिकारिणो ब्रह्मादयोऽपि ब्रह्माण्डकार्यं तस्मा एव निवेदयितुमर्हन्ति । ततस्त-दापि तस्मा एव पृथिवीभारावताराय निवेदितवन्तः ।

अनन्तरं सोऽपि पुरुषस्तान् प्रति केशदर्शनेन “स यावदुर्व्या भरमीश्वरेश्वरः” (भा० १०।१।२२) इत्यादिवाक्येन च स्वयं भगवत एवावतारसमयोऽयमिति सूचयित्वा स्वय-मप्यवतितीर्षां चकार । सा चावतितीर्षा पूर्वयुक्त्या प्रकटीभवति स्वयं भगवति प्रवे-शायैव । तदेवं वैकुण्ठाद्यारोहणमपि तत्तदंशेनैव । स्वयं तु तत्र तत्रैव पुनर्निगूढं लीला-यते । अत्रोदाहृतं तन्त्रभागवतादिवाक्यं वाराहादिवाक्यं चानुसन्धेयम् । उदाहरिष्यते च “नित्यं सन्निहितस्तत्र भगवान् मधुसूदनः” (भा० ११।३१।२४) इत्यादिकम् ।

एष चाभिसन्धिर्न सर्वैरेवाबुध्यतेति । यथा स्वस्वदृष्टमेव मुनिभिस्तादृग् वर्ण्यते । यथा समुद्रतीरस्थदृष्ट्यैव “अद्भ्यो वा एष प्रातरुदेत्यपः सायं प्रविशति” इति श्रुतिः प्रवर्तते न तु

वस्तुत इति प्राञ्चः । यदि तत्र सुमेरुपरिभ्रमणादिवाक्येनान्यथा गतिः क्रियते तदात्रापि स्वयं भगवत्तानित्यविहारितादिप्रतिपादकवाक्येन कथं नाम न क्रियताम् ? तथा मथुरादिपरित्यागाद्युक्तिरवतारे प्रापञ्चिकजनप्रकटलीलापेक्षयैव । तदप्रकटा तु लीला नित्यमेव विद्यते एव ।
तस्मान् नित्यत्वेन जन्मादिमयत्वेन च लीलाप्रतिपादकानां वाक्यानां समन्वयस्वारस्यादिदं लभ्यते । यथा य एव श्रीकृष्णस्तत्र तत्र नित्यमप्रकटो विहरति स एव स्वयं जन्मादिलीलया प्रकटो भवति । तत्र च नारायणादयोऽपि प्रविशन्तीति सर्वं शान्तम् ।
तदेवं श्रीकृष्णलीला हि द्विविधा । अप्रकटरूपा प्रकटरूपा च । प्रापञ्चिकलोकाप्रकटत्वात् तत्प्रकटत्वाच्च । तत्राप्रकटा (गो० ता० उ० २।३६) —

यत्रासौ संस्थितः कृष्णस्त्रिभिः शक्त्या समाहितः ।
रामानिरुद्धप्रद्युम्नै रुक्मिण्या सहितो विभुः ॥ ४३२ ॥

इति मथुरातत्त्वप्रतिपादकश्रीगोपालतापन्यादौ "चिन्तामणिप्रकरसद्मसु" (ब्र० सं० ५।२९) इत्यादि वृन्दावनतत्त्वप्रतिपादकब्रह्मसंहितादौ च प्रकटलीलातः किञ्चिद् विलक्षणत्वेन दृष्टा, प्रापञ्चिकलोकैस्तद्वस्तुभिश्चामिश्रा, कालवदादिमध्यावसानपरिच्छेदरहितस्वप्रवाहा, यादवेन्द्रत्वव्रजयुवराजत्वाद्युचिताहरहर्महासभोपवेशगोचारणविनोदादिलक्षणा ।
प्रकटरूपा तु श्रीविग्रहवत् कालादिभिरपरिच्छेद्यैव सती भगवदिच्छात्मकस्वरूपशक्त्यैव लब्धारम्भसमापना प्रापञ्चिकाप्रापञ्चिकलोकवस्तुसंवलिता तदीयजन्मादिलक्षणा ।
तत्राप्रकटा द्विविधा — मन्त्रोपासनामयी स्वारसिकी च । प्रथमा यथा — तत्तदेकतरस्थानादिनियतस्थितिका तत्तन्मन्त्रध्यानमयी । यथा बृहद्ध्यानरत्नाभिषेकादिप्रस्तावः क्रमदीपिकायाम् । यथा वा "अथ वृन्दावनं ध्यायेत् सर्वदेवनमस्कृतम्" इत्यादि च श्रीगौतमीयतन्त्रे ।
यथा च (ब्र० सं० ५।३०–३१) —

वेणुं क्वणन्तमरविन्ददलायताक्षं बर्हावतंसमसिताम्बुदसुन्दराङ्गम् ।
कन्दर्पकोटिकमनीयविशेषशोभं गोविन्दमादिपुरुषं तमहं भजामि ॥ ४३३ ॥
आलोलचन्द्रकलसद्वनमाल्यवंशीरत्नाङ्गदं प्रणयकेलिकलाविलासम् ।
श्यामं त्रिभङ्गललितं नियतप्रकाशं गोविन्दमादिपुरुषं तमहं भजामि ॥ ४३४ ॥

इति ब्रह्मसंहितायाम् ।
"होमस्तु पूर्ववत् कार्यो गोविन्दप्रीतये ततः" इत्याद्यनन्तरम् —

गोविन्दं मनसा ध्यायेद् गवां मध्ये स्थितं शुभम् ।
बर्हापीडकसंयुक्तं वेणुवादनतत्परम् ।
गोपीजनैः परिवृतं वन्यपुष्पावतंसकम् ॥ ४३५ ॥

इति बोधायनकर्मविपाकप्रायश्चित्तस्मृतौ ।
“तदु होवाच हैरण्यो गोपवेशमभ्राभं तरुणं कल्पद्रुमाश्रितम्” ।
तदिह श्लोका भवन्ति—

सत्पुण्डरीकनयनं मेघाभं वैद्युताम्बरम् ।
द्विभुजं ज्ञानमुद्राढ्यं वनमालिनमीश्वरम् ॥ ४३६ ॥
गोपगोपीगवावीतं सुरद्रुमतलाश्रितम् ।
दिव्यालङ्करणोपेतं रत्नपङ्कजमध्यगम् ॥ ४३७ ॥
कालिन्दीजलकल्लोलसङ्गिमारुतसेवितम् ।
चिन्तयंश्चेतसा कृष्णं मुक्तो भवति संसृतेः ॥ ४३८ ॥

इति श्रीगोपालतापन्याम् “गोविन्दं सच्चिदानन्दविग्रहम्” (गो० ता० उ० १।३५) इत्यादि च ।
या तु तत्तत्कामनात्मकप्रयोगमयी पूतनावधादिरूपा “यद्यद्धिया त उरुगाय विभावयन्ति तत्तद्वपुः प्रणयसे सदनुग्रहाय” (भा० ३।९।११) इत्युक्तानुसारेणाद्यापि साधकहृदि कदाचित् साम्प्रतीव स्फुरति सा खलु मन्त्रोपासनामयीत्वेऽपि स्वारसिक्यामेव पर्यवस्यति सर्वत्रातीतत्वेन निर्दिष्टत्वात् ।
अथ स्वारसिकी च यथोदाहृतमेव स्कान्दे—

वत्सैर्वत्सतरीभिश्च सदा क्रीडति माधवः ।
वृन्दावनान्तरगतः सरामो बालकैः सह ॥ ४३९ ॥ इत्यादि ।

अत्र चकारात् श्रीगोपेन्द्रादयो गृह्यन्ते । रामशब्देन रोहिण्यपि । तथा “तेनैव क्रीडति” इत्यादिना व्रजागमनशयनादिलीलापि । क्रीडाशब्दस्य विहारार्थत्वाद् विहारस्य नानास्थानानुसरणरूपत्वादेकस्थाननिष्ठाया मन्त्रोपासनामय्या भिद्यतेऽसौ । यथावसरविविधस्वेच्छामयी स्वारसिकी । एवं ब्रह्मसंहितायाम् (ब्र० सं० ५।२९)—

चिन्तामणिप्रकरसद्मसु कल्पवृक्षलक्षावृतेषु सुरभिरभिपालयन्तम् ।
लक्ष्मीसहस्रशतसम्भ्रमसेव्यमानं गोविन्दमादिपुरुषं तमहं भजामि ॥ ४४० ॥
इत्यादि ।

“कथा गानं नाट्यं गमनमपि” (ब्र० सं० ५।५६) इत्यत्राप्यनुसन्धेयम् ।
तत्र नानालीलाप्रवाहरूपतया स्वारसिकी गङ्गेव । एकैकलीलात्मकतया मन्त्रोपासनामयी तु लब्धतत्सम्भवह्रदश्रेणीव ज्ञेया । किं च मन्त्रोपासनामय्यामपि व्रजराजादिसम्बन्धः श्रूयते । किमुत स्वारसिक्यामिति न कुत्रापि तद्रहितता कल्पनीया । तदेतत् सर्वं मूलप्रमाणेऽपि दृश्यते । तत्र प्रकटरूपा विस्पष्टैव ।

अथाप्रकटायां मन्त्रोपासनामयीमाह “मां केशवो गदया प्रातरव्याद् गोविन्द आसङ्गव-मात्तवेणुः” (भा० ६।८।२०) इति ।
“आत्तवेणुः” इति विशेषेण गोविन्दः श्रीवृन्दावनदेव एव तत्सहपाठात् केशवोऽपि श्रीमथुरानाथ एव तौ हि वृन्दावनमथुराप्रसिद्धमहायोगपीठयोस्तत्तन्नाम्नैव सहितौ प्रसिद्धौ । तौ च तत्र तत्र प्रापञ्चिकलोकदृष्ट्यां श्रीमत्प्रतिमाकारेणाभातः स्वजनदृष्ट्यां साक्षाद्रूपेण च । तत्रोत्तररूपं ब्रह्मसंहितायां गोविन्दस्तवादौ प्रसिद्धम् । अत एवात्रापि साक्षाद्रूपवृन्दप्रकरण एव एतौ पठितौ । ततश्च नारायणवर्माख्यमन्त्रोपास्यदेवतात्वेन श्रीगोपालतापन्यादिप्रसिद्धस्वतन्त्रमन्त्रान्तरोपास्यदेवतात्वेन च मन्त्रोपासनामय्यामिदमुदाहृतम् ॥ विश्वरूप इन्द्रम् ॥

१५४ । वक्ष्यमाणभगवदभिप्रायानुसारेण स्पष्टार्थत्वेन च वस्तुतः स्वारसिकीमाह (भा० १०।४६।३६) —

मा खिद्यतं महाभागौ द्रक्ष्यथः कृष्णमन्तिके ।
अन्तर्हृदि स भूतानामास्ते ज्योतिरिवैधसि ॥ ४४१ ॥

हे महाभागौ श्रीव्रजेश्वरौ ! मा खिद्यतं यतः श्रीकृष्णं द्रक्ष्यथः । कथम् ? यतः सोऽन्तिक एवास्ते । तस्यान्तिकस्थितेरव्यभिचारे दृष्टान्तः — भूतानामन्तर्हृदि परमात्मलक्षणं ज्योतिरिव एधसि चाग्निलक्षणं ज्योतिरितिवेति । अत्र निरन्तरतत्स्फूर्तिरेव भवतां प्रमाणमिति भावः । अर्थान्तरे तूत्तरार्धस्य हेतुत्वास्पष्टत्वम् । परमात्मरूपेणान्तर्हृदिस्थितस्यापि दर्शनानियमात् ॥ उद्धवः श्रीव्रजेश्वरौ ॥

१५५ । एवं श्रीभगवानुवाच “भवतीनां वियोगो मे न हि सर्वात्मना क्वचित्” (भा० १०।४७।२९) ।
मे मया सह भवतीनां योऽयं वियोगः स सर्वात्मना सर्वेणापि प्रकाशेन न विद्यते । किं तु ह्येकेन प्रकटलीलायां विराजमानेन प्रकाशेन वियोगः । अप्रकटलीलायां त्वन्येन प्रकाशेन संयोग एवेत्यर्थः ।
अत्रैतदुक्तं भवति “न चान्तर्न बहिर्यस्य” (भा० १०।९।१३) इत्यादि दामोदरलीलाप्रघट्टकदृष्ट्या मृद्भक्षणलीलादौ श्रीव्रजेश्वर्यादीनां तथानुभूत्या च श्रीविग्रहस्य मध्यमत्व एव विभुत्वं दृश्यते । तच्च परस्परविरोधिधर्मद्वयमेकत्राचिन्त्यशक्तिमति तस्मिन् नासम्भवम् “श्रुतेस्तु शब्दमूलत्वात्” इत्येतन् न्यायेन ।
तदेतच्च भगवत्सन्दर्भे (अनु० ३०–३९) विभुत्वप्रघट्टकेन विवृतमस्ति । तदेवं विभुत्वे सति युगपदनेकस्थानाद्यधिष्ठानार्थं रूपान्तरसृष्टिः पिष्टपेषिता । किन्तु युगपन्मध्यमत्वविभुत्वप्रकाशिकया तथैवाचिन्त्यशक्त्या तदिच्छानुसारेणैक एव श्रीविग्रहोऽनेकधा प्रकाशते बिम्ब इव स्वच्छोपाधिभिः ।
किन्तु अत्रोपाधिमात्रजीवनत्वेन साक्षात् स्पर्शाद्यभावेन वैपरीत्योदयनियमेन बिम्बस्य परिच्छिन्नत्वेन च प्रतिबिम्बत्वम् । अत्र तु स्वाभाविकशक्तिस्फुरितत्वेन साक्षात्स्पर्शादि-

भावेन यथेच्छमुदयेन श्रीविग्रहस्य विभुत्वेन च बिम्बत्वमेवेति विशेषः । एवमेव सर्वेषामपि प्रकाशानां पूर्णत्वमाह श्रुतिः (बृ० ६।५।४) —

पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥ ४४२ ॥ इति ।

अत्र च तेषां प्रकाशानां तथैवाचिन्त्यशक्त्या पृथक् पृथगेव क्रियादीनि भवन्ति । अत एव युगपदाविर्भूतानां प्रकाशभेदावलम्बिनीनां निमेषोन्मेषादिक्रियाणामविरोधः । अत एव विभोरपि परस्परविरुद्धक्रियागणाश्रयस्यापि तत्तत्क्रियाकर्तृत्वं यथार्थमेव । तद्यथार्थत्वे बहुशः श्रीभागवतादिवर्णितं विदुषां तु तदुद्भवं सुखं नोपपद्यत इति तदन्यथानुपपत्तिश्चात्र प्रमाणम् ।

इत्थमेवाभिप्रेत्य श्रीनारदेन "चित्रं बतैतदेकेन वपुषा युगपत् पृथक्" (भा० १०।६९।२) इत्यादौ वपुष एकत्वेऽपि पृथक् पृथक् प्रकाशत्वं तेषु प्रकाशेषु पृथक् पृथक् क्रियाधिष्ठानादित्वं तादृशशक्तिस्त्वन्यत्र मुनिजनादौ न सम्भवतीति स्वयं चित्रत्वं चोक्तम् ।

एष एव प्रकाशः क्वचिदात्मशब्देनोच्यते क्वचिद् रूपादिशब्देन च । यथा तत्रैव "न हि सर्वात्मना क्वचित्" इति । अन्यत्र "कृत्वा तावन्तमात्मानम्" (भा० १०।३३।१९) इति । "तावद्रूपधरोऽव्ययः" (भा० १०।५९।४२) इति च । "कृष्णेनेच्छाशरीरिणा" (भा० ११।३०।४०) इति च ।

तत्र नानाक्रियाद्यधिष्ठानत्वादेव लीलारसपोषाय तेषु प्रकाशेष्वभिमानभेदं परस्परमननुसन्धानं च प्रायः स्वेच्छयोरीकरोतीत्यपि गम्यते । एवं तच्छक्तिमयत्वात् तत्परिकरेष्वपि ज्ञेयम् । तत्र तेष्वपि प्रकाशभेदो यथा कन्याषोडशसहस्रविवाहे श्रीदेवक्यादिषु । उक्तं हि टीकाकृद्भिः "अनेन देवक्यादिबन्धुजनसमागमोऽपि प्रतिगृहं यौगपद्येन सूचितः" इति ।

तेषु श्रीकृष्णे च प्रकाशभेदादभिमानक्रियाभेदो यथा श्रीनारददृष्टयोगमायावैभवे तत्र ह्येकत्र (भा० १०।६९।२०) —

दीव्यन्तमक्षैस्तत्रापि प्रियया चोद्धवेन च ।
पूजितः परया भक्त्या प्रत्युत्थानासनादिभिः ॥ ४४३ ॥ इति ।

तत्रान्यत्र "मन्त्रयन्तं च कस्मिंश्चिन् मन्त्रिभिश्चोद्धवादिभिः" (भा० १०।६९।२७) इति ।

अत्र भावभेदादभिमानभेदो लक्ष्यते । अयमेव तदवस्थोऽहमत्रास्मीति । एवं षोडशसहस्रविवाहे कुत्रचित् श्रीकृष्णसमक्षं माङ्गलिकं कर्म कुर्वत्या देवक्यास्तद्दर्शनसुखं भवति । तत्परोक्षं तु तद्दर्शनोत्कण्ठेति । तथा योगमायावैभवदर्शन एव क्वचिदुद्धवेन संयोगः क्वचिद् वियोग इति विचित्रता ।

तदेवं तत्र प्रकाशभेदे सति तद्भावेनाभिमानक्रियाभेदे च स्थिते तदानीं वृन्दावनप्रकाशविशेषे स्थितेन श्रीकृष्णस्याप्रकटप्रकाशेन तासामप्रकटप्रकाशात्मिकानां संयोगः । तत्प्रकाशविशेषे प्राक्स्थितेन सम्प्रति मथुरां गतेन तत्प्रकटप्रकाशेन प्रकटप्रकाशात्मिकानां तासां

वियोग इति व्यवतिष्ठते । एतेन तदानीं प्रकाशद्वयेनैव स्वीकृतेन स्थानत्रयेऽपि सपरिकरश्रीकृष्णनित्यावस्थायितावाक्यमनुपहतं स्यात् । प्रकटलीलायामन्यत्र सपरिकरस्य तस्य कदाचिद् गमनेऽपि प्रकाशान्तरेणावस्थानादिति । तस्मात् साधूक्तम् "भवतीनां वियोगो मे" (भा० १० ।४७ ।२९) इत्यादि ।
सेयं च नित्यसंयोगिता परमरहस्येति ब्रह्मज्ञानसादृश्यभङ्ग्या समाच्छाद्यैवोपदिष्टा । दृश्यते चान्यत्रापि रहस्योपदेशेऽर्थान्तरसमाच्छन्नोक्तिः । यथा महाभारते जतुगृहं गच्छतः पाण्डवान् प्रति विदुरस्य । यथा वा षष्ठे हर्यश्वादीन् प्रति श्रीनारदस्य ॥

१५६ । तदेवं पुनरपि तथैवोपदिशति (भा० १० ।४७ ।२९) —

> यथा भूतानि भूतेषु खं वाय्वग्निर्जलं मही ।
> तथाहं च मनःप्राणभूतेन्द्रियगुणाश्रयः ॥ ४४ ॥

यथा खादीनि कारणरूपाणि भूतानि वाय्वादिषु स्वस्वकार्यरूपेषु भूतेष्ववस्थितानि । तत्राकाशस्य स्थितिर्वायौ वायोरग्नावित्यादि । तथा भवतीष्वहं बहिरनुपलभ्यमानोऽपि नित्यं तिष्ठाम्येवेत्यर्थः । कथम्भूतोऽहम् ? भवतीनां मदेकजीवातूनां मनआद्याश्रयः । अन्यथा निमेषमपि मद्वियोगेन तान्यपि न तिष्ठेयुरिति भावः ।
यद्वा किंरूपस्तिष्ठसि ? इत्याकाङ्क्षायामाह — भवतीनां मनआद्याश्रयभूतो यो द्विभुजो श्यामसुन्दरवेणुविनोदिरूपस्तद्रूप एवेति ॥

१५७ । नन्वित्थं प्रकाशवैचित्री कथं स्यात् यया विरहसंयोगयोर्युगपदेव स्थितिरित्याशङ्क्याह (भा० १० ।४७ ।३०) —

> आत्मन्येवात्मनात्मानं सृजे हन्म्यनुपालये ।
> आत्ममायानुभावेन भूतेन्द्रियगुणात्मना ॥ ४५ ॥

आत्मनि अनन्तप्रकाशमये श्रीविग्रहलक्षणे स्वस्मिनात्मना स्वयमात्मानं प्रकाशविशेषं सृजे अभिव्यञ्जयामि । केन ? निमित्तभूतेन आत्मामायानुभावेन । अचिन्त्यायाः स्वरूपशक्तेः प्रभावेण "स्वरूपभूतया नित्यशक्त्या मायाख्यया युतः" इति मध्वभाष्यधृतचतुर्वेदशिखातः ।
कीदृशेन ? भूतेन्द्रियगुणात्मना भूतानि परमार्थसत्यानि यानि ममेन्द्रियाणि ये च गुणा रूपरसादयस्तेषामात्मना प्रकाशकेनेत्यर्थः ।
बुद्धीन्द्रियेति पाठे आत्मनेत्यस्य विशेषणम् । बुद्धयोऽन्तःकरणानि इन्द्रियाणि बहिःकरणानि गुणा रूपादयस्तानि सर्वाण्यपि आत्मा स्वरूपं यत्र तेनेति ।
तदेवमाविर्भूय अनु पश्चात् कदापि हन्मि ततोऽन्यत्र गच्छामि । हन् — हिंसागतयोः । कदाप्यनु तत्पश्चात् पुनः पालये स्वयमागत्य पालयामि निजविरहदूनानिति शेषः । एतत्कारणं तु "यत् त्वहं भवतीनां वै" (भा० १० ।४७ ।३४) इत्यादौ वक्ष्यते ।

हन्तेरर्थान्तरे त्रयाणामेककर्मकर्तृत्वेऽपि तमात्मानं प्रकाशं कदाचित् तिरोधापयामि । तस्मात् तं प्रकाशमाकृष्य प्रकाशवैविध्यमेकीकरोमीत्यर्थः ।
एवमेव दशमसप्ततिममाध्याये स्वामिभिरपि व्याख्यातम् "एवं सर्वगृहेभ्यः पृथक् पृथङ् निर्गत्यानन्तरमेक एव सन सुधर्मां प्राविशत्" (भा० १०।७०।१७) इति ।
यथा च माध्वभाष्यधृतं पाद्मवचनम् —

स देवो बहुधा भूत्वा निर्गुणः पुरुषोत्तमः ।
एकीभूयः पुनः शेते निर्दोषो हरिरादिकृत् ॥ ४४६ ॥ इति ।

श्रुतिश्च शाङ्करभाष्यधृता "स एकधा भवति द्विधा भवति" इत्याद्या ।
तदनन्तरं पुनरपि तमात्मानं पालये पुनरभिव्यज्य निजप्रेष्ठजनैः सह क्रीडया सम्भूतानन्दं करोमीत्यर्थः । एवं हन्तिरश्लीलोऽपि स्ववियोगिजनविषयककारुण्यकृतभावान्तरेण स्वयमेव प्रयुक्त इति न दोष आशङ्क्यः "छिन्द्यां स्वबाहुमपि वः प्रतिकूलवृत्तिम्" (भा० ३।१६।६) इतिवत् ॥

१५८ । ननु प्रकटमेव मथुरायां विक्रीडसि तर्ह्यत्राप्यधुना विक्रीडसीत्यत्रास्माकं सम्भावना कथं जायताम् ? इत्याशङ्क्य तासामेवानुभवं प्रमाणयति (भा० १०।४७।३१) —

आत्मा ज्ञानमयः शुद्धो व्यतिरिक्तोऽगुणान्वयः ।
सुषुप्तिस्वप्नजाग्रद्भिर्मनोवृत्तिभिरीयते ॥ ४४७ ॥

यद्वा आस्तां तावदप्रकटलीलायां मद्वियोगाभाववार्ता, प्रकटलीलायामपि तथानुसन्धीयतामित्याह — आत्मा ज्ञानमय इत्यादि ।
अर्थश्चायम् — आत्मशब्दोऽस्मिन्नस्मच्छब्दार्थपरस्ततश्च आत्माहं श्रीकृष्णलक्षणो भवतीनां सुषुप्त्यादिलक्षणाभिर्मनोवृत्तिभिरीयतेऽनुभूयत एव ।
कीदृशः ? ज्ञानमयो नानाविद्याविदग्धः । शुद्धो दोषरहितः । विगतोऽतिरिक्तो यस्मादिति वा विशेषेणातिरिक्त इति वा व्यतिरिक्तः सर्वोत्तमः । गुणान्वयः सर्वगुणशाली ।
स च स्फूर्तिरूपोऽयमनुभवः कदाचित् साक्षात्कारद्वारापि कल्प्यत इति चिरकालविरहेऽपि तासां सन्धुक्षणकारणं ज्ञेयम् । अत्र सुषुप्तेऽपि तत्स्फूर्तिनिर्देशः सर्वदैव स्फुरामीतिमात्रतात्पर्यकः ।
यद्वा तत्र तासां स्वप्नजाग्रतोरनन्यवृत्तित्वं सिद्धमेव । वृत्त्यन्तरासम्भवात् तु श्रीकृष्णसमाधिलक्षणे सुषुप्तेऽपि तस्मिन्नेव स्वप्नजाग्रद्गतानां वृत्तिवैचित्रीणां तदनुभाविततामात्रावशेषतया प्रवेशो भवति । तदुत्तरकाले प्राकृतैः "सुखमहमस्वाप्सम्" इतिवत् ताभिः स इति एवानुसन्धीयत इति तथोक्तम् । तथा हि गारुडे —

जाग्रत्स्वप्नसुसुप्तिषु योगस्थस्य च योगिनः ।
या काचिन् मनसो वृत्तिः स भवत्यच्युताश्रया ॥ ४४८ ॥ इति ॥

१५९ । ननु तथाप्यस्माकं विरह एव सर्वोपमर्दकः स्फुरति किं कुर्मः ? इत्याशङ्क्य हन्त यदि मद्वियोगिताभिमानिमनोवृत्तिं कथमपि रोद्धुं शक्नुथ तदा स्वत एव नित्यसंयोगित्व-मुदेष्यतीत्येवमुपदेशेन वक्तुं योगशास्त्रप्रक्रियामाह द्वाभ्याम् (भा० १०।४७।३२) —

येनेन्द्रियार्थान् ध्यायेत मृषा स्वप्नवदुत्थितः ।
तन् निरुन्ध्यादिन्द्रियाणि विनिद्रः प्रत्यपद्यत ॥ ४४९ ॥

उत्थितः पुमान् यथा मिथ्याभूतमेव स्वप्नं ध्यायति एवं बाधितानपीन्द्रियार्थान् शब्दादीन् येन मनसा ध्यायेत चिन्तयेत् ध्यायंश्च येनेन्द्रियानि प्रत्यपद्यत प्राप तन् मनो विनिद्रोऽन-लसः सन् निरुन्ध्यान् नियच्छेदिति ।
यद्यपि स्वप्नादिवत् तद्विरहस्तासु नाज्ञानाध्यस्तः प्रकटलीलायां तस्याप्राप्तेस्तासामेवा-नुभवसिद्धत्वात् तथाप्यप्रकटलीलायां नित्यसंयोगमनुसन्धापयितुं तस्य तादृशत्वेनैवोप-देशो भगवता योग्य इति तथोक्तम् । एकांशेऽपि संयोगे वियोगो नास्त्येवेति वा ॥

१६० । तं मनोनिरोधमेव स्तौति (भा० १०।४७।३३) —

एतदन्तः समाम्नायो योगः साङ्ख्यं मनीषिणाम् ।
त्यागस्तपो दमः सत्यं समुद्रान्ता इवापगाः ॥ ४५० ॥

एष मनोनिरोधोऽन्तः समाप्तिः फलं यस्य सः । समाम्नायो वेदः स तत्र पर्यवस्यतीत्यर्थः । मार्गभेदेऽप्येकत्र पर्यवसाने दृष्टान्तः — समुद्रान्ता आपगा नद्य इवेति । यस्मात् सर्वैरेव वेदादिविद्भिः प्रशस्यते मनोनिरोधस्तस्माद् यूयमपि मद्वियोगाभिमानिमनोवृत्तिं नियच्छ-थेति पद्यद्वयेन ध्वनितम् ॥

१६१ । ननु — अहो यदि त्वद्विरहेण वयमतिदुःखिता इत्यतः कृपालुचित्त एव त्वमस्मभ्यं निजप्राप्तिसाधनमुपदिशसि । तर्हि स्वयं किमु प्रकटमेव नायासि तस्मात् कैतवमेवेदं तव कृपालुत्वमित्याशङ्क्याह (भा० १०।४७।३४) —

यत् त्वहं भवतीनां वै दूरे वर्ते प्रियो दृशाम् ।
मनसः सन्निकर्षार्थं मदनुध्यानकाम्यया ॥ ४५१ ॥

साम्प्रतं भवतीनां दृशां प्रियोऽप्यहं यद् दूरे वर्ते तद्भवतीनां मदनुध्यानेच्छया यो मनसः सन्निकर्षस्तदर्थं मम भवन्निकटस्थितौ मदर्थं भवतीनां दृश्येवावेशः स्याद् भवद्दूरे तु मनस्येवेति तत्र मम सन्निकर्षः स्यादित्येतदर्थः ॥

१६२ । तदेतन् निदर्शयति (भा० १०।४७।३५) —

यथा दूरचरे प्रेष्ठे मन आविश्य वर्तते ।
स्त्रीणां च न तथा चेतः सन्निकृष्टेऽक्षिगोचरे ॥ ४५२ ॥

चकारात् स्त्रीषु प्रेष्ठस्य च ॥

१६३ । मनःसन्निकर्षे किं स्यात् ? शीघ्रमेव लब्धो भविष्यामीति ज्ञायतामित्याह (भा० १०।४७।३६) —

मय्यावेश्य मनः कृष्णे विमुक्ताशेषवृत्ति यत् ।
अनुस्मरन्त्यो मां नित्यमचिरान् मामुपैष्यथ ॥ ४५३ ॥

विमुक्ता अशेषा विरहतत्कारणभावनारूपा वृत्तयो येन तन्मनो मयि कृष्णरूपे आवेश्य-मां कृष्णरूपमेवानुस्मरन्त्यो मां कृष्णरूपमेवाचिरादेव समीप एवैष्यथ । अनन्यवेद्यतया प्राप्स्यथ ॥

१६४ । तर्हि कथं प्रकटं नागच्छसि ? तत्राह — तस्य झटिति प्राप्तेर्वृन्दावन एव लीलान्त-रनित्यास्तितायाश्च प्रतीत्यर्थं निदर्शनमप्याह (भा० १०।४७।३७) —

या मया क्रीडता रात्र्यां वनेऽस्मिन् व्रज आस्थिताः ।
अलब्धरासाः कल्याण्यो मापुर्मद्वीर्यचिन्तया ॥ ४५४ ॥

तद् बहिर्विघ्नवञ्चनार्थमित्यर्थः । ता हि तद्रात्रिप्रकटरासमात्रमलब्धवत्योऽप्यस्मिन् वृन्दावन एव सर्वविघ्नास्पृष्टाः प्रकटविचित्रक्रीडानिधानं मामापुरेवेति । तथा च वासना-भाष्यधृतं मार्कण्डेयवचनम् —

तदानीमेव तं प्राप्ताः श्रीमन्तं भक्तवत्सलम् ।
ध्यानतः परमानन्दं कृष्णं गोपालनायिकाः ॥ ४५५ ॥ इति ।

तत्रापि हे कल्याण्यः सशरीरा इति तद्वद्देहत्यागेन भवतीनां मत्प्राप्तिर्न स्यात् किन्त्व-नेनैव देहेन मत्प्राप्तिः स्यादिति भावः । तस्मात् तासां व्रजे प्राकट्येनानुपलम्भात् तथा “मयि भक्तिर्हि भूतानाम्” (भा० १०।८२।४५) इत्यादि वक्ष्यमाणानुसारेण मार्कण्डेयवच-नानुसारेण च तदीयाभीप्सितरूपविलासस्यैव मम प्राप्तेः सिद्धत्वाच्च विद्यत एव प्रक-टाया अस्या लीलायाः पृथक् तस्मिन्नन्या लीला तस्यां च ममेव युष्माकमपि स्थितिरध्य-वसीयताम् ।
यामेव लीलां मदीयव्रजागमनासकृत्प्रतिज्ञानुसारेण शीघ्रमेव यदुपुर्याः सकाशाद् भवत्प्रे-मयन्त्रिततया समागत्याहं सर्वसमञ्जसतया भवतीनां तत्तद्विघ्ननिवारणपूर्वकं सर्वेभ्य एव व्रजवासिभ्यः सन्ततं दर्शयिष्यामीति भावः । अस्मिन्निति निर्देशात् तदानीमपि स्वस्य वृन्दावनस्थत्वं सूचयति ।
प्रकरणेऽस्मिन्निदमुक्तं भवति । न ह्यत्र तासामध्यात्मविद्या श्रेयस्करी भवति (भा० ११।२०।३१) —

तस्मान् मद्भक्तियुक्तस्य योगिनो वै मदात्मनः ।
न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिह ॥ ४५६ ॥

इति श्रीभगवता "ज्ञाने प्रयासमुदपास्य नमन्त एव जीवन्ति" (भा० १०।१४।३) इति ब्रह्मणा च साधारणभक्तानामप्यनुपादेयत्वेनोक्तत्वात् ।
न च तच्छ्रवणेन तासां विरहज्वाला शाम्यति । तं श्यामं मनोहरं विना साधारणभक्तानामपि "स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिनः" (भा० ६।१७।२८) इत्युक्तदिशा "नात्यन्तिकं विगणयन्त्यपि ते प्रसादम्" (भा० ३।१५।४८) इत्याद्युक्तदिशा च हेयरूपत्वेनैवानुभवात् । तासां तु स्वरसस्य परमविरोध्येव तज्ज्ञानम् । पूर्वं च "श्रूयतां प्रियसन्देशो भवतीनां सुखावहः" (भा० १०।४७।२८) इत्येवोक्तम् ।
अत एवोक्तं तासामेवाभिप्रायकथने श्रीस्वामिभिरपि "ननु किमन्यानिवास्मानात्मविद्यया लोभयसि ? वयं तु सर्वसुन्दरसर्वालङ्करणेन त्वया विरहं नैव सहामहे" इति ।
तस्माद् विदुरादेरिव कूटोक्तिरियमित्युक्त एवार्थो भवत्यन्तरङ्गः । स च युधिष्ठिरादेरिव तासामेव गम्य इति ॥ श्रीभगवान् व्रजदेवीः ॥

१६५ । पूर्वव्याख्यानुसारेणैवाह (भा० १०।४७।३८) —

एवं प्रियतमादिष्टमाकर्ण्य व्रजयोषितः ।
ता ऊचुरुद्धवं प्रीतास्तत्सन्देशागतस्मृतीः ॥ ४५७ ॥

तत्सन्देशेनागता स्मृतिर्नित्यसंयोगानुसन्धानरूपा यासां तादृश्यः । अत एव प्रीताः । इतः परं कदाचिदप्रकटलीलानुभवे सति तासां सन्तोषः प्रकटलीलादर्शनतस्तु विरह एवेति भावद्वैतं लक्ष्यते ॥

१६६ । तत्र सन्तोषमाह (भा० १०।४७।५३) —

ततस्ताः कृष्णसन्देशैर्व्यपेतविरहज्वराः ।
उद्धवं पूजयां चक्रुर्ज्ञात्वात्मानमधोक्षजम् ॥ ४५८ ॥

तथा तेन सन्दिष्टं तथैवात्मानमनुभूयाधोक्षजं चानुभूयेत्यर्थः ॥ श्रीशुकः ॥

१६७ । स्वविरहं व्यञ्जयन्ति (भा० १०।४७।४४) —

अप्येष्यतीह दाशार्हस्तप्ताः स्वकृतया शुचा ।
सञ्जीवयन् नु नो गात्रैर्यथेन्द्रो वनमम्बुदैः ॥ ४५९ ॥

स्वनिमित्तेन शोकेन तप्ताः । नोऽस्मान् गात्रैः करस्पर्शादिभिः सञ्जीवयन् किं नु इहैष्यतीति ॥ श्रीव्रजदेव्य उद्धवम् ॥

१६८ । एवं यथा श्रीमदुद्धवद्वारोपदिष्टं तथा कुरुक्षेत्रयात्रायामपि ताः प्रति स्वयमुपदिष्टम् (भा० १०।८२।४२) —

अपि स्मरथ नः सख्यः स्वानामर्थचिकीर्षया ।
गतांश्चिरायिताञ् छत्रुपक्षक्षपणचेतसः ॥ ४६० ॥

इत्यनेन स्वागमनविलम्बे कारणं विज्ञाप्य पुनश्च (भा० १०।८२।४५) —

मयि भक्तिर्हि भूतानाममृतत्वाय कल्पते ।
दिष्ट्या यदासीन् मत्स्नेहो भवतीनां मदापनः ॥ ४६१ ॥

इत्यनेन तासां स्वप्राप्तिमवश्यम्भाविनीं प्रोच्य तत्रापि तासां कालविलम्बाक्षमत्वं विलोक्य झटिति सान्त्वनार्थमुद्धवद्वारा प्रहितचरसन्देशवदेव स्वेन नित्यसंयोगमुपदिशति (भा० १०।८२।४६-४७) —

अहं हि सर्वभूतानामादिरन्तोऽन्तरं बहिः ।
भौतिकानां यथा खं वार्भूर्वायुर्ज्योतिरङ्गनाः ॥ ४६२ ॥
एवं ह्येतानि भूतानि भूतेष्वात्मात्मना ततः ।
उभयं मय्यथ परे पश्यताभातमक्षरे ॥ ४६३ ॥

यथाहमहङ्कारो भूतादिः सर्वेषां भूतानां खादीनामाद्यन्तादिरूपः । अहङ्कारान्तर्गतान्येव खादीनीत्यर्थः । यथा च खादीनि भूतानि भौतिकानां शरावसैन्धवादीनामाद्यन्तरूपाणि खादीनामन्तर्गतान्येव तानीत्यर्थः ।
एवमेतानि प्रकटलीलायामनुभूयमानानि युष्माकं ममतास्पदानि भूतानि परमार्थसत्यवस्तूनि श्रीवृन्दावनादीनि भूतेष्वप्रकटलीलागतेषु परमार्थसत्यवस्तुषु तेषु वर्तन्ते । युष्माकं प्रकटलीलाभिमान्यहन्तास्पदमात्मा चाप्रकटलीलाभिमान्यहन्तास्पदेनात्मना ततो व्याप्तः ।
एवमिदन्ताहन्तास्पदं यदुभयं तच्च पुनः परे प्रकटमत्र दृश्यमानेऽपि तस्यां वृन्दाटव्यां विहरमाणेऽक्षरे नित्यमेव युष्मत्सङ्गिनि मय्याश्रयरूपे आभातं विराजमानं पश्यतेति । तस्मात् प्रकाशभेदादेव तत्तद्वस्त्वादिभेदव्यपदेशो विरहसंयोगव्यवस्था चेतीदमत्रापि व्यक्तम् ॥

१६९ । श्रीभगवच्छिक्षानुरूपमेव श्रीऋषिरुवाच (भा० १०।८२।४७) —

अध्यात्मशिक्षया गोप्य एवं कृष्णेन शिक्षिताः ।
तदनुस्मरणध्वस्तजीवकोशास्तमध्यगन् ॥ ४६४ ॥

अध्यात्मशिक्षया तदुपदेशेनात्मानं श्रीकृष्णमधिकृत्य या शिक्षा तया वा । तथाविधं यदुपदिष्टं तदनुस्मरणेन नित्यसिद्धाप्रकटलीलायाः पुनरनुसन्धानेन ध्वस्तस्त्यक्तप्रायो जीवकोषः प्रपञ्चस्तत्र प्राकट्याभिनिवेशो याभिस्ताः । तं स्वयमुपदिष्टनित्यसंयुक्तरूपं श्रीकृष्णमध्यगन् प्रणिहितवत्यः ।
अत्रापि पूर्वदर्शितश्रुतिपुराणादिगतनित्यतावाक्यम् ।
"मयि भक्तिर्हि" (भा० १०।८२।४५) इति फलभेदवाक्यं च ।
"न ज्ञानं न च वैराग्यम्" (भा० ११।२०।३१) इत्याद्ययुक्ततााव्यञ्जिवाक्यं च ।
अनुसन्धाय परोक्षवादार्थप्रयुक्तमर्थान्तरं न प्रमेयम् ॥

१७० । अथ ज्ञानरूपं प्रकटार्थमस्वीकुर्वाणा नित्यलीलारूपं रहस्यार्थं स्वीकुर्वाणा अपि पूर्ववत् पुनश्च प्रकटलीलाभिनिवेशेन विरहभीताः परमदैन्योत्तरमेवं प्रार्थयामासुरित्याह (भा० १०।८२।४९) —

> आहुश्च ते नलिननाभ पदारविन्दं योगेश्वरैर्हृदि विचिन्त्यमगाधबोधैः ।
> संसारकूपपतितोत्तरणावलम्बं गेहं जुषामपि मनस्युदियात् सदा नः ॥ ४६५ ॥

आस्तां तावद् दुर्विधिहतानामस्माकं तद्दर्शनगन्धवार्तापि, हे नलिननाभ ! ते तव पदारविन्दं त्वदुपदेशानुसारेणास्माकं मनस्युदियात् ।
ननु किमिवात्रासम्भाव्यम् ?
तत्राहुः — योगेश्वरैरेव हृदि विचिन्त्यं न त्वस्माभिस्तत्स्मरणारम्भ एव मूर्च्छागामिनीभिः ।
तदुक्तमुद्धवं प्रति स्वयं भगवता (भा० १०।४६।५) —

> मयि ताः प्रेयसां प्रेष्ठे दूरस्थे गोकुलस्त्रियः ।
> स्मरन्त्योऽङ्ग विमुह्यन्ति विरहौत्कण्ठ्यविह्वलाः ॥ ४६६ ॥

इति भावः । तदेवोपपादयन्ति — अगाधबोधैः साक्षाद्दर्शनेऽप्यक्षुभितबुद्धिभिः । न त्वस्माभिरिव तद्दर्शनेच्छया मूर्च्छादिना क्षुभितबुद्धिभिः । चरणस्यारविन्दतारूपकं च तत्स्पर्शेनैव दाहशान्तिर्भवति न तु स्मरणेनेति ज्ञापयन्ति ।
ननु तथा निदिध्यासनमेव योगेश्वराणां संसारदुःखमिव भवतीनां विरहदुःखं दूरीकृत्य तदुदयं करिष्यति ।
इत्याशङ्क्याहुः — संसारकूपपतितानामेवोत्तरणावलम्बं न त्वस्माकं विरहसिन्धुनिमग्नानाम् । तच्चिन्तनारम्भे दुःखवृद्धेरेवानुभूयमानत्वादिति भावः ।
नन्वधुनैवात्रागत्य मुहुर्मां साक्षादेवानुभवत ?
तत्राहुः — गेहं जुषां परगृहिणीनामस्वाधीनानामित्यर्थः । यद्वा "गेहं जुषाम्" इति तव सङ्गतिश्च त्वत्पूर्वसङ्गमविलासधाम्नि तत्तदस्मत्कामदुघे स्वाभाविकास्मत्प्रीतिनिलये निजगृहे श्रीगोकुल एव भवतु न तु द्वारकादाविति स्वमनोरथविशेषेण तस्मिन्नेव प्रीतिमतीनामित्यर्थः । "यः कौमारहरः स एव हि वरः" इत्यादिवत् ।

तस्मादस्माकं मनसि भवच्चरणचिन्तनसामर्थ्याभावात् स्वयमागमनस्यासामर्थ्यादनभिरुचेर्वा साक्षादेव श्रीवृन्दावन एव यद्यागच्छसि तदैव निस्तार इति भावः । तमेतमेव भावं श्रीभगवानङ्गीचकार । यथोक्तमेतदनन्तरम् (भा० १०।८३।१) —

> तथानुगृह्य भगवान् गोपीनां स गुरुर्गतिः ।
> युधिष्ठिरमथापृच्छत् सर्वांश्च सुहृदोऽव्ययम् ॥ ४६७ ॥ इति । श्रीशुकः ॥

१७१ । तदेवं स्वारसिक्यप्रकटलीला दर्शिता । तथा प्रकटाप्रकटलीले द्वेऽप्यर्थविशेषेणाह (भा० १०।३३।३६) —

> गोपीनां तत्पतीनां च सर्वेषामेव देहिनाम् ।
> योऽन्तश्चरति सोऽध्यक्षः एष क्रीडनदेहभाक् ॥ ४६८ ॥

अन्तरन्तःस्थितमप्रकटं यथा स्यात् तथा गोपीनां तत्पतीनां च मायया प्रकटलीलायां तत्पतित्वेन प्रतीतानां क्रीडनदेहभाक् सन् तेषामेव गोकुलयुवराजतया अध्यक्षश्च सन् यश्चरति क्रीडति स एव प्रकटलीलागतोऽपि भूत्वा सर्वेषां विश्ववर्तिनां देहिनामपि क्रीडनदेहभाक् सन् तेषां पालकत्वेनाध्यक्षोऽपि सन् चरति ।
तस्मादनादित एव ताभिः क्रीडाशालित्वेन सिद्धत्वात् तच्छक्तिरूपाणां तासां सङ्गमे वस्तुत एव परदारतादोषोऽपि नास्ति । ततस्तेषां तत्पतित्वं च "नासूयन् खलु कृष्णाय" (भा० १०।३३।३८) इत्यादिवक्ष्यमाणदिशा तेषां तासां च प्रातीतिकमात्रं न तु दैहिकम् । तादृशप्रतीतिसम्पादनं च तासामुत्कण्ठावर्धनपूर्वकतया सर्वोत्तरनिर्विघ्ननित्यसङ्गपोषार्थमिति तत्प्रकरणसिद्धान्तस्य पराकाष्ठा दर्शिता ॥ श्रीशुकः ॥

१७२ । एवं तत्तल्लीलाभेदेनैवैकस्यापि तत्तत्स्थानस्य प्रकाशभेदः श्रीविग्रहवत् । तदुक्तं श्रुत्या "वृष्णः परमं पदमवभाति भूरि" इति । तत्र त्वितरलीलान्तःपातिभिः प्रायश इतरलीलावकाशविशेषो नोपलभ्यते । दृश्यते च प्रकटलीलायामप्यसङ्कीरीभावेनैव विचित्रावकाशत्वम् ।
यथा द्वादशयोजनमात्रप्रमितायामेव द्वारकान्तःपुर्यां क्रोशद्वयप्रमितगृहकोटिप्रभृतिवस्तूनि ।
यथा स्वल्पे गोवर्धनगर्ते तदसङ्ख्यगोकुलप्रवेशः ।
यथा ब्रह्मणा दृष्ट्या वृन्दावनस्य सवृक्षतृणपक्षाद्यवकाशता ब्रह्माण्डाद्यनन्तवस्त्ववकाशता च ।
यथा च श्रीनारददृष्टयोगमायावैभवे समकालमेव द्वारकायां प्रातस्त्यमाध्याह्निकसायन्तनलीला इत्यादि ।
तदेवं वृन्दावनस्य तावत् प्रकाशभेद उदाह्रियते । तत्राप्रकटलीलानुगतो यथा यामले रुद्रगौरीसंवादे —

वीथ्यां वीथ्यां निवासोऽधरमधुसुवचस्तत्र सन्तानकानाम्
एके राकेन्दुकोट्यातपविशदकरास्तेषु चैके कमन्ते ।
रामे रात्रेर्विरामे समुदिततपनद्योतिसिन्धूपमेया
रत्नाङ्गानां सुवर्णाचितमुकुररुचस्तेभ्य एके द्रुमेन्द्राः ॥ ४६९ ॥
यत् कुसुमं यदा मृग्यं यत् फलं च वरानने ।
तत् तदैव प्रसूयन्ते वृन्दावनसुरद्रुमाः ॥ ४७० ॥

अर्थश्च — हे अधरमधुसुवचः ! अधरमधुतुल्यानि सुवचांसि यस्यास्तथाभूते हे गौरि ! तत्र श्रीवृन्दावने रत्नाङ्गानां सन्तानकानां मध्ये एके द्रुमेन्द्रा राकेन्दुकोट्यातपविशद्कराः । हे रामे ! तेषु सन्तानकेषु च एके रात्रेर्विरामे समुदिततपनद्योतिसिन्धूपमेयाः कमन्ते विराजन्ते । तेभ्यस्तानप्यतिक्रम्य एके कमन्ते । कथम्भूताः ? सुवर्णाचितमुकुररुच इति । अत्र च यदा यत् कुसुमं मृग्यं भवति यदा च यत् फलं मृग्यं भवति तदैव तद्वृन्दावनसुरद्रुमाः प्रसूयन्त इति ।
एवं ब्रह्मसंहितायामप्यादिपुरुषगोविन्दस्तोत्र एव (ब्र० सं० ५।५६) —

श्रियः कान्ताः कान्तः परमपुरुषः कल्पतरवो
द्रुमा भूमिश्चिन्तामणिगणमयि तोयममृतम् ।
कथा गानं नाट्यं गमनमपि वंशी प्रियसखी
चिदानन्दं ज्योतिः परमपि तदास्वाद्यमपि च ॥ ४७१ ॥
स यत्र क्षीराब्धिः स्रवति सुरभीभ्यश्च सुमहान्
निमेषार्धाख्यो वा व्रजति न हि यत्रापि समयः ।
भजे श्वेतद्वीपं तमहमिह गोलोकमिति यं
विदन्तस्ते सन्तः क्षितिविरलचाराः कतिपये ॥ ४७२ ॥ इति ।

ज्योतिर्लौकिकलीलामाधुर्याय महाप्रलयेऽप्यनश्वरसूर्यादिरूपं यत्तत्र वर्तते तथा तेषामास्वाद्यमपि यत्किञ्चित् तत्सर्वं चिदानन्दरूपं परमपि परमतत्त्वमेव न तु प्राकृतम् ।
चन्द्रार्कयोः स्थितिश्च तत्र विलक्षणत्वेनैव गौतमीये तन्त्रे कथिता "समानोदितचन्द्रार्कम्" इति हि तत्र वृन्दावनविशेषणम् । समानत्वं च रात्रौ रात्रौ राकाचन्द्रमयत्वादिति ।
अपि चेति परेणान्वयः । रसावेशेन तदज्ञानादेव समयो न व्रजतीत्युक्तम् । अन्यथा पौर्वापर्याभावे सति चेष्टात्मिकाया लीलायाः स्वरूपहानिः स्यात् । श्वेतं शुभ्रं दोषरहितमित्यर्थः । द्वीपं तदिवान्यासङ्गशून्यं सर्वतः परमित्यर्थः । तदुक्तं श्रुत्या "यथा हि वै सरसि पद्मं तिष्ठति तथा भूम्यां तिष्ठति" (गो० ता० उ० २।३०) इति ।
किं च ब्रह्मसंहितायामेव तत्स्तवादौ "चिन्तामणिप्रकरसद्मसु कल्पवृक्षलक्षावृतेषु" (ब्र० सं० ५।२९) इत्यादि ।
एवं पञ्चरात्रादौ श्रुतिविद्यासंवादे —

ततः श्वेतमहाद्वीपश्चतुर्दिक्षु विदिक्षु च ।
अधश्चोर्ध्वं च दिङ्नाथास्तोयं क्षीरामृतार्णवः ॥ ४७३ ॥
महावृन्दावनं तत्र केलिवृन्दावनानि च ।
वृक्षाः सुरद्रुमाश्चैव चिन्तामणिमयी स्थली ॥ ४७४ ॥
क्रीडाविहङ्गलक्षं च सुरभीनामनेकशः ।
नानाचित्रविचित्रश्रीरासमण्डलभूमयः ॥ ४७५ ॥
केलिकुञ्जनिकुञ्जानि नानासौख्यस्थलानि च ।
प्राचीरच्छत्ररत्नानि फणाः शेषस्य भान्त्यहो ॥ ४७६ ॥
यच्छिरोरत्नवृन्दानामतुलद्युतिवैभवम् ।
ब्रह्मैव राजते तत्र रूपं को वक्तुमर्हति ॥ ४७७ ॥ इति ।

इत्थं श्रीवृन्दावनस्याप्रकटलीलानुगतप्रकाश एव गोलोक इति व्याख्यातम् । तत्राप्रकटलीलाया द्वैविध्ये मन्त्रोपासनामय्यां किञ्चिद् विलक्षणः । स च तत्तन्मन्त्रेषु यथादर्शितप्रतिनियतलीलास्थलसन्निवेशः । यथा पूर्वतापन्यां दर्शितं यथा च स्कान्दे श्रीनारदवाक्यम् —

यस्मिन् वृन्दावने पुण्यं गोविन्दस्य निकेतनम् ।
तत्सेवकसमाकीर्णं तत्रैव स्थीयते मया ॥ ४७८ ॥
भुवि गोविन्दवैकुण्ठं यस्मिन् वृन्दावने नृप ।
यत्र वृन्दादयो भृत्याः सन्ति गोविन्दलालसाः ॥ ४७९ ॥ इति ।

अथ प्रकटलीलानुगतः प्रकाशः श्रीविष्णुपुराणहरिवंशादौ प्रसिद्धः । स एष एव प्रकाशस्तदानीं प्राकृतैरपि कैश्चिद् भाग्यविशेषोदयवद्भिर्ददृशे सम्प्रत्यस्माभिरपि तदंशो दृश्यते । अत्र तु यत्प्राकृतप्रदेश इव रीतयोऽवलोक्यन्ते तत् तु भगवतीव स्वेच्छया लौकिकलीलाविशेषाङ्गीकारनिबन्धनमिति ज्ञेयम् । श्रीभगवद्धाम्नां तेषां सर्वथा प्रपञ्चातीतत्वादिगुणैः श्रुतिस्मृतिभ्यां कृतप्रमाणत्वात् । अत एवोक्तमादिवाराहे —

वसन्ति ये मथुरायां विष्णुरूपा हि ते खलु ।
अज्ञानास्तान् न पश्यन्ति पश्यन्ति ज्ञानचक्षुषः ॥ ४८० ॥ इति ।

तदेतन्मूलप्रमाणेऽप्यप्रकटलीलानुगतः प्रकाशः श्रीवृन्दावनस्य "ते चौत्सुक्यधियो राजन् मत्वा गोपास्तमीश्वरम्" (भा० १०।२८।११) इत्यादौ दर्शित एव ।
प्रकटलीलानुगतो यथा (भा० १०।१५।५) —

अहो अमी देववरामरार्चितं पादाम्बुजं ते सुमनःफलार्हणम् ।
नमन्त्युपादाय शिखाभिरात्मनस्तमोऽपहत्यै तरुजन्म यत्कृतम् ॥ ४८१ ॥
इत्यादि ।

आत्मनः सुमनः फलरूपमर्हणमुपादायात्मन एव शिखाभिर्नमन्ति । यद् यैः । शृण्वतां पश्यतां च संसारिणां तमोऽपहत्यै तरुजन्मैतत्कृतमित्यादि । यत्कृतमिति तृतीयातत्पुरुषो वा ॥ श्रीभगवान् श्रीबलदेवम् ॥

१७३ । यथा च (भा० १०।१३।५९-६०) —

सपद्येवाभितः पश्यन्दिशोऽपश्यत् पुरःस्थितम् ।
वृन्दावनं जनाजीव्यद्रुमाकीर्णं समाप्रियम् ॥ ४८२ ॥
यत्र नैसर्गदुर्वैराः सहासन् नृमृगादयः ।
मित्राणीवाजितावासद्रुतरुट्तर्षकादिकम् ॥ ४८३ ॥ इत्यादि ।

समानामात्मारामाणामपि समस्य मासहचरस्य श्रीभगवतोऽपि वा । आ सर्वतोभावेन सर्वांशेनैव प्रियमिति । तत्रासदंशत्वं निषिद्ध्य सर्वतोऽप्यानन्दातिशयप्रदत्वं दर्शितम् ॥ श्रीशुकः ॥

१७४ । तदेवं श्रीकृष्णस्य नित्यलीलास्पदत्वेन तान्येव स्थानानि दर्शितानि । तच् चावधारणं श्रीकृष्णस्य विभुत्वे सति व्यभिचारि स्यात् ।

तत्र समाधीयते — तेषां स्थानानां नित्यतल्लीलास्पदत्वेन श्रूयमाणत्वात् तदाधारशक्तिलक्षणस्वरूपविभूतित्वमवगम्यते "स भगवः कस्मिन् प्रतिष्ठित इति स्वे महिम्नि" (छा० ७।२४।१) इति श्रुतेः "साक्षाद् ब्रह्मगोपालपुरी हि" (गो० ता० उ० २।२९) इत्यादेश्च ।

ततस्तत्रैवाव्यवधानेन तस्य लीला । अन्येषां प्राकृतत्वात् न साक्षात् तस्य स्पर्शोऽपि सम्भवति धारणशक्तिस्तु नतराम् । यत्र क्वचिद्वा प्रकटलीलायां तद्गमनादिकं श्रूयते तदपि तेषामाधारशक्तिरूपाणां स्थानानामावेशादेव मन्तव्यम् । वैकुण्ठान्तरस्य त्वप्राकृतत्वेऽपि श्रीकृष्णविलासास्पदताकरनिजयोग्यताविशेषाभावान् न तादृशत्वमिति ज्ञेयम् ।

अथाप्रकटप्रकटलीलयोः समन्वयस्त्वेवं विवेचनीयः । तत्र यद्यपि तस्य मन्त्रोपासनामय्यप्रकटलीलायां बाल्यादिकमपि वर्तते तथापि स्वारसिकलीलामयकिशोराकारस्यैव मुख्यत्वात् तमाश्रित्यैव सर्वं प्रवर्तत इति प्रकटलीलापि तमाश्रित्यैव वक्तव्या ।

यद्वा द्वारकायामपि मथुरायामपि वृन्दावनेऽपि युगपदेक एव किशोराकृतिः श्रीकृष्णाख्यो भगवान् श्रीमदानकदुन्दुभिश्रीव्रजराजनन्दनरूपेण प्रापञ्चिकलोकाप्रकटं नित्यमेव लीलायमान आस्ते ।

अथ कदाचित् "भक्तियोगविधानार्थं कथं पश्येम हि स्त्रियः" (भा० १।८।२०) इत्याद्युक्तदिशा सत्यप्यानुषङ्गिके भारहरणादिके कार्ये स्वेषामानन्दचमत्कारपोषायैव लोकेऽस्मिंस्तद्रीतिसहयोगचमत्कारिणीर्निजजन्मबाल्यपौगण्डकैशोरात्मिका लौकिकलीलाः प्रकटयंस्तदर्थं प्रथमत एवावतारितश्रीमदानकदुन्दुभिगृहे तद्विधयदुवृन्दसंवलिते स्वयमेव बालरूपेण प्रकटीभवति ।

अथ च तत्र तत्र स्थाने वचनजातसिद्धनिजनित्यावस्थितकैशोरादिविलाससम्पादनाय तैरेव प्रकाशान्तरेणाप्रकटमपि स्थितैः परिकरैः साकं निजप्रकाशान्तरेणाप्रकटमपि विहरत्येव ।
अथ श्रीमदानकदुन्दुभिगृहेऽवतीर्य च तद्वदेव प्रकाशान्तरेणाप्रकटमपि स्थित्यैव स्वयं प्रकटीभूतस्य सव्रजश्रीव्रजराजस्य गृहेऽपि तदीयामनादित एव सिद्धां स्ववात्सल्यमाधुरीं जातोऽयं नन्दयति । बालोऽयं रिङ्गति ।
पौगण्डोऽयं विक्रीडतीत्यादिस्वविलासविशेषैः पुनः पुनर्नवीकर्तुं समायाति । तत्र च सकलमाधुरीशिरोमणिमञ्जरीमाकैशोरबाल्यकेलिलक्ष्मीमुल्लास्य गोकुलजनान् नितरामात्मवशीकृतान्तर्बहिरिन्द्रियानापद्य पुनरपि तेषां समधिकामपि प्रेमर्द्धिं संवर्धयन् । श्रीमदानकदुन्दुभिप्रभृतीनपि नन्दयन् भूभारराजन्यसङ्घमपि संहरन् मथुरां याति ।
ततश्च द्वारकाख्यं स्वधामविशेषं प्रकाशयितुं समुद्रं गत्वा तत्तल्लीलामाधुरीं परिवेषयति ।
अथ सिद्धासु निजापेक्षितासु तत्तल्लीलासु च तत्र तत्र नित्यसिद्धमप्रकटत्वमेवोरीकृत्य तावप्रकटौ लीलाप्रकाशौ प्रकटाभ्यां लीलाप्रकाशाभ्यामेकीकृत्य तथाविधतत्तन्निजवृन्दमप्रत्यूहमेवानन्दयतीति ।
अत्र च पूर्णकैशोरव्यापिन्येव व्रजे प्रकटलीला ज्ञेया "क्व चातिसुकुमाराङ्गौ किशोरौ नाप्तयौवनौ" (भा० १० ।४४ ।८) इति ।
भा० १० ।४५ ।३ —

> नास्मत्तो युवयोस्तात नित्योत्कण्ठितयोरपि ।
> बाल्यपौगण्डकैशोराः पुत्राभ्यामभवन् क्वचित् ॥ ४८४ ॥ इति ।

भा० १० ।४१ ।२७ —

> मनांसि तासामरविन्दलोचनः प्रगल्भलीलाहसितावलोकनैः ।
> जहार मत्तद्विरदेन्द्रविक्रमो दृशां ददच्छ्रीरमणात्मनोत्सवम् ॥ ४८५ ॥

इत्यपि हि श्रूयते ।
अत एव "एकादशसमास्तत्र गूढार्चिः सबलोऽवसत्" (भा० ३ ।२ ।२६) इत्यनेनैकादशभिरेव समाभिस्तस्य पूर्णकैशोरत्वं ज्ञेयम् । भा० १० ।८ ।२६ —

> कालेनाल्पेन राजर्षे रामः कृष्णश्च गोकुले ।
> अघृष्टजानुभिः पद्भिर्विचक्रमतुरञ्जसा ॥ ४८६ ॥ इत्यादेः ।

"गूढार्चिः" इति यथा गूढार्चिः कुत्राप्यग्निः प्राप्तं प्राप्तमिन्धनं दहति तथा गोपलीलाया गूढप्रभाव एव सन् प्राप्तं प्राप्तमसुरं दहन्नित्यर्थः । एकादशपर्यन्तं गूढार्चिः । ततः परं पञ्चदशपर्यन्तं प्रकटार्चिरिति साध्याहारं व्याख्यानं त्वघटमानं च । एकादशाभ्यन्तरे तत्तत्प्रभावस्य मध्ये मध्ये प्रसृतत्वात् ।

तदेवं स्थिते लीलाद्वयसमन्वये त्वप्रकटलीलैकान्तभावसमन्वयश्चैवमनुसन्धेयः । प्रथमं श्रीवृन्दावने ततो द्वारकामथुरयोरिति । सर्वप्रकटलीलापर्यवसाने युगपदेव हि द्वारकामथुरयोर्लीलाद्वयैक्यम् । मथुराप्रकटलीलाया एव द्वारकामनुगमनात् । अत एव रुक्मिणीप्रभृतीनां मथुरायामप्यप्रकटप्रकाशः श्रूयते ।

वृन्दावने नित्यं प्रक्रियां विशिष्य लिख्यते । तत्र प्रथमं श्रीवृन्दावनवासिनां तस्य प्राणकोटिनिर्मञ्छनीयदर्शनलेशस्य विरहः । ततः श्रीमदुद्धवद्वारा सान्त्वनम् । पुनश्च पूर्ववदेव तेषां महाव्याकुलतायामुदित्वर्यां श्रीबलदेवद्वारापि तथैव समाधानम् ।

अथ पुनरपि परमोत्कण्ठाकोटिविस्फुटहृदयानां सूर्योपरागव्रज्याव्याजया तदवलोकनकाम्यया कुरुक्षेत्रगतानां तेषां घर्मान्ते बालचातकानामिव निजाङ्गनवघनसङ्गावलोकदानेन तादृशसंलापमन्द्रगर्जितेन च पुनर्जीवनसञ्चारणम् ।

अथ दिनकतिपयसहवासादिना च ताननतिक्षीणतराननेन दुर्भिक्षदुःखितानिव सन्तर्प्य तैः सह निजविहारविशेषाणामेकमेव रम्यमास्पदं श्रीवृन्दावनं प्रत्येव पूर्ववत् सम्भावितया निजागमनाश्वासवचनरचनया प्रस्थानम् ।

सूर्योपरागयात्रा त्वियं दूरतः प्रस्तुतापि कंसवधान् नातिबहुसंवत्सरानन्तरा शिशुपालशाल्वदन्तवक्रवधात् प्रागेव ज्ञेया । श्रीबलदेवतीर्थयात्रा हि दुर्योधनवधैककालीना । तस्मिन् तस्यां कुरुक्षेत्रमागते खलु दुर्योधनवधः । सा च सूर्योपरागयात्रायाः पूर्वं पठिता । सूर्योपरागयात्रा च श्रीभीष्मद्रोणदुर्योधनाद्यागमनमयीति ।

तत्रायं क्रमः — प्रथमं सूर्योपरागयात्रा । ततः श्रीयुधिष्ठिरसभा । ततः शिशुपालवधः । ततः कुरुपाण्डवद्यूतं तदैव शाल्ववधो वनपर्वणि प्रसिद्धः । दन्तवक्रवधश्च ततः । ततः पाण्डवानां वनगमनम् । ततः श्रीबलदेवस्य तीर्थयात्रा । ततो दुर्योधनवध इति ।

तस्मादुपरागयात्रा कंसवधान् नातिकालविलम्बेनाभवदिति लक्ष्यते । यत् तु तस्यामेव “आस्तेऽनिरुद्धो रक्षायां कृतवर्मा च यूथपः” (भा० १०।८२।६) इति । तदपि श्रीप्रद्युम्नानिरुद्धयोरल्पकालादेव यौवनप्राप्त्या सम्भवति । यथोक्तम् “नातिदीर्घेन कालेन स कार्ष्णो रूढयौवनः” (भा० १०।५५।९) इति । अथवानिरुद्धनामा कश्चित् कृष्णनन्दन एव यो दशमान्तेऽष्टादशमहारथमध्ये गणितः । तथैव च व्याख्यातं तत्र तैरिति । अतः कुरुक्षेत्रयात्रायामेव श्रीमदानकदुन्दुभिना श्रीकुन्तीदेवीं प्रत्युक्तम् (भा० १०।८२।२२) —

> कंसप्रतापिताः सर्वे वयं याता दिशं दिशम् ।
> एतर्ह्येव पुनः स्थानं दैवेनासादिताः स्वसः ॥ ४८७ ॥ इति ।

अतः प्रथमदर्शनादेव द्रौपदीश्रीकृष्णमहिषीणां परस्परविवाहप्रश्नोऽपि सङ्गच्छते । अत्र “आगमिष्यत्यदीर्घेण कालेन” (भा० १०।४६।३४) इत्यादिकमपि पद्यं सहायं भवेत् ।

प्रकृतमनुसरामः । अथ वृन्दावनं प्रस्थापितानामपि तेषां पुनरपि निजादर्शनेन महासन्तापवृद्धिमतीवोत्कण्ठाभिः श्रीगोविन्दः सस्मार । यामेव साक्षाद् दृष्टवान् परमोत्कण्ठः श्रीमदुद्धवः । तामवसरं लब्ध्वा प्रस्तावान्तरे गायन्ति (भा० १०।७१।९) —

गायन्ति ते विशदकर्म गृहेषु देव्यो राज्ञां स्वशत्रुवधमात्मविमोक्षणं च ।
गोप्यश्च कुञ्जरपतेर्जनकात्मजायाः पित्रोश्च लब्धशरणो मुनयो वयं च ॥ ४८८ ॥

इति व्यञ्जयामास । ततश्च राजसूयसमाप्त्यनन्तरं शाल्वदन्तवक्रवधान्ते झटिति स्वयं गोकुलमेवाजगाम । तथा च पाद्मोत्तरखण्डे गद्यपद्यानि —

अथ शिशुपालं निहतं श्रुत्वा दन्तवक्रः कृष्णेन योद्धुं मथुरामाजगाम । कृष्णस्तु तच्छ्रुत्वा रथमारुह्य तेन योद्धुं मथुरामाययौ । दन्तवक्रवासुदेवयोरहोरात्रं मथुरापुरद्वारे यमुनातीरे सङ्ग्रामः समवर्तत । कृष्णस्तु गदया तं जघान । स तु चूर्णितसर्वाङ्गो वज्रनिर्भिन्नमहीधर इव गतासुरवनितले पपात । सोऽपि हरेः सायुज्यं योगिगम्यं नित्यानन्दसुखं शाश्वतं परमं पदमवाप । इत्थं जयविजयौ सनकादिशापव्याजेन केवलं भगवतो लीलार्थं संसृताववतीर्य जन्मत्रयेऽपि तेनैव निहतौ जन्मत्रयावसाने मुक्तिमवाप्तौ । कृष्णोऽपि तं हत्वा यमुनामुत्तीर्य नन्दव्रजं गत्वा प्राक्तनौ पितरावभिवाद्याश्वास्य ताभ्यां साश्रुकण्ठमालिङ्गितः सकलगोपवृद्धान् प्रणम्याश्वास्य रत्नाभरणादिभिस्तत्रस्थान् सन्तर्पयामास ।

कालिन्द्याः पुलिने रम्ये पुण्यवृक्षसमावृते ।
गोपनारीभिरनिशं क्रीडयामास केशवः ॥ ४८९ ॥
रम्यकेलिसुखेनैव गोपवेशधरो हरिः ।
बद्धप्रेमरसेनात्र मासद्वयमुवास ह ॥ ४९० ॥ इति ।

अत्रेदं ज्ञेयम् — दन्तवक्रस्य मथुरायामागमनं राजसूयानन्तरमिन्द्रप्रस्थे श्रीकृष्णावस्थानं ज्ञात्वा जरासन्धवधार्थं श्रीमदुद्धवयुक्तिच्छायामवलम्ब्य गदाकुशलम्मन्यत्वेनैकाकिनं द्वन्द्वयुद्धाय तमाह्वयितुं तदर्थमेव तद्राष्ट्रं तदुपद्रावयितुं च । पुनश्च द्वारकागतं तं श्रुत्वा प्रस्थितस्य मथुराद्वारगतेन तेन सङ्गमः । यत्स्थानमद्यापि द्वारकादिग्गतं दतिहेति नाम प्रसिद्धं वर्तते ।
सर्वमेतच्च श्रीनारदस्य श्रीभगवद्रथस्य च मनोजवत्वात् सम्भवति । अतः श्रीभागवतेनापि विरोधो नास्तीत्यलं कल्पभेदकल्पनया । अत एव झटिति तस्य शाल्ववधश्रवणमपि तत्रोक्तं सम्पद्यते । तथा श्रीकृष्णस्य गोकुलागमनं च श्रीभागवतसम्मतमेव । भा० १०।३९।३५ —

तास्तथा तप्यतीर्वीक्ष्य स्वप्रस्थाने यदूत्तमः ।
सान्त्वयामास सप्रेमैरायास्य इति दौत्यकैः ॥ ४९१ ॥ इति ।

भा० १०।४५।२३ —

यात यूयं व्रजं तात वयं च स्नेहदुःखितान् ।
ज्ञातीन् वो द्रष्टुमेष्यामो विधाय सुहृदां सुखम् ॥ ४९२ ॥ इति ।

भा० १०।४६।३५ —

हत्वा कंसं रङ्गमध्ये प्रतीपं सर्वसात्वताम् ।
यदाह वः समागत्य कृष्णः सत्यं करोति तत् ॥ ४९३ ॥ इति ।

भा० १०।४६।३४ —

आगमिष्यत्यदीर्घेण कालेन व्रजमच्युतः ।
प्रियं विधास्यते पित्रोर्भगवान् सात्वतां पतिः ॥ ४९४ ॥

इति च तस्य श्रीमुखेन भक्तजनमुखेन च बहुशः सङ्कल्पानामन्यथानुपपत्तेः "सत्यसङ्कल्पः" (मैत्रा० ७।७) इति श्रुतिः । "ईश्वराणां वचः सत्यम्" (भा० १०।३३।३१) इति स्वयं श्रीभागवतं च । न केवलमेतावदेव कारणं तस्य व्रजागमनमपि स्फुटमेवाहुः "यर्ह्यम्बुजाक्षापससार भो भवान् कुरून् मधून् वाथ सुहृद्दिदृक्षया" (भा० १।११।९) इति ।
अत्र मधून् मथुरां वेति व्याख्याय तदानीं तन्मण्डले सुहृदो व्रजस्था एव प्रकटा इति तैरप्यभिमतम् । "तत्र योगप्रभावेन नीत्वा सर्वजनं हरिः" (भा० १०।५०।५८) इत्यत्र सर्वशब्दात् ।
भा० १०।६५।१ —

बलभद्रः कुरुश्रेष्ठ भगवान् रथमास्थितः ।
सुहृद्दिदृक्षुरुत्कण्ठः प्रययौ नन्दगोकुलम् ॥ ४९५ ॥

इत्यत्र प्रसिद्धत्वात् ॥ द्वारकावासिनः श्रीभगवन्तम् ॥

१७५ । तदेतदागमनं दन्तवक्रवधानन्तरमेव श्रीभागवतसम्मतम् । यतः "ज्ञातीन् वो द्रष्टुमेष्यामो विधाय सुहृदां सुखम्" (भा० १०।४५।२३) इति कंसवधान्ते (भा० १०।८२।४२) —

अपि स्मरथ नः सख्यः स्वानामर्थचिकीर्षया ।
गतांश्चिरायिताञ् छत्रुपक्षक्षपणचेतसः ॥ ४९६ ॥

इति कुरुक्षेत्रयात्रायां च श्रीभगवद्वाक्येन तदनागमने दन्तवक्रवधान्तं तच्छत्रुपक्षक्षपण-लक्षणं सुखदानमेवापेक्षितमासीत् ।
तदेवं मासद्वयं प्रकटं क्रीडित्वा श्रीकृष्णोऽपि तानात्मविरहार्तिभयपीडितानवधाय पुनरेवं माभूदिति भूभारहरणादिप्रयोजनरूपेण निजप्रियजनसङ्गमान्तरायेण संवलित-प्रायां प्रकटलीलां तल्लीलाबहिरङ्गेणापरेण जनेन दुर्वेद्यतया तदन्तरायसम्भावनालेश-रहितया तया निजसन्ततताप्रकटलीलयैकीकृत्य पूर्वोक्ताप्रकटलीलावकाशरूपं श्रीवृन्दा-वनस्यैव प्रकाशविशेषं तेभ्यः "कृष्णं च तत्र छन्दोभिः स्तूयमानम्" (भा० १०।२८।१७) इत्याद्युक्तदिशा स्वेन नाथेन सनाथं श्रीगोलोकाख्यं पदमाविर्भावयामास ।
एकेन प्रकाशेन च द्वारवतीं च जगामेति । तथा पाद्मोत्तरखण्ड एव तदनन्तरं गद्यम् "अथ तत्रस्था नन्दादयः सर्वे जनाः पुत्रदारसहिताः पशुपक्षिमृगादयश्च वासुदेवप्रसादेन दिव्य-रूपधरा विमानारूढाः परमं वैकुण्ठलोकमवापुरिति । कृष्णस्तु नन्दगोपव्रजौकसां सर्वेषां परमं निरामयं स्वपदं दत्त्वा दिवि देवगणैः संस्तूयमानो द्वारवतीं विवेश" इति च ।
इत्थं माथुरहरिवंशेऽपि प्रसिद्धिरस्तीति श्रूयते । अत्र "नन्दादयः पुत्रदारसहिताः" इत्यनेन पुत्राः श्रीकृष्णादयः । दाराः श्रीयशोदादय इति लब्धे पुत्रादिरूपैरेव श्रीकृष्णादिभिः सह तत्प्राप्तेः कथनात् प्रकाशान्तरेण तत्र तेषां स्थितिश्च तैरपि नावगतेति लभ्यते ।
"वासुदेवप्रसादेन" इति वसुदेवादागतस्य तस्याकस्मादागमनरूपेण परमप्रसादेन, दिव्यरूपधरास्तदानन्दोत्फुल्लतया पूर्वतोऽप्याश्चर्यरूपाविर्भावं गता इत्यर्थः । "विमान-मारूढाः" इति गोलोकस्य सर्वोपरिस्थितिदृष्ट्यपेक्षया ।
वस्तुतस्त्वयमभिसन्धिः । "कृष्णोऽपि तं हत्वा यमुनामुत्तीर्य" इति गद्यानुसारेण यमुनाया उत्तरपारे एव व्रजावासस्तदानीमित्यवगम्यते । स च तेषां वृन्दावनदर्शनाक्षमतयैव तत्प-रित्यागेन तत्र गतत्वात् । ततश्च विमानशिरोमणिना स्वेनैव रथेन पुनस्तस्या दक्षिणपार-प्रापणपूर्वकं श्रीमद्गोपेभ्यः श्रीवृन्दावन एव पूर्वं गोलोकतया दर्शिते तत्प्रकाशविशेष एव निगूढं निवेशनं वैकुण्ठावाप्तिरिति । "अक्के चेन् मधु विन्देत किमर्थं पर्वतं व्रजेत्" इति न्यायात् । समीपार्थेऽव्ययमक्केशब्दः ।
"न वेद स्वां गतिं भ्रमन्" (भा० १०।२८।१३) इति वदता श्रीभगवता तेषां गतित्वेनापि विभावितोऽसौ । तस्माद् वृन्दावने निगूढप्रवेश एव समञ्जसः । अत्र वृन्दावननित्य-लीलावाक्यवृन्दं चाधिकमप्यस्ति प्रमाणम् । एवमेव श्रीगर्गवाक्यं कृतार्थं स्यात् (भा० १०।८।१६) —

> एष वः श्रेय आधास्यद् गोपगोकुलनन्दनः ।
> अनेन सर्वदुर्गाणि यूयमञ्जस्तरिष्यथ ॥ ४९७ ॥ इति ।

अथ गद्यान्ते "द्वारवतीं विवेश" इति च शाल्ववधार्थं निर्गतैः श्रीभगवत्प्रत्यागमनं प्रती-क्षमाणैर्यादवैः सहैवेति श्रीभागवतवदेव लभ्यते, तं विना स्वयं गृहप्रवेशानौचित्यात्, "क्षणार्धं मेनिरेऽर्भकाः" (भा० १०।१४।४३) इत्यादिवदल्पकालभावनाच्च ।
तदेवं पुनः श्रीगोकुलागमनाभिप्रायेणैव श्रीवृन्दावननाथोपासनामन्त्रे निहतकंसत्वेन तद्विशेषणं दत्तम् । यथा बौधायनोक्तेः "गोविन्दं मनसा ध्यायेद् गवां मध्ये स्थितं शुभम्"

इति ध्यानानन्तरम् "गोविन्द गोपीजनवल्लभेश कंसासुरघ्न त्रिदशेन्द्रवन्द्य" इत्यादि । अन्यत्र च तत्र "गोविन्द गोपीजनवल्लभेश विध्वस्तकंस" इत्यादि ।
एवमेव गौतमीये श्रीमद्दशाक्षरोपासनायां वैश्यविशेसगोपाललीलाय तस्मै यज्ञसूत्रसमर्पणं विहितम् "यज्ञसूत्रं ततो दद्यादथवा स्वर्णनिर्मितम्" इति ।
इत्थमेव पुनः प्राप्त्यभिप्रायेणोक्तम् "अनुस्मरन्त्यो मां नित्यमचिरान् मामुपैष्यथ" (भा० १०।४७।३६) इति । "दिष्ट्या यदासीन् मत्स्नेहो भवतीनां मदापनः" (भा० १०।८२।४५) इति । "अथानुगृह्य भगवान् गोपीनां स गुरुर्गतिः" (भा० १०।८३।१) इति च ।
तथैव "केवलेन हि भावेन" (भा० ११।१२।८) इत्यादिपद्यद्वयकृतेन साधकचरीणां गोपीनां प्रथमतत्प्राप्ति प्रस्तावेन नित्यप्रेयसीनामपि तन्महावियोगानन्तरप्राप्तिं तस्य वियोगस्यातीतत्वनिर्देशाद् द्रढयति द्वाभ्याम् (भा० ११।१२।१०–११) —

रामेण सार्धं मथुरां प्रणीते श्वाफल्किना मय्यनुरक्तचित्ताः ।
विगाढभावेन न मे वियोगतीव्राधयोऽन्यं ददृशुः सुखाय ॥ ४९८ ॥
तास्ताः क्षपाः प्रेष्ठतमेन नीता मयैव वृन्दावनगोचरेण ।
क्षणार्धवत् ताः पुनरङ्ग तासां हीना मया कल्पसमा बभूवुः ॥ ४९९ ॥

अत्र विगाढभावेन वियोगतीव्राधयः सत्यो मत्तोऽन्यं निजसख्यादिकमपि न सुखाय ददृशुः । ततश्चाधुना तु सुखाय पश्यन्तीति वियोगो नास्तीत्यर्थः । एवं तास्ताः क्षपा मया हीनाः सत्यः कल्पसमा बभुवुः । अधुना तु तादृश्यो न भवन्तीति नास्त्येव वियोग इत्यर्थः । पूर्वं त्वेतमेवोद्धवं प्रति (भा० १०।४६।५–६) —

मयि ताः प्रेयसां प्रेष्ठे दूरस्थे गोकुलस्त्रियः ।
स्मरन्त्योऽङ्ग विमुह्यन्ति विरहौत्कण्ठ्यविह्वलाः ॥ ५०० ॥
धारयन्त्यतिकृच्छ्रेण प्रायः प्राणान् कथञ्चन ।
प्रत्यागमनसन्देशैर्बल्लव्यो मे मदात्मिकाः ॥ ५०१ ॥

इत्यत्र वर्तमानप्रयोग एव कृत इति सोऽयमर्थः स्पष्ट एव प्रतिपत्तव्यः ॥

१७६ । ततश्च प्रकटाप्रकटलीलयोः पृथक्त्वाप्रतिपत्त्यैवाप्रकटभावमापद्य स्वनामरूपयोरेव ताः स्थिता इत्याह (भा० ११।१२।१२) —

ता नाविदन् मय्यनुषङ्गबद्धधियः स्वमात्मानमदस्तथेदम् ।
यथा समाधौ मुनयोऽब्धितोये नद्यः प्रविष्टा इव नामरूपे ॥ ५०२ ॥

तास्तथाभूता विरहौत्कण्ठ्यातिशयेनाभिव्यक्तदुर्धरमहाभावाः सत्यः । तथा "आगमिष्यत्यतिदीर्घेन कालेन व्रजमच्युतः" (भा० १०।४६।३४) इति भगवदुक्त्यनुसारेण "यर्ह्यम्बुजाक्षापससार भो भवान् कुरून् मधून् वा" (भा० १।११।९) इति द्वारकावासिप्रजावचनानुसा-

रेण च कदाचित् तासां दर्शनार्थं गते मयि लब्धो योऽनुषङ्गो महामोदनभावाभिव्यक्तिकारी पुनः संयोगस्तेन बद्धा धीर्यासां तथाभूताः सत्यः स्वं ममतास्पदमात्मानमहङ्कारास्पदं चादोऽप्रकटलीलानुगतत्वेनाभिमतं वा तथेदं प्रकटलीलानुगतत्वेनाभिमतं वा यथा स्यात् तथा तदानीं नाविदन् किन्तु द्वयोरैक्येनैवाविदुरित्यर्थः ।
प्रकटाप्रकटतया भिन्नं प्रकाशद्वयमभिमानद्वयं लीलाद्वयं चाभेदेनैवाजानन्निति विवक्षितम् । ततश्च नाम च रूपं च तस्मिन् तत्तन्नामरूपात्मन्यप्रकटप्रकाशविशेषे प्रविष्टा इव न तु प्रविष्टा वस्त्वभेदादित्यर्थः । नामरूप इति समाहारः ।
तत्र प्रकटाप्रकटलीलागतयोर्नामरूपयोरभेदे दृष्टान्तः "यथा समाधौ मुनयः" इति । समाधिरत्र शुद्धजीवस्येति गम्यम् ।
तयोर्लीलयोर्भेदावेदने दृष्टान्तः "यथाब्धितोये नद्यः" इति । यथा नद्यः पृथिवीगतामब्धितोयगतां च स्वस्थितिं भेदेन न विन्दन्ति किन्तूभयस्यामपि स्थितौ समुद्रतोयानुगतावेव प्रविशन्ति तथा मदनुषङ्गे सति प्रकटामप्रकटां च लीलास्थितिं ताश्च भेदेन न विदुः किन्तु मय्येवाविविशुरित्यर्थः ।
दृष्टान्तस्त्वयम् लीलाभेदावेदनांश एव न तु सर्वावेदनांशे "लोकवत् तु लीलाकैवल्यम्" (ब्र० सू० २।१।३३) इतिवत् । तदेवं प्रकटाप्रकटलीलयोर्द्वयोरपि तासां स्वप्राप्तौ भाव एव कारणं दर्शितम् ॥

१७७ । ततश्चाप्रकटलीलायां प्रविष्टा अपि यद्विशेषेणाधिक्येन तं प्रापुस्तद्दर्शयन्नन्यदप्यनुवदति (भा० ११।१२।१३) —

> मत्कामा रमणं जारमस्वरूपविदोऽबलाः ।
> ब्रह्म मां परमं प्रापुः सङ्गाच्छतसहस्रशः ॥ ५०३ ॥

अयमर्थः — यथा "भीष्ममुदारं दर्शनीयं कटं करोति" इत्यत्र क्रिया खलु विशेष्यस्य कृतिं प्रत्याययन्ती विशेषणानामपि प्रत्याययति । कटं करोति तं च भीष्ममित्यादिरीत्या तथात्रापि प्रतीयते । विशेष्यं चात्र ब्रह्मैव । सर्वविशेषणाश्रयणीयपरमवस्तुतया तेषु विशेषणेषु तस्याभेदेनानुगमात् "एकमेवाद्वितीयं ब्रह्म" (छा० ६।२।१) इति श्रुतेः ।
परममित्यादीनि तु विशेषणानि तदभिन्नत्वेऽपि प्रतिस्वं भेदकत्वात् "स एकधा भवति द्विधा भवति" (छा० ७।२६।२) इत्यादिश्रुतेः । तदेवं स्थिते क्रमोऽप्यत्रार्थिक एव गृह्यते "पच्यन्तां विविधाः पाकाः" (भा० १०।२४।२६) इत्यादौ "सर्वदोहश्च गृह्यताम्" इतिवत् "अग्निहोत्रं जुहोति यवागुं पचति" इत्यादिवच्च ।
ततश्च एवं पूर्वोक्तरीत्या ता अबला ब्रह्म प्रापुः । तच्च परमं भगवद्रूपं प्रापुः "परमं यो महद्ब्रह्म" इति सहस्रनामस्तोत्रात् "शुभाश्रयः स चित्तस्य सर्वगस्य तथात्मनः" (वि० पु० ६।७।७५) इति विष्णुपुराणाच्च ।
तादृशं तं च मां कृष्णाख्यमेव प्रापुः "नराकृति परं ब्रह्म" इति पुराणवर्गात् । "ब्रह्मणो हि प्रतिष्ठाहम्" (गीता १४।२७) इति श्रीगीतोपनिषद्भ्यः । तद्रूपस्यैव स्वस्य प्राप्तिस्तासु स्वयमेव श्रीभगवता प्रोक्ता (भा० १०।४७।३६) —

मय्यावेश्य मनः कृष्णे विमुक्ताशेषवृत्ति यत् ।
अनुस्मरन्त्यो मां नित्यमचिरान् मामुपैष्यथ ॥ ५०४ ॥ इति ।

भा० १०।८२।४५—

मयि भक्तिर्हि भूतानाममृतत्वाय कल्पते ।
दिष्ट्या यदासीन् मत्स्नेहो भवतीनां मदापनः ॥ ५०५ ॥ इति च ।

अथ तादृशं च मां भावविशेषसंवलितमेव प्रापुरित्याह “मत्कामा रमणं जारमस्वरूपविदः” इति ।

रमणशब्देन पतिरेवोच्यते नन्दनशब्देन पुत्र इव रूढ्या यौगिकत्वबाधात् । यथा मित्रानन्दनशब्देन मित्रापुत्र एवोच्यते न तु मित्रापतिः । मित्रारमणशब्देन च मित्रापतिः । न तु मित्रापुत्रः । तद्वदत्रापि । कोषमते च रमणशब्दः पत्यावेव रूढः “पटोलमूले रमणं स्यात् तथा रमणः प्रिये” इति विश्वप्रकाशात् । स्त्रीजातिसम्बन्धे सति रमणशब्दवत् प्रियशब्देन पतिरेवोच्यते तथैव प्रसिद्धेः “धवः प्रियः पतिर्भर्ता” इत्यमरकोशाच्च ।

पतित्वं तूद्वाहेन कन्यायाः स्वीकारित्वमिति लोक एव भगवति तु स्वभावेनापि दृश्यते । परमव्योमाधिपस्य महालक्ष्मीपतित्वं ह्यनादिसिद्धमिति ।

जारशब्देन सर्वत्रोपपतिरेवोच्यते “जारस्तूपपतिः समौ” इत्यमरकोशात् । उपपतित्वं चाधर्मेण प्रतीयमानत्वं यथोपधर्मत्वमधर्मे धर्मायमानत्वमिति । उभयत्रापि वेदविरुद्धत्वात् ।

तदेव “जारः पापपतिः समौ” इति त्रिकाण्डशेषः । ततश्च जारत्वं रमणे नास्ति रमणत्वं जारे नास्ति । धर्मोपधर्मयोरिव द्रव्यस्य स्वामिचौरयोरिव च विरुद्धवस्तुत्वादिति स्थिते “ब्रह्म मां परमम्” इतिवन् नैकाधिकरणत्वं जारत्वरमणत्वयोः सम्भवति ।

तस्मादधिकारिणीनां तासां विशेषणभेदेन तद्द्वयं समादधत् तदर्थं चैकस्य वास्तवत्वमन्यस्य त्ववास्तवत्वं दर्शयति “मत्कामा रमणम्” इति “जारमस्वरूपविदः” इत्याभ्यां तत्र जारत्वस्यैव प्रातीतिकमात्रत्वादवास्तवत्वं स्वामिभिरङ्गीकृतं नान्यस्य “जारबुद्धिवेद्यमपि” इत्युक्तत्वात् । स्थापयिष्यते च तदिदमस्माभिरुत्तरत्र ।

ततश्चायमर्थः—स्वरूपं मन्नित्यप्रेयसीरूपत्वमजानन्त्यो जन्मादिलीलाशक्त्या विस्मरन्त्यो मां जारं प्रापुः धर्मविरुद्धतया प्रतीतावपि रागातिशयेन जारतयापि स्वीकृतं प्रापुरित्यर्थः । तथा तत्प्राप्तावपि “मत्कामाः” इति “यत् पत्यपत्यसुहृदामनुवृत्तिरङ्ग” (भा० १०।२९।३२) इत्यादिरीत्या मयि कामोऽभिलाषविशेषः ।

कथमन्यत्र पतित्वं स्वप्नवद् विलीयेत श्रीकृष्ण एव पतित्वं जाग्रद्वदाविर्भवेदित्येवंरूपो यासां तादृश्यः सत्यो रमणरूपमेव मां प्रापुरिति । एतदर्थमेव पृथक्कृत्य तासां विशेषणाभ्यां सह स्वविशेषणद्वयम् “मत्कामा रमणम्” इति “जारमस्वरूपविदः” इति यथायोगं पठितं न तु “ब्रह्म मां परमम्” इत्येभिः सह कृतम् ।

तदिदं स्वेषु तदीयस्वीयात्वं प्रकटयितुमपि तासां प्रार्थनापि दृश्यते । यस्मात् “अपि बत मधुपुर्यामार्यपुत्रोऽधुनास्ते” (भा० १०।४७।२१) इत्यत्र तदीयात्व एव स्वाभिमतिं व्यज्य

तत्र च किङ्करीणामित्यनेन दैन्यात् पुनस्तदपलाप्य पुनरुत्कण्ठया "भुजमगुरुसुगन्धम्" (भा० १०।४७।२१) इत्यादिना स्पष्टतयैव स्वीयात्वेन स्वेषु तदीयस्वीकारस्याभिकाङ्क्षाव्य-ञ्जना श्रीराधादेव्या कृतेति हि गम्यते । दैन्यं चात्र पतित्वकामनायामपि "श्यामसुन्दर ते दास्यः" (भा० १०।२२।१५) इतिवद् गम्यम् ।
स्पष्टं च तत्स्वीकरणप्रार्थना च ।
यद्यपि "मामेव दयितं प्रेष्ठमात्मानं मनसा गताः" (भा० १०।४६।४) इत्यनेन "बल्लव्यो मे मदात्मिकाः" (भा० १०।४६।६) इत्यनेन चास्मासु स्वीयात्वभावस्तस्यापि मनसि वर्तत एव तथापि "धारयन्त्यतिकृच्छ्रेण" (भा० १०।४६।६) इत्यादि स्वाभिप्रायेण यद्यागत्य स्पष्टमेव स्वीक्रियामहे तदैवास्माकं निस्तारः स्यादिति तस्याभिप्रायः । तस्मात् साध्वेव तथा व्याख्यातम् "मत्कामा रमणम्" इति ।
अथ प्रस्तुतमेवानुसरामः । जारतया प्रतीतत्वेन रमणत्वेन च प्राप्तौ हेतुः — अबला इति । एतत्पदेन हि तासु निजकारुण्यं व्यञ्जितम् । तेन च तस्य कारणम् "रामेण सार्धम्" इत्या-द्युक्तं तासां महाप्रेम स्मारितम् ।
तस्मात् तथा मत्प्राप्तौ तादृशमहाप्रेमैव हेतुरित्यर्थः । तदेवमुभयथाप्राप्तावपि मत्कामा इत्यनेन रमणतया प्राप्तावेव पर्याप्तिर्दर्शिता । अन्यथा तु "अहं भक्तपराधीनः" (भा० ९।४।६३) इति "स्वेच्छामयस्य" (भा० १०।१४।२) इति "ये यथा मां प्रपद्यन्ते" (गीता ४।११) इति च प्रतिज्ञाहानिः स्यात् ।
तत्र "ये यथा" इति येन कामनाप्रकारेणेत्यर्थः । तत्क्रतुन्यायात् । तदेवं तासामभीष्टपू-रणं कैमुत्येनैवायातम् । ततश्चास्तां तासां तदीयपरमलक्ष्मीरूपकाणां वार्ता, तत्सङ्गादन्या अपि शतसहस्रशस्तथा मां प्रापुरित्याह — सङ्गादिति ।
अत्रैवं विवेचनीयम् — तासां नित्यप्रेयसीनां तस्मिन् जारत्वं न सम्भवत्येव । श्रीमद्दशा-र्णादौ हि तन्नाम्ना तासां पतित्वेनैवासावभिधीयते "वल्लभो दयितेऽध्यक्षे" इति विश्वप्र-काशादिगतवल्लभशब्दस्य द्व्यर्थत्वेऽपि दयितत्वस्य तास्वर्हत्वात् । गौतमीयतन्त्रे च तन्मन्त्रव्याख्यायां पतित्वेनैव तद्व्याख्या दृश्यते । तन्नाम्नः खलु ब्रह्मत्वेश्वरत्वयोगेन व्या-ख्याद्वयं विधायोत्तरपक्षत्वेनाभीष्टं व्याख्यानमाह गौतमीयतन्त्रे द्वितीयाध्याये दशार्ण-व्याख्यायाम् —

> अनेकजन्मसिद्धानां गोपीनां पतिरेव वा ।
> नन्दनन्दन इत्युक्तस्त्रैलोक्यानन्दवर्धनः ॥ ५०६ ॥ इति ।

अत्रानेकजन्मसिद्धत्वमनादिकल्पपरम्पराप्रादुर्भूतत्वमेवोच्यते "बहूनि मे व्यतीतानि जन्मानि तव चार्जुन" (गीता ४।५) इतिवत् ।
वैवस्वतमन्वन्तरान्तर्गतावश्यम्भावं तत्प्रादुर्भावं विना कल्पाभावात् ।
अनादिसिद्धवेदप्राप्ततत्तदुपासनासिद्धानादित्वात् ।
तदेकपतित्वं च तत्तन्मन्त्रोपासनाशास्त्रे तासां कालानवच्छेदेन तदाराधनतत्परतया स्थि-तानां ध्यातुं विधीयमानत्वात् ।

पत्यन्तरसम्बन्धगन्धस्याप्यश्रवणात् ।
तथा च ब्रह्मसंहितायाम् (ब्र० सं० ५।३७) —

> आनन्दचिन्मयरसप्रतिभाविताभिस्ताभिर्य एव निजरूपतया कलाभिः ।
> गोलोक एव निवसत्यखिलात्मभूतो गोविन्दमादिपुरुषं तमहं भजामि ॥ ५०७ ॥
> इति ।

अत्र निजरूपतया स्वीयतया न तु परकीयतया लक्षिताभिस्ताभिः कलाभिः शक्तिभिः "लक्ष्मीसहस्रशतसम्भ्रमसेव्यमानम्" (ब्र० सं० ५।२९) इत्युक्तरीत्या मन्त्रतस्तच्छब्दप्राप्त्या च गोपीरूपाभिः सह "गोलोक एव निवसति" इति प्रकटलीलायामिव परकीयात्वप्रपञ्चनं निषिद्धम् । कलात्वेनैव निजरूपत्वे प्राप्ते निजरूपतयेत्यस्य तथैव सार्थकत्वात् । तथैवोक्तम् "श्रियः कान्ताः कान्तः परमपुरुषः" (ब्र० सं० ५।५६) इति । अत्र श्रीपरमपुरुषयोरौपपत्यं न सम्भवतीति युक्तं च दर्शितवान् ।

तापन्यां ताः प्रति दुर्वाससो वचनम् "स वो हि स्वामी भवति" (गो० ता० उ० २।२३) इति । पतिरमणवल्लभशब्दवत् स्वामिशब्दश्च तथा प्रसिद्धः "स्वामिनौ देवृदेवरौ" इत्यमरकोषात् । ते च शब्दा एकनिष्ठत्वेन प्रयोगादन्योऽन्यमन्यार्थतां निरस्यन्ति "कृष्णाय वासुदेवाय देवकीनन्दनाय च" (भा० १।८।२१) इत्यादिवत् ।

आस्तामप्रकटलीलाया वार्ता गुप्ततादृशतायां प्रकटलीलायामपि रासप्रसङ्गे श्रीशुकेनापि सुखावेशादगुप्तमेव "कृष्णवध्वः" (भा० १०।३३।८) इत्युक्तम् ।

"ऋषभस्य जगुः कृतानि" (भा० १०।३३।२२) इत्यत्र स्वामिनापि "ऋषभस्य पत्युः" इति व्याख्यातम् ।

"गोपीपतिरनन्तोऽपि वंशीध्वनिवशं गतः" इति सङ्गीतशास्त्रे ।

श्रीयमुनास्तवे श्रीशङ्कराचार्यवचनैरप्युक्तम् "विधेहि तस्य राधिकाधवाङ्घ्रिपङ्कजे रतिम्" इति ।

श्रीगीतगोविन्दे श्रीजयदेवचरणैश्च "पत्युर्मनः कीलितम्" इति ।

तस्मात् स्वयं भगवता साध्वेव दर्शितम् "जारमस्वरूपविदः" इति "मत्कामा रमणम्" इति च ।

पूर्वं ययैव लीलाशक्त्या तासामुत्कण्ठातिशयप्रकटनार्थं तन्नित्यप्रेयसीत्वस्वरूपानुसन्धानावरणपूर्वकं श्रीकृष्णे जारत्वं प्रतायितम् । आयत्यामपि तथैव पुनस्तस्मिन् स्वाभाविकपतित्वप्रकाशमयसुखचमत्कारकरतादृशस्वरूपानुसन्धानं क्रियत इति भावः ।

आस्तां नित्यप्रेयसीनां तासां वार्ता तत्सङ्गात् प्राप्तवतीनामन्यासामपि तस्मिन् रमणत्वमेव सिध्यति न तु जारत्वम् । तदेव व्यञ्जितम् "मत्कामाः" इत्यनेन "ब्रह्म मां परमं प्रापुः" इत्यनेन च परमब्रह्मणः सर्वांशित्वात् सर्वपातृत्वाच्च सर्वाधिपत्यमेव सिध्यति न तु परत्वम् । तत्र च सति तासु तादृशमत्कामासु पतित्वमेव स्यान् न जारत्वमित्यभिप्रायात् ।

तदुक्तं दत्तात्रेयणापि पारमार्थिकतद्विवेकश्लाघागर्भगुरुत्वेन मतया पिङ्गलया "आत्मना रमणेन वै" (भा० ११।८।४०) इति "रमेऽनेन यथा रमा" (भा० ११।८।३५) इति । रमादेव्या च "स वै पतिः स्यादकुतोभयः स्वयं समन्ततः पाति भयातुरं जनम्" (भा० ५।१८।२०) इति । तस्माद्वास्तववस्तुन एव फलत्वपर्यवसानाज् जारबुद्ध्यापि प्राप्ते तस्मिन् रमणतया प्राप्तेरेव लालसाविषयत्वाच्च पतित्वमेव पर्यवस्यति । तदेवमेवोक्तम् (भा० १०।२९।११) —

> तमेव परमात्मानं जारबुद्ध्यापि सङ्गताः
> जहुर्गुणमयं देहं सद्यः प्रक्षीणबन्धनाः ॥ ५०८ ॥

अत्र "जिघांसयापि हरये स्तनं दत्त्वाप सद्गतिम्" (भा० १०।६।३५) इति यथा विगीतार्थेन जिघांसयापदेन संसजन्नपिशब्दो जिघांसायास्तत्राप्रवर्तनीयत्वं व्यनक्ति तथापि पुरुषार्थः सिद्ध इति विषयस्य शक्तिमेव स्थापयति तथा विगीतार्थेन जारपदेन संसजनजारत्वस्य तथात्वं विषयस्य च तां गमयति ।
रमणत्वं तु न तथा विगीतं प्रत्युत (भा० १०।९०।२७) —

> याः सम्पर्यचरन् प्रेम्णा पादसंवाहनादिभिः ।
> जगद्गुरुं भर्तृबुद्ध्या तासां किं वर्ण्यते तपः ॥ ५०९ ॥

इत्यादिना सुष्ठु स्तुतमेव ।
न च "आसामहो चरणरेणुजुषाम्" (भा० १०।४७।६१) इत्यादिना जारत्वमपि स्तुतं किन्तु तासां राग एव स्तुतः । येन जारत्वेनाप्यसौ स्वीकृत इति । जारबुद्ध्या सहेति या जारवादिनः कल्पना सा त्वसत्यैव, अनर्हत्वाज्, जारपदसंसक्तस्यापिशब्दस्यान्यथाप्रत्यायकत्वेन दर्शितत्वात्, सहपदसापेक्षत्वेन कष्टत्वात् "उपपदविभक्तेः कारकविभक्तिर्बलीयसी" इति न्यायात्, साधकतमस्यान्यस्य कल्पनीयत्वाच्च ।

> ते सर्वे स्त्रीत्वमापन्नाः समुद्भूताश्च गोकुले ।
> हरिं सम्प्राप्य कामेन ततो मुक्ता भवार्णवात् ॥ ५१० ॥

इति पाद्मोत्तरखण्डश्रवणादेताः खलु तदापि न सिद्धदेहा इति पर्यवसीयते ।
ततश्च तस्य देहस्य पत्युश्च त्यागेन श्रीकृष्णप्राप्तौ परकीयात्वानुपपत्तिः । किमुत मायामात्रेण परकीयात्वेन प्रतीयमानानां नित्यप्रेयसीनाम् । एवमेव च स्वयं भगवतापि दर्शितम् "या मया क्रीडता रात्र्याम्" (भा० १०।४७।३७) इत्यादिना ।
किन्तु जारपदमेतादृगश्लीलं यत् खलु जारतया भजन्तीभिरपि न जारं प्रतिवचनविषयीक्रियते किन्तु रमणादिपदमेवेति तदभिधेयं कथमिव फलाय कल्पते ?
तदेवं जारमिति ब्रह्मेत्याद्यप्यनूद्यवर्गान्तःपात्येव किन्तु भ्रममयत्वान् निन्दितत्वाच्च जारत्वस्य हेयत्वम् । रमणमिति तु विधेयमिति यदुक्तं तत् खलु प्रकटलीलायां पूर्वस्य स्पष्टतया वर्णितत्वेन श्रोतरि प्रसिद्धत्वादुत्तरस्य तद्वदवर्णितत्वेनापि प्रसिद्धत्वादपि सिध्यति । प्रसिद्धत्वाप्रसिद्धत्वे एव हि तयोः प्रवृत्तिहेतुः "ब्राह्मणोऽयं पण्डितः" इतिवत् ।

न च “अनुवादमनुक्त्वा तु न विधेयमुदीरयेत्” इति सर्वत्रोपलभ्यते । “यस्य पर्णमयी जुहुर्भवति” इत्यत्र वैपरीत्यदर्शनात् “अप्राप्ते हि शास्त्रमर्थवत्” इति न्यायेन च “दध्ना जुहोति” इत्यादिवदप्राप्ते रमणत्व एव तात्पर्यं न च पूर्वपूर्वप्रसिद्धे ब्रह्मत्वादिजारत्वपर्यन्ते । “अनधिगतार्थगन्तृप्रमाणम्” इति च वृद्धाः ।

किं च जारत्वस्य वास्तवत्वेऽश्लीलता दुर्निवारा । अवास्तवत्वे तु व्यभिचारित्वमेवेति । सर्वथा तद्विधेयं न भवत्येव वेत्यलमतिविस्तरेण ।

अत्र ब्रह्मेत्येवोक्ते भगवन्तं श्रुतनिर्विशेषब्रह्मवादस्य कस्यचित् सन्देहविषयो भवतीति परममित्युक्तम् । परममित्युक्ते श्रीकृष्णरूपत्वं न प्रतीयत इति मामित्युक्तम् । मामित्येवोक्ते ब्रह्मत्वं परमत्वं च प्रमाणान्तरसापेक्षं भवतीति तत् तदुच्यते ।

तथा जारमित्येवोक्ते पर्यवसितं न सिध्यतीति रमणमित्युक्तम् । रमणमित्येवोक्ते पूर्वप्रतीतत्वाद् रमणपदेनापि कथञ्चिज् जारत्वमेव लक्ष्येतेति तन्निरासार्थं जारमिति चानूद्यते । परमाभीष्टत्वादपि रमणत्वस्यैव विधेयत्वं न तु जारत्वस्य ।

तथापि सर्वत्र पर्यवसाने निरुपद्रवाभीष्टपर्याप्तिरेव खलु सिद्धान्तरसशास्त्रयोः सम्मताः । प्राचीनैराधुनिकैश्च लौकिकैरलौकिकैरपि कविभिस्तथैवोपाख्यायते । श्रीमदस्मदुपजीव्यचरणैरपि ललितमाधवे पूर्णमनोरथनामन्यङ्के तथैव समापितम् । तदेवोज्ज्वलनीलमणौ प्रमाणीकृत्य सर्वरसपूरकसमृद्धिमदाख्यः सम्भोग उदाहृतः । श्रीभगवता च “यत् त्वहं भवतीनां वै” (भा० १०।४७।३४) इत्यादिना “या मया क्रीडता रात्र्याम्” (भा० १०।४७।३७) इत्यन्तेन तथैवाभिप्रेतम् ।

जारभावमयः सङ्गमश्च सदैव सोपद्रवः । सोपद्रवतमेव हि जारवादिनां रसहेतुरिति गत्यन्तरं च न शक्यमिति पर्यवसानपुरुषार्थत्वे तत्तच्छास्त्रसम्मतो न स्यात् । तथा परकोटिसङ्ख्यानाम् “निजपदाब्जदलैः” (भा० १०।३५।१६) इत्यादियुगले “कुजगतिं गमिता न विदामः कश्मलेन कवरं वसनं वा” (भा० १०।३५।१७) इत्यादिरीतीनामुद्भटभावानां तासां व्रजे भावसङ्गोपनं पूर्वमपि दुष्करमासीत् ।

महाविरहे तु जाते “निवारयामः समुपेत्य माधवं किं नोऽकरिष्यन् कुलवृद्धबान्धवाः” (भा० १०।३९।२८) इति “विसृज्य लज्जां रुरुदुः स्म सुस्वरं गोविन्द दामोदर माधवेति” (भा० १०।३९।३१) चेति “ता मन्मनस्का मत्प्राणा मदर्थे त्यक्तदैहिकाः” (भा० १०।४६।४) इति “कृष्णदूते व्रजायाते उद्धवे त्यक्तलौकिकाः” (भा० १०।४७।९) इति “गतह्रियः” (भा० १०।४७।१०) इति “काचिन् मधुकरं दृष्ट्वा” (भा० १०।४७।११) इति “या दुस्त्यजं स्वजनमार्यपथं च हित्वा” (भा० १०।४७।६१) इति “गोप्यो हसन्त्यः पप्रच्छू रामसन्दर्शनादृताः” (भा० १०।६५।९) इति । भा० १०।६५।११—

> मातरं पितरं भ्रातॄन् पतीन् पुत्रान् स्वसॄनपि ।
> यदर्थे जहिम दाशार्ह दुस्त्यजान् स्वजनान् प्रभो ॥ ५११ ॥

इति च श्रूयते ।

अत्र "निवारयामः" इत्यादिकं यथा सङ्क्लृप्तं तथैव "विसृज्य लज्जाम्" इत्यादिनाचरितम् । तासां लज्जात्यागः खलु भावव्यक्त्यैव स्यात्—सर्वेषां गोकुलवासिनां रोदनादिसाम्यात् । ततस्तद्व्यक्तिपूर्वकरोदनद्वारेण ताभिर्निवारणमपि योग्यमिति ।
एवं त्यक्तलौकिका इत्यादिषु च सुष्ठ्वेव भावव्यक्तिर्गम्यते । किं बहुना ? "मातरम्" इत्यादौ "मात्रादीन् जहिम" इत्युक्तं न तु पूर्वरागवत् । "पतिसुतान्वयभ्रातृबान्धवानतिविलङ्घ्य" (भा० १०।३१।१६) इति मात्रमुक्तम् ।
तदेवं तदानीं तु दुर्धरमहाभावेनोन्मत्तचेष्टानां निरपत्रपाणां व्यञ्जितभावानां त्यक्तमात्रादीनां तासामसङ्ख्यानां भावसङ्गोपनं नोपपद्यत एव । किन्तु ज्ञातोऽप्यसौ महाविरहपीडया सर्वैरज्ञात इवासीत् । अनन्तरं त्वनुसन्दध एव । स तु भावसङ्गोपनयैव कालकतिपयं स्वस्य रसतामावहति । व्यक्तत्वे तु स्वस्य परेषामपि सर्वत्र वस्तुतो धर्ममयत्वप्रतीतौ जातायामेवेति रसविदां मतम् । अधर्ममयत्वप्रतीतौ त्वश्लीलतया व्याहन्यत एव रसः । अधर्ममयत्वं च द्विधा—परकीयत्वेन परस्पृष्टत्वेन च । तस्माद् यथैश्वर्यज्ञानमय्यां श्रीपरीक्षित्सभायामैश्वर्यज्ञानमय्या रीत्यैव तत् परिहृत्य रसावहत्वं समाहितम् । तथा लोकवल्लीलाकैवल्यावलम्बनप्रेममय्यां श्रीगोकुलसभायां लोकरीत्यैव समाधेयम् ।
तथा हि (भा० १०।३३।३८)—

> नासूयन् खलु कृष्णाय मोहितास्तस्य मायया ।
> मन्यमानाः स्वपार्श्वस्थान् स्वान् स्वान् दारान् व्रजौकसः ॥ ५१२ ॥

इति च यच्छ्रूयते तच्चात्राप्यवश्यमेव सङ्गमनीयम् ।
तस्य चायमर्थः—तस्य मायया कर्त्र्या मोहिताः सन्तो नासूयन् । तस्य स्वनित्यप्रेयसीस्वीकारलक्षणे गुणे कथमसावस्मद्धामार्थसुहृतप्रियात्मतनयप्राणाशयजीवातुतमः परदारस्वीकारामङ्गलमङ्गीकरोतीति दोषारोपं नाकुर्वन्नित्यर्थः ।
मायामोहितत्वमेवाह—मन्येति । स्वरूपसिद्धानां भगवद्दाराणामपरकर्तृकबलात्कारपरिहारार्थमधुना चान्यदा च तत्तदाकारतया तस्य मायाकल्पिता ये ये स्वे स्वे दारास्तान् स्वस्वपार्श्वस्थान् मन्यमाना भगवद्दाराभेदेन स्वमत्या निश्चिन्वाना इत्यर्थः । तदेवम् "अन्तर्गृहगताः काश्चित्" (भा० १०।२९।९) इत्यत्रोक्तानामपि समाधानं ज्ञेयम् ।
परमसमर्थायास्तस्या मायाया निजप्रभुप्रेयसीनां तदेकानुरागस्वभावानां मर्यादारक्षणार्थं परिणयमारभ्य सदैव सावधानताया योग्यत्वात् तद्दिनमुपलक्षणमेवेति । श्रूयते च कूर्मपुराणे द्वात्रिंशाध्यायस्यान्ते पतिव्रतामात्रस्य परात् परिभवो न सम्भवतीति कैमुत्येन श्रीसीतादेव्युदाहृता—

> पतिव्रताधर्मपरा रुद्राण्येव न संशयः ।
> नास्याः पराभवं कर्तुं शक्नोतीह जनः क्वचित् ॥ ५१३ ॥
> यथा रामस्य सुभगा सीता त्रैलोकविश्रुता ।
> पत्नी दाशरथेर्देवी विजिग्ये राक्षसेश्वरम् ॥ ५१४ ॥

रामस्य भार्यां विमलां रावणो राक्षसेश्वरः ।
सीतां विशालनयनां चकमे कालचोदितः ॥ ५१५ ॥
गृहीत्वा मायया वेशं चरन्तीं विजने वने ।
समाहर्तुं मतिं चक्रे तापसः किल भाविनीम् ॥ ५१६ ॥
विज्ञाया सा च तद्भावं स्मृत्वा दाशरथिं पतिम् ।
जगाम शरणं वह्निमावसथ्यं शुचिस्मिता ॥ ५१७ ॥
उपतस्थे महायोगं सर्वपापविनाशनम् ।
कृताञ्जली रामपत्नी साक्षात् पतिमिवाच्युतम् ॥ ५१८ ॥
नमस्यामि महायोगं कृतान्तं गहनं परम् ।
दाहकं सर्वभूतानामीशानं कालरूपिणम् ॥ ५१९ ॥ इत्यादि ।
इति वह्निं पूज्य जप्त्वा रामपत्नी यशस्विनी ।
ध्यायन्ती मनसा तस्थौ राममुन्मीलितेक्षणा ॥ ५२० ॥
अथावसथ्याद् भगवान् हव्यवाहो महेश्वरः ।
आविरासीत् सुदीप्तात्मा तेजसैव दहन्निव ॥ ५२१ ॥
सृष्ट्वा मायामयीं सीतां स रावणवधेच्छया ।
सीतामादाय धर्मिष्ठां पावकोऽन्तरधीयत ॥ ५२२ ॥
तां दृष्ट्वा तादृशीं सीतां रावणो राक्षसेश्वरः ।
समादाय ययौ लङ्कां सागरान्तरसंस्थिताम् ॥ ५२३ ॥
कृत्वा च रावणवधं रामो लक्षणसंयुतः ।
समादायाभवत् सीतां शङ्काकुलितमानसः ॥ ५२४ ॥
सा प्रत्ययाय भूतानां सीता मायामयी पुनः ।
विवेश पावकं दीप्तं ददाह ज्वलनोऽपि ताम् ॥ ५२५ ॥
दग्ध्वा मायामयीं सीतां भगवानुग्रदीधितिः ।
रामायादर्शयत् सीतां पावकोऽभूत् सुरप्रियः ॥ ५२६ ॥
प्रगृह्य भर्तुश्चरणौ कराभ्यां सा सुमध्यमा ।
चकार प्रणतिं भूमौ रामाय जनकात्मजा ॥ ५२७ ॥
दृष्ट्वा हृष्टमना रामो विस्मयाकुललोचनः ।
ननाम वह्निं शिरसा तोषयामास राघवः ॥ ५२८ ॥
उवाच वह्ने भगवन् किमेषा वरवर्णिनी ।
दग्ध्वा भगवता पूर्वं दृष्ट्या मत्पार्श्वमागता ॥ ५२९ ॥
तमाह देवो लोकानां दाहको हव्यवाहनः ।
यथा वृत्तं दाशरथिं भूतानामेव सन्निधौ ॥ ५३० ॥ इत्यादि ।

एवमग्निपुराणमपि दृश्यम् । तदेवमपि यत् तु वाल्मीकिना नेदं स्पष्टीकृतं तत् खलु करुण-रसपोषणार्थमेवेति गम्यते । सेयं च तस्य परिपाटी क्वचिदन्येनाप्युपजीव्यत इति ज्ञेयम् । तदेवं पतिव्रतामात्राणां विशेषतः श्रीभगवत्प्रेयस्याः प्रभावे सति (भा० १०।८।१८) —

य एतस्मिन् महाभागे प्रीतिं कुर्वन्ति मानवाः ।
नारयोऽभिभवन्त्येतान् विष्णुपक्षानिवासुराः ॥ ५३१ ॥

इति सामान्यविषये गर्गवचने च सति तादृशीनां भ्रमेऽपि तं नित्यकान्तमपरित्यजन्तीनां नित्यं तत्कान्तं परिचरन्ती माया श्रीरामावसथ्याग्निवदपि किं रक्षां न कुर्वीत ?
किन्तु तदीयलीलानाट्यरक्षार्थम् तत्पतिम्मन्यादिष्वेव विवाहादिशयनादिष्वेव च स्वरूपसिद्धा आवव्रिरे । अन्येषु चान्यदा च कल्पिता एवेति गम्यते । तावदेव च युक्तं तासु मर्यादारक्षणोत्कण्ठावर्धनैकप्रयोजनत्वात् तस्याः ।
अथ तासामपत्यश्रवणं च यातृमानिनीप्रभृतीनापत्येषु तद्व्यवहारात् । साम्बलक्ष्मणाप्रत्यानयने श्रीबलदेवमुद्दिश्य "ससुतः सस्नुषः प्रायात् सुहृद्भिरभिनन्दितः" (भा० १०।६८।५२) इतिवत् । स्वापत्यत्वे सति विभाववैगुण्येन रसाभासत्वमापद्येत । ततश्च "भजते तादृशीः क्रीडा याः श्रुत्वा तत्परो भवेत्" (भा० १०।३३।३७) इति "सिषेव" इत्यादौ "सर्वाः शरत्काव्यकथारसाश्रयाः" (भा० १०।३३।२६) इति च विरुध्यते ।
परपुत्रत्वप्रतिपादनायैव "पाययन्त्यः" (भा० १०।२९।६) इत्यन्ते "सुतान् पयः" इत्येवोक्तं न तु सुतान् स्तनमिति । अत एव "मातरः पितरः पुत्रा भ्रातरः पतयश्च वः" (भा० १०।२९।२०) इति श्रीभगवद्वाक्यं परिहासत्वेनैव रसाय सङ्गच्छते । वास्तवत्वेन तु वैरस्यायैव स्यात् तासामङ्गीकरिष्यमाणत्वात् । क्वचित् ताभिरेव तेषु यत् पतिशब्दः प्रयुक्तस्तद्बहिर्लोकव्यवहारत एव नान्तर्दृष्टितः ।
"यत्पत्यपत्यसुहृदामनुवृत्तिरङ्ग" (भा० १०।२९।३२) इत्यादिना तदनङ्गीकारात् ।
"मामेव दयितं प्रेष्ठमात्मानं मनसा गताः" (भा० १०।४६।४) इति श्रीभगवता तासामन्तःकरणप्रकाशनात् ।
"परं सौख्यं हि नैराश्यं स्वैरिण्यप्याह पिङ्गला" (भा० १०।४७।४७) इत्यादिना ताभिः स्वेषां तदेकनिष्ठताव्यञ्जनात् ।
"गोप्यः किमाचरदयम्" इत्यादौ "दामोदराधरसुधामपि गोपिकानां भुङ्क्ते स्वयम्" (भा० १०।२१।९) इत्यनेन । "अपि बत मधुपुर्यामार्यपुत्रोऽधुनास्ते" (भा० १०।४७।२१) इत्यनेन च ताभिः स्वयमुक्तेश्च ।
तत एतदुक्तं भवति रासपञ्चाध्याय्याम् "नासूयन् खलु कृष्णाय" (भा० १०।३३।३८) इत्युक्तदिशा "स वो हि स्वामी भवति" (गो० ता० उ० २।२३) इति ताः प्रति तापनीस्थितदुर्वाससो वाक्यवत् "कृष्णवध्वः" (भा० १०।३३।८) इत्युक्तरीत्या च याः खलु "योगमायामुपाश्रितः" (भा० १०।२९।१) इति श्रवणात् तत्तदर्थभगवन्नियुक्तयोगमायाकल्पिताकल्पिततया योगमायैकविदितं स्वतः परतश्च प्रच्छन्नं द्विविधायमाना आसन् तास्तु पश्चाद् योगमाययैव देव्या प्रापिताभ्यां मर्यादोत्कलिकाभ्यां स्वपालितस्य रसपोषतरोः पर्यवसाननिरुपद्रवमहासुखप्राप्तिरूपाय फलाय मुन्याकाशवाण्यादिकं द्वारीकृत्य वा स्वयमेव प्रकटीभूय वा श्रीगोकुलवासिनः प्रति तथैव व्यक्तीकृताः स्वरूपेण मामेव रमणं प्रापुः "नासूयन् खलु" (भा० १०।३३।३८) इत्याद्युक्तासूयापरिहारस्य सम्यक्त्वाय तत्कल्पितास्तु स्वस्वपतिमित्येव श्रीभगवन्मतम् ।

दृश्यते च सञ्ज्ञाच्छायादिवत् कल्पनाया व्यक्तत्वमेव परिणामः सर्वत्र । तदित्थमेव मातरपितरादीनामभीष्टं सिध्यति तस्मिन्नेव तेषां वात्सल्यस्य विश्रान्तेः ।
न च दाम्पत्ये प्रकटे (उ० नी० १।२०) —

बहु वार्यते यतः खलु यत्र प्रच्छन्नकामुकत्वं च ।
या च मिथो दुर्लभता सा परमा मन्मथस्य रतिः ॥ ५३२ ॥

इति भरतानुसृतनिवारणाद्यभावाद्रसनिष्पत्तिर्न स्यादिति वाच्यम् ।
तस्य निवारणं खलु न भयदानेन भवेत् सर्वातिशायिसामर्थ्यात् किन्तु लज्जादानेनैव । लज्जा तु कुलीनकुमाराणां स्वस्त्रीगतरहस्यविहारविशेषस्य परेणानुमितावपि जायते । किमुत —

यत्र ह्रीः श्रीः स्थिता तत्र यत्र श्रीस्तत्र सन्नतिः ।
सन्नतिर्ह्रीस्तथा श्रीश्च नित्यं कृष्णे महात्मनि ॥ ५३३ ॥

इति हरिवंशाद्युक्तानुसारेण परमलज्जादिगुणनिधानस्य ।
व्रजे नववयः शीलतामेवाभिव्यञ्जतस्तस्य सिद्धे च लज्जालुत्वे स्वयमेव निवारणादित्रयं सिध्यति । किन्तु लज्जा द्विविधा सङ्गोप्य न्याय्यकर्मणि सङ्कोचमात्रकरी । अन्याय्यकर्मणि न्यक्कारकरी च ।
अत्र पूर्वा व्याजान्तराच्छन्ना नातिविरोधिनी । उत्तरा यशः प्रियेण तेन कृतेऽपि व्याजे तस्यानुमितिश्चेद् द्विगुणीभूय विरोधिनी । तदेवं सति “गोपनारीभिरनिशं क्रीडयामास केशवः” (प० पु० ६।२५२।२६) इति श्रुता निशक्रीडा पारदार्ये सर्वथा न सम्भवति स्वदारत्वे तु तासामसङ्ख्यानां स्वस्वरूपपत्यप्राप्त्या जातपरमदुःखानां गुरुभिरपि सम्मतः सान्त्वनादिरूपो य आवश्यकधर्मस्तद्विधव्याजेन सम्भवति । यच्च (प० पु० ६।२५२।२७) —

रम्यकेलिसुखेनैव गोपवेशधरो हरिः ।
बद्धप्रेमरसेनात्र मासद्वयमुवास ह ॥ ५३४ ॥

इत्येतत्पद्यम् तदनन्तरं तत्र च सर्वेषां मनोरमत्वं बहुप्रेमरसप्रदत्वं च इत्थमेव सङ्गच्छत इति । न च गोपनारीभिरिति परदारत्वं शब्दलब्धम् । देवहूत्याम् “सा त्वं ब्रह्मन् नृपवधूः” (भा० ३।२१।२८) इति कर्दमं प्रति भगवद्वाक्याज् जात्यपेक्षयापि सम्भवात् ।
न च निवारणादिभिरौपपत्यमेव भरतमतं रत्नावलीनाटिकायां यजातिचरितादिवद् दाम्पत्येऽपि सम्भवात् “नेष्टा यदङ्गिनि रसे कविभिः परोढा” (उ० नी० ५।३) इति विरोधात् ।
तदेवं गूढतया मायया प्रतीतानां रमणतया तस्य प्राप्तौ “मत्कामा रमणम्” इति पद्यं योजितम् । “नन्दगोपसुतं देवि पतिं मे कुरु ते नमः” (भा० १०।२२।४) इति कृतजपानां

कुमारीत्वेनैव प्रसिद्धानां परासामपि सङ्कल्पसिद्धिरेव श्रीभगवता कृता । तत्रैव हि स्वयमङ्गीकृतम् “याताबला व्रजं सिद्धाः” (भा० १०।२२।२७) इति ।
तदेतत्पक्षेऽपि पूर्ववदेव गुप्तपतित्वाज् जारमिव जारमिति सङ्गमनीयम् । तस्माच्च श्रीगोपालोत्तरतापन्यां ताः प्रति दुर्वाससा यदुक्तं तदेव निगमनीयम् “जन्मजराभ्यां भिन्नं स्थाणुरयम्” इत्यादौ “स वो हि स्वामी भवति” (गो० ता० उ० २।२३) इति ॥ श्रीभगवानुद्धवम् ॥

१७८ । पूर्वोक्त एवाप्रकटलीलाप्रवेशप्रकटलीलाविष्काररूपोऽर्थस्तदनन्तरप्रश्नोत्तराभ्यामप्यभिप्रेतोऽस्ति । प्रश्नस्तावत् श्रीउद्धव उवाच (भा० ११।१२।१६) —

संशयः शृण्वतो वाचं तव योगेश्वरेश्वर ।
न निवर्तत आत्मस्थो येन भ्राम्यति मे मनः ॥ ५३५ ॥

तव वाचं शृण्वतोऽवधारयतोऽपि ममात्मस्थः संशयो मयोदितेष्ववहित इत्यादिकाध्यायत्रयगतमहावाक्यार्थपर्यालोचनासामर्थ्यं न निवर्तते ।
कुतः ?
येन यतो मनो भ्राम्यति । “रामेण सार्धं मथुरां प्रणीते” (भा० ११।१२।१०) इत्यादिकं तव वचनं श्रुत्वा हन्त तासामनेन सङ्गमः कुत्र कथं विद्यते ? इति चिन्तया न स्वस्थं वर्तत इत्यर्थः ॥

१७९ । अथोत्तरम् — तत्र तस्य संशयमपनेतुं द्वाभ्यां तावत् तच्चित्तं स्वस्थयन् श्रीभगवानुवाच (भा० ११।१२।१७) —

स एष जीवो विवरप्रसूतिः प्राणेन घोषेण गुहां प्रविष्टः ।
मनोमयं सूक्ष्ममुपेत्य रूपं मात्रा स्वरो वर्ण इति स्थविष्ठः ॥ ५३६ ॥

स एष मल्लक्षणो जीवो जगतां जीवनहेतुः । विशेषतो व्रजस्य जीवनहेतुर्वापि परमेश्वरः प्राणेन मत्प्राणतुल्येन घोषेण व्रजेन सह विवरप्रसूतिर्विवरादप्रकटलीलातः प्रसूतिः प्रकटलीलायामभिव्यक्तिर्यस्य तथाभूतः सन् पुनर्गुहामप्रकटलीलायामेव प्रविष्टः । कीदृशः सन् ? किं कृत्वा ? मात्रा मम चक्षुरादीनि स्वरो भाषागानादीनि वर्णो रूपमिति । इत्थं स्थविष्ठः स्वपरिजनानां प्रकट एव सन् । बहिरङ्गभक्तानामन्येषां सूक्ष्ममज्ञेयं च मनोमयं कथञ्चिन् मनस्येव गम्यं यद्रूपं प्रकाशस्तदुपेत्य ॥

१८० । प्रकटलीलाविष्कारं च सदृष्टान्तं स्पष्टयति (भा० ११।१२।१८) —

यथानलः खेऽनिलबन्धुरुष्मा बलेन दारुण्यधिमथ्यमानः ।
अणुः प्रजातो हविषा समेधते तथैव मे व्यक्तिरियं हि वाणी ॥ ५३७ ॥

दृष्टान्तोऽयं गर्भगतादिक्रमेणाविर्भावमात्रांशे। तृतीयेऽपि तदुक्तं श्रीमदुद्धवेनैव "अजोऽपि जातो भगवान् यथाग्निः" (भा० ३।२।१५) इति। व्यक्तिराविर्भावः। हि यस्मादियं स्वरहस्यैकविज्ञस्य ममैव वाणी। नात्रासम्भावना विधेयेत्यर्थः।
ततश्चानन्तरं वक्ष्यमाण "एवं गदिः" (भा० ११।१२।१९) इत्यादि ग्रन्थस्तु संशयापनोदने व्याख्येयः। एवं पूर्वोक्तवाक्यद्वयस्यैवार्थभेदेन गदिर्लौकिकं भाषणमिति ज्ञेयम्। तस्याप्युत्पत्तिर्ज्ञेयेत्यर्थः। स च सतात्पर्यकोऽर्थष्टीकायामेव दृश्य इति ॥ श्रीशुकः ॥

१८१। तदेवं श्रीमद्भागवते पुनर्व्रजागमनादिरूपोऽयमर्थो बहुधा लब्धोऽपि पाद्मोत्तरखण्डवद् यन् न स्पष्टतया वर्णितः। तत् खलु निजेष्टदेवतत्वस्य बहिर्मुखान् प्रत्याच्छादनेच्छया अन्तर्मुखान् प्रत्युत्कण्ठावर्धनेच्छयेति गम्यते। यत एवोक्तम् "परोक्षवादा ऋषयः परोक्षं मम च प्रियम्" (भा० ११।२१।३५) इति।

> यदेतत् तु मया क्षुद्रतरेण तरलायितम्।
> क्षमतां तत् क्षमाशीलः श्रीमान् गोकुलवल्लभः ॥ ५३८ ॥

तदेतच्च श्रीलवृन्दावने लीलाद्वयस्य मिलनं सावसरमेव प्रस्तुतम्। द्वारकायां तु प्रसिद्धमेव। तत्र मौषलादिलीला मायिक्येवेति पूर्वमेव दर्शितम्। वस्तुतस्तु द्वारकायामेव सपरिकरस्य श्रीभगवतो निगूढतया स्थितिः। यादवानां च नित्यपरिकरत्वात् तत्त्यागेन स्वयं भगवत एवान्तर्धाने तैरतिक्षोभेणोन्मत्तचेष्टैरुपमर्दिता पृथिव्येव नश्येदिति प्रथमं तेषामन्तर्धापनम्। अत एवोक्तम् (भा० ११।१।३) —

> भूभारराजपृतना यदुभिर्निरस्य गुप्तैः स्वबाहुभिरचिन्तयदप्रमेयः।
> मन्येऽवनेर्ननु गतोऽप्यगतं हि भारं यद् यादवं कुलमहो अविषह्यमास्ते ॥ ५३९ ॥
> इति।

अत्र तेषामधार्मिकतया तु पृथिवीभारत्वं न मन्तव्यम्। भा० ११।१।८ —

> ब्रह्मण्यानां वदान्यानां नित्यं वृद्धोपसेविनाम्।
> विप्रशापः कथमभूद् वृष्णीनां कृष्णचेतसाम् ॥ ५४० ॥ इत्यादौ।

भा० १०।९०।४६ —

> शय्यासनाटनालापक्रीडास्नानादिकर्मसु।
> न विदुः सन्तमात्मानं वृष्णयः कृष्णचेतसः ॥ ५४१ ॥

इत्यादौ च परमसाधुत्वप्रसिद्धेः। पृथ्व्या भारश्च व्यक्तिबाहुल्यमात्रेण नेष्यते पर्वतसमुद्रादीनामनन्तानां विद्यमानत्वात्।

तथा “न वस्तव्यम्” (भा० ११।६।३५) इत्यादि भगवद्वाक्यस्य तात्पर्यमिदम् । माययापि यदूनां तादृशत्वदर्शनं ममानन्दवैभवधाम्नि मदीयजनसुखदमद्विलासैकनिधौ द्वारकायां नोचितम् । प्रभासे तु तत्तदयोगादुचितमिति । तथा “जिजीविषुभिः” (भा० ११।६।३५) इत्युक्त्वा “वृजिनानि तरिष्यामः” (भा० ११।६।३८) इति चोक्त्वा वस्तुतस्तु तेषां तादृशत्वं न भविष्यतीत्येवोक्तम् ।
तत्र “अस्माभिः” इति “वयम्” इति चोक्त्वा स्वेनैक्यसूचनया स्वात्मवदन्यथाभावत्वमेकगतित्वं च व्यञ्जितमिति ।
तदेवं स्थिते तैः साकं श्रीभगवतो द्वारकायामेव नित्यां स्थितिमाह (भा० ११।३१।२३-२४) —

द्वारकां हरिणा त्यक्तां समुद्रोऽप्लावयत् क्षणात् ।
वर्जयित्वा महाराज श्रीमद्भगवदालयम् ॥ ५४२ ॥
नित्यं सन्निहितस्तत्र भगवान् मधुसूदनः ।
स्मृत्याशेषाशुभहरं सर्वमङ्गलमङ्गलम् ॥ ५४३ ॥

लोकदृष्ट्यैव हरिणा त्यक्तामत्यक्तामिति वा नित्यं सन्निहित इति वा वक्ष्यमाणात् । ततश्चोभयथाप्याप्लावनं परितो जलेन परिखावदावरणम् । तज्जलमज्जनं च समुद्रेणैव श्रीभगवदाज्ञया त्यक्तभूमिलक्षणस्य हस्तिनापुरप्रस्थापितबहिर्जनगृहाद्यधिष्ठानबहिरावरणस्यैव ।
तथा रचनं विश्वकर्मणा तस्यैव प्रकटलीलायाः प्रापञ्चिकमिश्रत्वात् । अतः सुधर्मादीनां स्वर्गादागमनं च युज्यते । अप्रकटलीलायां ततोऽपि दिव्यतरं सभान्तरादिकमपि स्यात् । श्रीमान् यादवादिगृहवृन्दलक्षणशोभोपशोभावान् यो भगवदालयस्तं वर्जयित्वा । तदेवमद्यापि समुद्रमध्ये कदाचिदसौ दूरतः किञ्चिद् दृश्यत इति तत्रत्यानां महती प्रसिद्धिः । अत्र महाराजेति सम्बोधनं दृष्टान्तगर्भम् । यद्वा महान्तो राजानो यादवलक्षणा यत्र तथाभूतं श्रीमत्तदालयं श्रीकृष्णनित्यधामस्वरूपं द्वारकापुरम् । न केवलं पुरमात्रास्तित्वं तत्र च श्रीमति भगवदालये मधुसूदनः श्रीकृष्णो नित्यमेव सन्निहितः । अर्थात् तत्रत्यानां किंवान् न तत्र सन्निहितः ? भगवान् यादवादिलक्षणाखिलनिजैश्वर्यवानेव ।
तदालयमेव विशिनष्टि — स्मृत्येति । साक्षादधुना व्यक्तदर्शनाभावात् स्मृत्येत्युक्तम् । यः स्वयमेवम्भूतस्तस्य त्वन्यथा सम्भावितत्वमपि नास्तीति भावः ।
एवमेव श्रीविष्णुपुराणे (वि० पु० ५।३८।९-१०) —

प्लावयामास तां शून्यां द्वारकां च महोदधिः ।
यदुदेवगृहं त्वेकं नाप्लावयत सागरः ॥ ५४४ ॥
नात्याक्रामत् ततो ब्रह्मंस्तदद्यापि महोदधिः ।
नित्यं सन्निहितस्तत्र भगवान् केशवो यतः ॥ ५४५ ॥
तदतीव महापुण्यं सर्वपापप्रणाशनम् ।
विष्णुक्रीडान्वितं स्थानं दृष्ट्वा पापात् प्रमुच्यते ॥ ५४६ ॥ इति ।

अथैव श्रीहरिवंशे यादवान् प्रतीन्द्रप्रेषितस्य नारदस्य वाक्यम् (वि० पु० २।१०२।३२) —

> कृष्णो भोगवतीं रम्यामृषिकान्तां महायशाः ।
> द्वारकामात्मसात् कृत्वा समुद्रं गमयिष्यति ॥ ५४७ ॥

इत्यत्र "आत्मसात् कृत्वा" इति न तु त्यक्त्वेति ॥ श्रीशुकः ॥

१८२ । तदेवमप्रकटप्रकटलीलयोः समन्वयो दर्शितः । एते एव पाद्मोत्तरखण्डे भोगलीलाशब्दाभ्यामुच्येते "भोगो नित्यस्थितिस्तस्य लीलां संहरते कदा" इत्यादिना । यां कदाचित् संहरते सा लीलेत्यर्थः ।

तत्र प्रकटलीलागतभावस्य विरहसंयोगादिलीलावैचित्रीभरवाहित्वेन बलवत्तरत्वादुभयलीलैकीभावानन्तरमपि तन्मयस्तेषामभिमानोऽनुवर्तत एव । तत्रैश्वर्यज्ञानसम्वलितभावानां श्रीयादवानां स तावन् नूनमेवं सम्भवति —

अहो सर्वदैवानन्यजीवातूनामस्माकमीशिता श्रीकृष्णाख्यो भगवानयं नानालीलामृतनिर्झरैः सान्द्रानन्दचमत्कारमास्वादयितुं यादवशिखामणेर्नित्यमेव पितृभावसमृद्धस्य श्रीमदानकदुन्दुभेर्गृहे स्वजन्मना स्वानस्मानलञ्चकार । ततश्च साधितास्मदानन्दसत्रप्रधानविविधकार्यः परमबान्धवोऽसौ परमेश्वरस्तत्तद्रूपानेवास्मान् पुनर्ब्रह्माद्यैरपि दुरधिगमे श्रीमथुरानाम्नि श्रीद्वारकानाम्नि वा परमधाम्नि नानामाधुरीधुरीणाभिरात्मलीलाभिरनुशीलित एव विभ्राजित इति ।

सोऽयमभिमानः श्रीवृन्दावने तु निजनिजसम्बन्धसन्धायकप्रेमैकानुसारिणां श्रीव्रजवासिनां नूनमेवं समुज्जृम्भते —

अहो योऽसौ गोकुलकुलभागधेयपुञ्जमञ्जुलप्रकाशो मादृशां दृशां जीवनसञ्चयनिर्मञ्छनीयपादलाञ्छनलेशो वाञ्छातीतसुखसन्ततिसन्तानको महावनव्रजमहाखनिजनिनीलमणिराविरासीत् । योऽसौ दुष्टभोजराजविसृष्टैः पूतनादिग्रहसमूहैरुपरक्तोऽपि मुहुरनुकूलेन विधिना तेषां स्वयमेव विनाशपूर्वकं चकोरेभ्यश्चन्द्रमा इवास्मभ्यमवतीर्ण एवासीत् ।

योऽसौ तादृशतदीयमहागुणगणादेव परितुष्यद्भिर्मुनिदेवैरिव दत्तेन केनापि प्रभावेण मुहुरपि विपद्गणादात्मक्लेशमगणयन्नेव नः परित्रातवान् । योऽसौ निजशीललावण्यरूपगुणविलासकेलिविनिगूढसौहृद्यप्रकटनचातुरीगुम्फितमाधुरीभिरस्मान् सुष्ठु पुष्टांश्चकार । योऽसौ लघुनापि गुणाभासेनास्माकमानन्दसन्दोहमभिविन्दमानो यद् यदपि मादृशामभिलषितं वा तदतीतं वा तत्तदपि प्रतिलवमप्याश्चर्यभूतं निजमाधुर्यवर्यमुल्लासितवान् ।

योऽसौ सकलसाधुजनावनाय विख्यापितयादवसम्बन्धस्तद्द्वारा स्वयमपि च राजन्यासुरसङ्घसंहरणाय यदुपुरीं प्रस्थितवान् । योऽसौ कार्यानुरोधेन तत्रैव चिराय तिष्ठत आत्मनो विप्रयोगेन सन्तप्तबुद्धीनुद्धवादिभिरस्मानसकृदाश्वासयामास । योऽसौ पुनरुत्कण्ठाकोटिसमाकृष्टमूर्तिभिस्तीर्थव्रज्याव्याजेन कुरुक्षेत्रं प्रगतैरस्माभिः श्वासमात्रावशिष्टैरिवामृतवारिधिरूपलब्धो बभूव ।

योऽसौ तथाविधानस्मानात्मसन्निधौ मासकतिपयं संवास्य परमस्वजनतया मुधैव कृताभिमानेभ्यो यादवेभ्यो निगूढां कामपि स्नेहमुद्रामस्मासु समुद्धटय्य "भवतामेवाहम्" इति व्यञ्जनया मुहुरेवास्मानभितः सन्धुक्षितवान् । योऽसौ श्रीवृन्दावनमेवास्माकमात्मनोऽपि परमभीष्टमिति निष्टङ्क्य शपथादिना निजझटित्यागमने विस्रभ्य साग्रहमस्मानत्रैव प्रस्थापितवान् ।

सोऽयमहो अकृतापरकर्तव्यशेष एवास्मान् निजागमनं विना समारब्धप्राणकोटिमोचनव्यवसायानाशङ्क्य झटिति स्वयमेव गोकुलं साम्प्रतमागम्य निजविरहकालव्यालमुखान् निष्कास्य च स्वावलोकनामृतपूरेण सिञ्चन्नेवास्ते ।

तत्र च प्रतिक्षणमपि नवनवीकृतेनानन्यसाधारणेन केनापि स्नेहसन्दोहमयेन केवलेन निजस्वभावविशेषेण, तत्रापि निजसौन्दर्यवर्यामृतपूरप्रपाचयचयनेन, तत्रापि विविधमणिपुष्पादिविभूषणपरभागपराभोगेन, तत्रापि विलासमाधुरीधुराविशेषाधानेन, तत्रापि विचित्रगुणगणोल्लासचमत्कारविद्याविनोदेन, तत्रापि गोपालनगवाकारणबाल्यक्रीडनमोहनमन्त्रायितमुरलीवादनादिविभ्रमेण, तत्रापि गोकुलनिर्गमनप्रवेशादिलीलाचातुरीमाधुर्याडम्बरेण, तत्रापि सुहृदां यथायथमनुसन्तर्पणकेलिकलाविशेषप्रकाशितस्नेहातिशयेनास्मानुपलालयन्नेवास्ते, येन वयमहो समयगमनागमनमपि सम्भालयितुं न पारयाम इति ।

एतदनुसारेण द्वारकातः समागते श्रीकृष्णे केषाञ्चिद् व्रजवासिनामेव तदानीन्तनमुल्लासवचनम् "जयति जननिवासः" (भा० १०।९०।४८) इत्यादिकं श्रीशुकमुखादाविर्भूतमिति व्रजैकान्तभक्ता व्याचक्षते । अक्लेशेनैवार्थविशेषपरिस्फूर्तेः सम्भवति च श्रीभागवतस्य विचित्रार्थत्वं विद्वत्कामधेनुरूपत्वात् ।

तथा हि "जयति" (भा० १०।९०।४८) इत्यादि ।

कोऽपि सोऽयमस्माकं जीवनकोटिप्रियतमो विष्वक्प्रचारेण श्रीवृन्दावनस्यैव विशेषतः स्थावराणां जङ्गमानां च तद्विरहाद् यद् दुःखं तन्निहन्ता जयति सर्वोत्कर्षेण वर्तते । अर्थाच्छ्रीवृन्दावन एव । श्रीवृन्दावनस्य स्थावराणामपि भावो वर्णित एव "केवलेन हि भावेन" (भा० ११।१२।८) इत्यादिना ।

केन विशिष्टः ? सुस्मितेन श्रीमुखेन — एतेन सदातनमानन्दैकरसत्वं स्वेषु सदैव सुप्रसन्नत्वं च तस्य प्रकाशितम् । किं कुर्वन् ? व्रजरूपं यत् पुरं तत्सम्बन्धिन्यो या वनिता जनितानुरागाः कुलवध्वस्तासां कामदेवं सर्वप्रेमानन्दोपरिविराजमानत्वात् तासां कामस्तु देवः परमदिव्यरूपस्तं वर्धयन् ।

ननु देवक्याः पुत्रोऽयमित्येवं वदन्ति तत् कथं युष्माकमत्रास्मदीयत्वेनाभिमानः ? तत्राहुः — देवक्यां जन्मेति वादो मिथ्यैव लोकख्यातिर्यस्य सः ।

तर्हि कथं वासुदेव इति तस्य नाम ? इत्याशङ्क्याहुः — जननिवासो जनानां स्वजनानामस्माकं निवासत्वादाश्रयत्वादेव तथाभिधीयत इत्यर्थः । स्वजनेष्वस्मासु कृतवासत्वादेव वा । ततश्चाधिकरणे कर्तरि वौणादिको वासुः । स च दीव्यति क्रीडतीति देवश्च स इति विग्रहः । "प्रागयं वसुदेवस्य" (भा० १०।८।१४) इत्यादिका श्रीगर्गोक्तिरपि नास्मकं भातीति भावः ।

किमर्थमसौ देवकीजन्मवादोऽभूत् ? इत्याकाङ्क्षायामाहुः — यदुवराः परिषत् सहायरूपा यत्र तादृशं यथा स्यात् तथा स्वैर्दोर्भिर्भुजप्रायैरर्जुनादिभिरधर्मं तत् प्रचुरं दुष्टकुलमस्यन् निहन्तुं लक्षणहेत्वोः क्रियायाः शतृप्रत्ययस्मरणात् । तस्यामात्मजन्मनि ख्यापिते ते ते सहाया भविष्यन्तीत्येवमनुसन्धायेत्यर्थः । तथोक्तं कंसवधानन्तरं श्रीकृष्णेन श्रीव्रजेश्वरं प्रति "ज्ञातीन् वो द्रष्टुमेष्यामो विधाय सुहृदां सुखम्" (भा० १०।४५।२३) इति ।
अत्र विशेषणेनैव श्रीकृष्णरूपं विशेष्यपदमुपस्थाप्यते, साहित्यदर्पणे "अयमुदयति मुद्राभञ्जनः पद्मिनीनाम्" (९।६) इतिवत् ॥ श्रीशुकः ॥

१८३ । अथ तेषां तेन परमानन्देन समयाननुसन्धानमप्युक्तम् "व्रजति न हि यत्रापि समयः" (ब्र० सं० ५।५६) इति । अतस्तेषां श्रीकृष्णागमनपरमानन्दमत्तानामद्यैवायमागत इतीव सदा हृदि वर्तते ।
स एष यद्वदप्रकटस्वारसिक्यां प्रकटलीलागतभावप्रवेशस्तथा तद्वैभवरूपासु मन्त्रोपासनामयीष्वपि स्वस्वप्राक्तनतद्भावप्रवेशो ज्ञेयः । गङ्गाया भावस्तदीयहृदश्रेणीष्वेव ।
उभयत्राप्यसौ समान एव दर्शितः । पाद्मपातालखण्डे "गोगोपगोपिकासङ्गे यत्र क्रीडति कंसहा" इति "गोविन्द गोपीजनवल्लभेश कंसासुरघ्न" इत्याभ्याम् । एवं यथा स्वारसिक्यामिव मन्त्रमय्यामपि नन्दनन्दनत्वमनुगच्छेदेव । श्रूयते "सकललोकमङ्गलो नन्दगोपतनयो देवता" इत्यत्र गौतमीयतन्त्रे द्वितीयाध्याये "नन्दनन्दन इत्युक्तः" इत्यत्र च ।
तदेवं प्रकटलीलागतभावविशेषस्याप्रकटलीलायां प्रवेशाद् बहिरन्तर्धानलीलाद्वितयस्यैक्यं वर्णितम् । तत्र यद्यपि पूर्वपूर्वमपि तादृशभावस्तेषामनादित एवानुवर्तते तथापि तमेव नवनवीकृत्य समुद्दीपयितुं पुनः पुनरवतार इति ज्ञेयम् ।
तदेवं श्रीकृष्णस्य स्वयं भगवत्त्वं दर्शितम् । तत्रापि श्रीगोकुले तत्प्रकाशातिशयो दृश्यते । स चैश्वर्यगतस्तावत् सत्यज्ञानानन्तानन्दमात्रैकरसमूर्तिब्रह्माण्डकोटीश्वरदर्शनादौ । कारुण्यगतश्च पूतनाया अपि साक्षान् मातृगतिदाने । माधुर्यगतश्च (भा० १०।८३।४३) —

> व्रजस्त्रियो यद् वाञ्छन्ति पुलिन्द्यस्तृणवीरुधः ।
> गावश्चारयतो गोपाः पादस्पर्शं महात्मनः ॥ ५४८ ॥

इति श्रीपट्टमहिषीप्रार्थनादौ ।
अत्र स्थितेऽपि सर्वतोऽपि प्रेमवरीयसीनां तासां तत्पादस्पर्शसौभाग्ये तन्माधुर्यप्रकाशातिशयवैशिष्ट्याभिप्रायेणैव तथोक्तिः सङ्गच्छते । तथैवोक्तम् "त्रैलोक्यसौभगमिदं च निरीक्ष्य रूपं यद् गोद्विजद्रुममृगाः पुलकान्यबिभ्रन्" (भा० १०।२९।४०) इत्यादिषु ।
अतो लीलागतश्चासौ श्लाघ्यते "पितरौ नान्वविन्देतां कृष्णोदारार्भके हितम्" (भा० १०।८।४७) इत्यादिषु ।
अतस्तदीयानामप्युत्कर्ष उक्तः "वृन्दावनं गोवर्धनं यमुनापुलिनानि च" (भा० १०।११।३६) इत्यादौ ।
ततः परिकराणां तु सुतराम् "अहो भाग्यमहो भाग्यम्" (भा० १०।१४।३२) इत्यादौ ।

“इत्थं सताम्” (भा० १०।१२।११) इत्यादौ ।
“गोप्यस्तपः किमचरन्” (भा० १०।४४।१४) इत्यादौ ।
“नन्दः किमकरोद् ब्रह्मन्” (भा० १०।८।४६) इत्यादौ ।
“तत्रातिशुशुभे ताभिः” (भा० १०।३३।७) इत्यादौ तासु प्रकाशातिशयसीमा दर्शिता ।
ततः सर्वास्वपि तासु “अनयाराधितो नूनं भगवान् हरिरीश्वरः” (भा० १०।३०।२८) इत्यादिभिः प्रेमवरीयस्त्वेन प्रसिद्धायां श्रीराधिकायां तु किमुतेति ज्ञेयम् ।
अत्र चेदं तत्त्वम्—द्वितीये सन्दर्भे खलु परमत्वेन श्रीभगवन्तं निरूप्य तस्य शक्तिद्वयी निरूपिता । तत्र प्रथमा श्रीवैष्णवानां श्रीभगवद्वदुपास्या तदीयस्वरूपभूता यन्मय्येव खलु तस्य सा भगवत्ता । अथ द्वितीया चाथ तेषां जगद्वदुपेक्षणीया मायालक्षणा यन्मय्येव खलु तस्य जगत्ता । तत्र पूर्वस्यां शक्तौ शक्तिमति भगवच्छब्दवल् लक्ष्मीशब्दः प्रयुज्यत इत्य् द्वितीय एव दर्शितम् ।
ततोऽस्मिन् सन्दर्भे तु श्रीभगवान् श्रीकृष्णाख्य एवेति निर्धारिते तदीया स्वरूपशक्तिस्तु किमाख्येति निर्धार्यम् । तत्र द्वयोरपि पुर्योः श्रीमहिष्याख्या ज्ञेया । मथुरायामप्रकटलीलायां श्रुतौ रुक्मिण्याः प्रसिद्धेरन्यासामुपलक्षणात् । श्रीमहिषीणां तदीयस्वरूपशक्तित्वं स्कान्दप्रभासखण्डे श्रीशिवगौरीसंवादे गोप्यादित्यमाहात्म्ये दृष्टम् (७।१।११८।४–५, १०–१६)—

पुरा कृष्णो महातेजा यदा प्रभासमागतः ।
सहितो यादवैः सर्वैः षट्पञ्चाशत्प्रकोटिभिः ॥ ५४९ ॥
षोडशैव सहस्राणि गोप्यस्तत्र समागताः ।
लक्षमेकं तथा षष्ठिरेते कृष्णसुताः प्रिये ॥ ५५० ॥

इत्युपक्रम्य—

ततो गोप्यो महादेवि विद्या याः षोडश स्मृताः ।
तासां नामानि ते वक्ष्ये तानि ह्येकमनाः शृणु ॥ ५५१ ॥
लम्बिनी चन्द्रिका कान्ता क्रूरा शान्ता महोदया ।
भीषणी नन्दिनी शोका सुपूर्वविमला क्षया ॥ ५५२ ॥
शुभदा शोभना पुण्या हंसस्यैताः कलाः क्रमात् ।
हंस एव मतः कृष्णः परमात्मा जनार्दनः ॥ ५५३ ॥
तस्यैताः शक्तयो देवि षोडशैव प्रकीर्तिताः ।
चन्द्ररूपी मतः कृष्णः कलारूपास्तु ताः स्मृताः ॥ ५५४ ॥
सम्पूर्णमण्डला तासां मालिनी षोडशी कला ।
प्रतिपत्तिथिमारभ्य सञ्चरत्यासु चन्द्रमाः ॥ ५५५ ॥
षोडशैव कला यास्तु गोपीरूपा वराणने ।
एकैकशस्ताः सम्भिन्नाः सहस्रेण पृथक् पृथक् ॥ ५५६ ॥

एवं ते कथितं देवि रहस्यं ज्ञानसम्भवम् ।
य एवं वेद पुरुषः स ज्ञेयो वैष्णवो बुधैः ॥ ५५७ ॥ इति ।

अत्र गोप्यो राज्ञ्य इत्यर्थः "गोपो भूपेऽपि" इति नामलिङ्गानुशासनात् । लम्बिनी—अवतारशक्तिः । सुपूर्वविमला सुविमला ।
हंसस्येत्यत्र प्राप्तस्य हंसशब्दस्य वाच्यमाह—हंस एवेति । स च चन्द्ररूपी चन्द्रदृष्टान्तेनोद्देश्य इत्यर्थः । कलारूपा इति ताश्च शक्तयश्च चन्द्रस्यामृतेत्यादिकलादृष्टान्तेनोद्देश्या इत्यर्थः । अनुक्तामन्तिमां महाशक्तिमाह—सम्पूर्णेति । सेयं तु कलासमष्टिरूपा ज्ञेया । दृष्टान्तोपपादनाय चन्द्रस्य तादृशत्वमाह—प्रतिपदिति । आसु एतत्तुल्यासु कलासु । विवक्षितमाह—षोडशैवेति । षोडशानामेव विद्यारूपत्वादेतदुपदेशस्य ज्ञानसम्भवरहस्यत्वात् तज्ज्ञानस्य, वैष्णवतानुमापकलिङ्गत्वाच्च क्रूराभीषणीशोकानामपि भगवत्स्वरूपभूतानामेव सतीनाम् "मल्लानामशनिः" (भा० १०।४३।१७) इतिवत् श्रीकृष्णस्य कठिनत्वप्रत्यायकत्वात् । "मृत्युर्भोजपतेः" (भा० १०।४३।१७) इतिवद् दुर्जनवित्रासकत्वात् । "असतां शास्ता" इतिवत् तदीयशोकहेतुत्वादेव च तत्तन्निरुक्तिरुपपद्यते । यथा प्रकाशैकरूपाया एव सूर्यकान्तेरुलूकेषु तमआदिव्यञ्जकतेति । अतः "चन्द्ररूपी मतः कृष्णः कलारूपास्तु ताः स्मृताः" इति स्फुटमेव स्वरूपभूतत्वं दर्शितम् । तदेवं तासां स्वरूपशक्तिभूतत्वे लक्ष्मीत्वं सिध्यत्येव । तदेवमभिप्रेत्य लक्ष्मीत्वमाह (भा० १०।५९।४३)—

गृहेषु तासामनपाय्यतर्ककृन् निरस्तसाम्यातिशयेष्ववस्थितः ।
रेमे रमाभिर्निजकामसम्प्लुतो यथेतरो गार्हकमेधिकांश्चरन् ॥ ५५८ ॥

टीका च "रमाभिर्लक्ष्म्या अंशभूताभिः" इत्येषा । स्वरूपशक्तित्वादेव रेमे इत्युक्तम् । अत एव निजः स्वकीयः परमानन्दशक्तिवृत्तिविशेषोदयरूपप्रेमविशेषस्वरूपो यः कामस्तेन सम्प्लुतो व्याप्त इति ॥ श्रीशुकः ॥

१८४ । इत्थमष्टानां श्रीपट्टमहिषीणां तु तत्तत्स्वरूपशक्तित्वं कैमुत्येनैव सिध्यति । तत्र श्रीसत्यभामाया भूशक्तिरूपत्वं पाद्मोत्तरखण्डादौ प्रसिद्धम् । श्रीयमुनायाः कृपाशक्तिरूपत्वं स्कान्दयमुनामाहात्म्यादावित्याद्यन्वेषणीयम् । किन्तु श्रीसत्यभामाया हरिवंशादौ सौभाग्यातिशयस्य विख्यातत्वात् प्रेमशक्तिप्रचुरभूशक्तित्वं ज्ञेयम् ।
स्वयं लक्ष्मीस्तु श्रीरुक्मिणी (भा० १०।५४।६०)—

द्वारकायामभूद् राजन् महामोदः पुरौकसाम् ।
रुक्मिण्या रमयोपेतं दृष्ट्वा कृष्णं श्रियः पतिम् ॥ ५५९ ॥

इत्यादिषु तस्यामेव भूरिशः प्रसिद्धेः ।
अतः स्वयं लक्ष्मीत्वेनैव परस्परयोग्यतामाह (भा० १०।५३।३७)—

अस्यैव भार्या भवितुं रुक्मिण्यर्हति नापरा ।
असावप्यनवद्यात्मा भैष्म्याः समुचितः पतिः ॥ ५६० ॥

स्पष्टम् ॥ विदर्भपुरवासिनः परस्परम् ॥

१८५ । तथा "तां रूपिणीं श्रियम्" इत्यादौ "या लीलया धृततनोरनुरूपरूपा" (भा० १०।६०।९) इति । स्पष्टम् ।
अतः स्वयं भगवतोऽनुरूपत्वेन स्वयं लक्ष्मीत्वं सिद्धमेव । अत एव "वैदर्भीं भीष्मकसुतां श्रियो मात्रां स्वयंवरे" (भा० १०।५२।१६) इत्यत्र माति अन्तर्भवत्यस्यामिति मात्रापदं बाहुल्यादधिकरण एवौणादिकं ज्ञेयम् । कार्त्स्न्येऽवधारणे मात्रमितिवत् ।
ततश्च वैकुण्ठे प्रसिद्धाया लक्ष्म्या अन्तर्भावास्पदत्वादेषैव लक्ष्मीः सर्वतः पूर्णेत्यर्थः । यत्तु (भा० १०।६०।३४) —

नन्वेवमेतदरविन्दविलोचनाह यद् वै भवान् भगवतोऽसदृशी विभूम्नः ।
क्व स्वे महिम्न्यभिरतो भगवांस्त्र्यधीशः क्वाहं गुणप्रकृतिरज्ञगृहीतपादा ॥ ५६१ ॥

इति तस्या एवोक्तिस्तत्र निजांशाभासमेव दैन्येन स्वं मत्वोक्तमिति मन्तव्यम् ।
यद्वा गुणा गौणी प्रकृतिः स्वभावो यस्याः सा अपकृष्टरूपेत्यर्थः । यथा तत्रैव "स्यान् मे तवाङ्घ्रिररणं सृतिभिर्भ्रमन्त्याः" (भा० १०।६०।४३) इति मनुष्यावतारताभिनिवेशात् तस्या एव दैन्योक्तिः ।
अत्र दैवप्रेरितो वास्तवार्थस्त्वेवम् — हेऽरविन्दलोचन ! भगवतस्तवासदृश्यहमित्येतत् । यद् भवानाह ननु निश्चितं नवेवं वक्ष्यमाणप्रकारकं न त्वन्यप्रकारकम् । तथैवाह —
स्वे स्वरूपभूते महिम्नि ऐश्वर्यादावभितो रतो भगवान् क्व कुत्रान्यत्र ? तथाहं वा ते गुणा ऐश्वर्यादय एव प्रकृतिः स्वरूपं यस्यास्तथाभूता क्व कुत्रान्यत्र ? किन्तु न कुत्रचिदन्यत्रेति द्वयोरेकत्रैव स्वरूपे स्थितिरित्यर्थः । अत एव न विद्यते ज्ञो विज्ञो येभ्यस्तैर्गृहीतौ सेवितौ पादौ यस्यास्तथाभूताहम् । तस्माच्छक्तिशक्तिमतोरत्यन्तभेदाभावादेवोपमानोपमेयत्वाभावेन सादृश्याभाव इति भावः ।
एवं सृतिभिर्भ्रमन्त्या इत्यत्रापि हि त्वदीयपदवीभिरित्येव वास्तवोऽर्थः । तदुक्तम् "देवत्वे देवदेहेयं मानुषत्वे च मानुषी" (वि० पु० १।९।१४३) इति ।
एवमेव (भा० १०।६०।४६) —

अस्त्वम्बुजाक्ष मम ते चरणानुराग आत्मन् रतस्य मयि चानतिरिक्तदृष्टेः ।
यर्ह्यस्य वृद्धय उपात्तरजोऽतिमात्रो मामीक्षसे तदु ह नः परमानुकम्पा ॥ ५६२ ॥

इत्यत्रापि तस्याः प्रकृतित्वं दैन्यजेनाभेदोपचारेणैव व्याख्येयम् ।
यद्वा अस्य गार्हस्थस्य उपात्ता अङ्गीकृता रजोऽतिमात्रो सर्वभूतानुरञ्जनातिशयो येन सः ।

वास्तवार्थश्चैवं यदुक्तम् “उदासीना वयम्” (भा० १०।६०।२०) इत्यादि श्रीभगवता तत्राह — अस्त्विति ।
हे अम्बुजाक्ष ! आत्मनात्मनि मयि च रतस्य ते चरणानुरागो ममास्तु । मयि रतत्वं चोक्तं श्रीभगवता “तथाहमपि तच्चित्तो निद्रां च न लभे निशि” (भा० १०।५३।२) इति स्वयमेवेति भावः ।
नन्वात्मरतस्य मम कथं त्वयि रतिः ?
तत्राह — अनतिरिक्तदृष्टेः । शक्तिमत्यात्मनि शक्तौ च मय्य् चानतिरिक्ता पृथग्भावशून्या दृष्टिर्यस्य । शक्तिशक्तिमतोरपृथग्वस्तुत्वाद् द्वयोरपि मिथो विशिष्टतयैवावगमाद् वा युज्यत एव मय्यपि रतिरिति भावः । तदेवं सत्यामपि स्वाभाविक्यां रतौ विशेषतस्तु यर्ह्यस्य रत्याख्यस्य भावस्य वृद्धये उपात्तो रजोऽतिमात्रा रागातिशयो येन तथाभूतस्त्वं मामीक्षसे सभावमालोकयसि तदासौ नोऽस्मान् प्रति परमैवानुकम्पेति । एवमुदासीनत्वं तव साक्षान् मत्सम्बन्धादन्यत्रैवेति मम सुदृढ एव विश्वास इति भावः । तस्मात् साधूक्तम् “या लीलया धृततनोः” इत्यादिना श्रीरुक्मिणीदेव्याः स्वयं लक्ष्मीत्वम् ॥ श्रीशुकः ॥

१८६ । अथ वृन्दावने तदीयस्वरूपशक्तिप्रादुर्भावाश्च श्रीव्रजदेव्यः । यथा ब्रह्मसंहितायाम् (ब्र० सं० ५।३७) —

> आनन्दचिन्मयरसप्रतिभाविताभिस्ताभिर्य एव निजरूपतया कलाभिः ।
> गोलोक एव निवसत्यखिलात्मभूतो गोविन्दमादिपुरुषं तमहं भजामि ॥ ५६३ ॥
> इति ।

ताभिः श्रीगोपीभिर्मन्त्रे तच्छब्दप्रयोगात् । कलाभिः शक्तिभिः । निजरूपतया स्वस्वरूपतया । शक्तित्वं च तासां पूर्वोक्तोत्कर्षेण परमपूर्णप्रादुर्भावानां सर्वासामपि लक्ष्मीत्वमेव । तदुक्तं तत्रैव “लक्ष्मीसहस्रशतसम्भ्रमसेव्यमानम्” (ब्र० सं० ५।२९) इति “श्रियः कान्ताः कान्तः परमपुरुषः” (ब्र० सं० ५।५६) इति च ।
एतदभिप्रायेणैव स्वायम्भुवागमेऽपि श्रीभूलीलाशब्दैस्तत्प्रेयसीविशेषत्रयमुपदिष्टम् । तस्माल् लक्ष्मीत्वेऽप्यासां कुरुपाण्डवन्यायेन “नायं श्रियोऽङ्ग” (भा० १०।४७।६०) इत्यादौ लक्ष्मीतोऽप्युत्कर्षवर्णनं परमव्योमादिस्थिताभ्यस्तन्नाम्नैव प्रसिद्धाभ्यो लक्ष्मीभ्य आधिक्यविवक्षयेति मन्तव्यम् । श्रीवृन्दावनलक्ष्म्यस्त्वेता एव । एवमेव “पादन्यासैर्भुजविधुतिभिः” इत्यादौ “कृष्णवध्वः” (भा० १०।३३।८) इत्युक्तम् ।
अत एव “गोपीजनाविद्याकलाप्रेरकः” (गो० ता० उ० १।८) इत्यत्र तापनीवाक्ये श्रीमद्दशाक्षरस्थनामनिरुक्तौ ये गोपीजनास्ते आ सम्यग् या विद्या परमप्रेमरूपा तस्याः कला वृत्तिरूपा इति व्याख्येयम् “राजविद्या राजगुह्यम्” (गीता ९।२) इत्यादि श्रीगीताप्रकरणात् । अविद्याकलाशब्देन अविद्यैव कला वृत्तिर्यस्याः सा सर्वेन्द्रियविमोहकारिणी प्रेमशक्तिरेवाख्याता भगवत्यविद्यासंश्लेषाभावात् ।
तदुक्तम् (भा० दी० १।७।६) —

ह्लादिन्या संविदाश्लिष्टः सच्चिदानन्द ईश्वरः ।
स्वाविद्यासंवृतो जीवः सङ्क्लेशनिकराकरः ॥ ५६४ ॥

इति स्वामिसूक्तौ ।
तथा (वि० पु० १।१२।६९) —

ह्लादिनी सन्धिनी संवित् त्वय्येका सर्वसंश्रये ।
ह्लादतापकरी मिश्रा त्वयि नो गुणवर्जिते ॥ ५६५ ॥

इत्यादि विष्णुपुराणे च ।
अथवा वैभवमात्राभिज्ञान् प्रति विराडुपासनावत् गोपीजनशब्दस्यान्यनिरुक्तिरियम् । यथा तत्रैव गोपालपदनिरुक्तौ "गोपान् जीवानां सृष्टिपर्यन्तमालाति" इत्युक्तम् । तत्राविद्याकलाशब्देन मायैवोच्यत इति ।
अतस्तासां प्रेरकस्तत्तत्क्रीडायां प्रवर्तकः, स च पतित्व एव विश्रान्त इति वल्लभशब्देनैकार्थ्यमेव "स वो हि स्वामी भवति" (गो० ता० उ० २।२०) इति तस्यामेव श्रुतौ ताः प्रति दुर्वाससो वाक्यात् ।
यच्च तासां क्वचित् पूर्वजन्मनि साधकत्वमिव श्रूयते तत्तु पूर्वेषामिव व्याख्येयम् । तास्तु नित्यसिद्धा एव । अत इदमित्थमेव व्याख्येयम् (भा० १०।३२।१०) —

ताभिर्विधूतशोकाभिर्भगवानच्युतो वृतः ।
व्यरोचताधिकं तात पुरुषः शक्तिभिर्यथा ॥ ५६६ ॥

यथा यथावत् । अत एवाधिकं व्यरोचतेत्युक्तमुपपद्यते स्वशक्तिविलासत्वाच्च श्रीभगवतः ॥

१८७ । भा० १०।३३।१५ —

गोप्यो लब्ध्वाच्युतं कान्तं श्रिय एकान्तवल्लभम् ।
गृहीतकण्ठ्यस्तद्दोर्भ्यां गायन्त्यस्तं विजह्रिरे ॥ ५६७ ॥

गोप्य एव श्रियः । कान्तं मनोहरम् । एकान्तवल्लभं रहोरमणमपाणिग्राहकत्वात् ॥ श्रीशुकः ॥

१८८ । आसां महत्त्वं तु ह्लादिनीसारवृत्तिविशेषप्रेमरससारविशेषप्राध्यान्यात् । तदुक्तम् "आनन्दचिन्मयरसप्रतिभाविताभिः" (ब्र० सं० ५।३७) इति । आनन्दचिन्मयरसेन प्रेमरसविशेषेण प्रतिभाविताभिस्तत्प्रधानाभिरित्यर्थः । अत एव तत्प्राचुर्यप्रकाशेन श्रीभगवतोऽपि तासु परमोल्लासप्रकाशो भवति । येन ताभी रमणेच्छा जायते । तथैवाह (भा० १०।२९।१) —

भगवानपि ता रात्रीः शरदोत्फुल्लमल्लिकाः ।
वीक्ष्य रन्तुं मनश्चक्रे योगमायामुपाश्रितः ॥ ५६८ ॥

योगमायां दुर्घटसम्पादिकां स्वरूपशक्तिं तत्तल्लीलासौष्ठवघटनायाश्रित इति तस्मै तां प्रवर्त्येत्यर्थः ॥ श्रीशुकः ॥

१८९ । अथ तासां नामानि च श्रूयन्ते भविष्योत्तरे मल्लद्वादशीप्रसङ्गे श्रीकृष्णयुधिष्ठिरसं-वादे —

गोपीनामानि राजेन्द्र प्राधान्येन निबोध मे ।
गोपाली पालिका धन्या विशाखा ध्याननिष्ठिका ।
राधानुराधा सोमाभा तारका दशमी तथा ॥ ५६९ ॥ इति ।

दशम्यपि तारकानाम्न्येवेत्यर्थः । स्कान्दे प्रह्लादसंहितायां द्वारकामाहात्म्ये मयनिर्मित-सरःप्रस्तावे श्रीललितोवाचेत्यादिना "ललिता श्यामला धन्या विशाखा राधा शैव्या पद्मा भद्रा" इत्येतान्यष्टैव गृहीतानि ।
अथ "वनिताशतकोटिभिः" इत्यागमप्रसिद्धेरन्यान्यपि लोकशास्त्रयोरवगन्तव्यानि । अत्र शतकोटित्वान्यथानुपपत्त्यादिना तासां तन्महाशक्तित्वमेवावगम्यते । तदेवं परममधुरप्रे-मवृत्तिमयीषु तास्वपि तत्सारांशोद्रेकमयी श्रीराधिका । तस्यामेव प्रेमोत्कर्षपरमकाष्ठाया अत्रैव दर्शितत्वात् प्रीतिसन्दर्भे दर्शयिष्यमाणत्वाच्च ।
यत्र यत्र च तत्प्रेमवैशिष्ट्यम् । तत्रैव "यस्यास्ति भक्तिर्भगवत्यकिञ्चना" (भा० ५।१८।१२) इत्यादिवत् सर्वा अप्यैश्वर्यादिरूपा अन्याः शक्तयो नात्यादृता अप्यनुगच्छन्तीति श्रीवृन्दा-वने श्रीराधिकायामेव स्वयं लक्ष्मीत्वम् ।
यत् तु मात्स्ये देव्या दक्षं प्रति —

रुक्मिणी द्वारवत्यां तु राधा वृन्दावने वने ।
देवकी मथुरायां तु पाताले परमेश्वरी ।
चित्रकुटे तथा सीता विन्ध्ये विन्ध्यनिवासिनी ॥ ५७० ॥

इत्यादिना स्वरूपशक्तिव्यूहरुक्मिणीराधादेवकीसीतानां मायांशरूपेण स्वेन सहाभेदक-थनं तत् खलु यथा देवेन्द्रः प्रतर्दनं प्रति "प्राणोऽस्मि प्रज्ञात्मा" इत्यादिकम् । यथा वा वामदेवश्च "अहं मनुरभवं सूर्यश्च" इत्यादिकं परमात्मना सहाभेदं मत्वावादीदिति । "न वक्तुरुपदेशात्" (ब्र० सू० १।१।२९) इति वेदान्तसूत्रेषु "शास्त्रदृष्ट्या तूपदेशो वामदेववत्" (ब्र० सू० १।१।३०) इत्यनेन विचारितं तद्वदिहापीति गम्यते ।
शास्त्रं खलु चतुर्धा परावरयोरभेदं दर्शयति ।
यथा "सर्वं खल्विदं ब्रह्म" (छा० ३।१४।१) इति कार्यस्य कारणादनन्यत्वेन ।
यथा "तत् त्वमसि" (छा० ६।८।७) इति परमात्मजीवयोश्चित्साम्येन ।

यथा “सर्वं समाप्नोषि ततोऽसि सर्वः” (गीता ११।४०) इत्यधिष्ठानाधिष्ठात्रोरभेदोपचारेण। यथा वा “रामोऽहम्” इत्यादिकमहङ्ग्रहोपासनेनेति।
एवमत्रापि यथास्वं मन्तव्यम्। विशेषतः श्रीराधायाः स्वयं लक्ष्मीत्वं बृहद्गौतमीये श्रीबलदेवं प्रति श्रीकृष्णवाक्यम्—

सत्त्वं तत्त्वं परत्वं च तत्त्वत्रयमहं किल।
त्रितत्त्वरूपिणी सापि राधिका मम वल्लभा॥ ५७१॥
प्रकृतेः पर एवाहं सापि मच्छक्तिरूपिणी।
सात्त्विकं रूपमास्थाय पूर्णोऽहं ब्रह्मचित्परः॥ ५७२॥
ब्रह्मणा प्रार्थितः सम्यक् सम्भवामि युगे युगे।
तया सार्धं त्वया सार्धं नाशाय देवताद्रुहाम्॥ ५७३॥ इत्यादि।

सत्त्वं कार्यत्वं तत्त्वं कारणत्वं ततोऽपि परत्वं चेति यत्तत्त्वत्रयं तदहमित्यर्थः। अत एव श्रीराधिकाया एव प्रसङ्गे तदग्रिमग्रन्थे—

देवी कृष्णमयी प्रोक्ता राधिका परदेवता।
सर्वलक्ष्मीमयी सर्वकान्तिः सम्मोहिनी परा॥ ५७४॥ इति।

ऋक्परिशिष्टश्रुतिश्च तथैवाह “राधया माधवो देवो माधवेनैव राधिका विभ्राजन्ते जनेष्वा”।
विभ्राजन्ते विभ्राजते। आ सर्वत इति श्रुतिपदार्थः। अत एव तस्याः सर्वोत्तमत्वं सौभाग्यातिशयत्वं चादिवाराहे तत्कुण्डप्रसङ्गे द्रष्टव्यम्। श्रीभागवते “अनयाराधितो नूनम्” (भा० १०।३०।२८) इत्यादौ च।
एतत् सर्वमभिप्रेत्य मूर्धन्यश्लोके तादृशोऽप्यर्थः सन्दधे। तत्र तयोर्महामहैश्वर्यप्रतिपादकोऽर्थः पूर्ववत् स्वयमनुसन्धेयः। परममाधुरीप्रतिपादकोऽर्थस्तु यथा “जन्माद्यस्य” (भा० १।१।१) इति। यतोऽन्वयात्—अन्वेति अनुगच्छति सदा निजपरमानन्दशक्तिरूपायां तस्यां श्रीराधायामासक्तो भवतीत्यन्वयः श्रीकृष्णः। तादृशाद् यस्मात्। तथा इतरत इतरस्याश्च तस्य सदाद्वितीयायाः श्रीराधाया एव। यतो यस्या आद्यस्यादिरसस्य जन्म प्रादुर्भावः। यावेवादिरसविद्यायाः परमनिधानमित्यर्थः।
अत एव तयोरत्यद्भुतविलासमाधुरीधुरीणतामुद्दिशति—योऽर्थेषु तत्तद्विलासकलापेष्वभिज्ञो विदग्धः। या च स्वेन तथाविधेनात्मना विराजते विलासतीति स्वराट्।
अत एव सर्वतोऽप्याश्चर्यरूपयोस्तयोर्वर्णने मम तत्कृपैव सामग्रीत्याह—आदिकवये प्रथमं तल्लीलावर्णनमारभमाणाय मह्यं श्रीवेदव्यासाय हृदा अन्तःकरणद्वारैव ब्रह्म निजलीलाप्रतिपादकं शब्दब्रह्म यस्तेने। आरम्भसमकालमेव युगपत् सर्वमिदं महापुराणं मम हृदि प्रकाशितवानित्यर्थः। एतच्च प्रथमस्य सप्तम एव व्यक्तम्।
यद् यस्यां च सूरयः शेषादयोऽपि मुह्यन्ति स्वरूपसौन्दर्यगुणादिभिरत्यद्भुता केयमिति निर्वक्तुमारब्धा निश्चेतुं न शक्नुवन्ति। एवम्भूता सा यदि कृपां नाकरिष्यत् तदा लब्धमाधवतादृशकृपस्यापि मम (भा० १०।३०।२६)—

तैस्तैः पदैस्तत्पदवीमन्विच्छन्त्योऽग्रतोऽबलाः ।
वध्वाः पदैः सुपृक्तानि विलोक्यार्ताः समब्रुवन् ॥ ५७५ ॥

इत्यादिना तस्या लीलावर्णनलेशेऽपि साहससिद्धिरसौ नाभविष्यदेवेति भावः ।
तयोराश्चर्यरूपत्वमेव व्यनक्ति "तेजोवारिमृदाम्" (भा० १।१।१) अचैतन्यानामपि यथा येन प्रकारेण विनिमयः परस्परं स्वभावविपर्ययोर्भवति तथा यो विभ्राजत इति शेषः । वाक्यशेषं च भावाभिभूतत्वेन न वक्तुं शक्तवानिति गम्यते । तत्र तेजसश्चन्द्रादेस्तत्पदनखकान्तिविस्फारतादिना वारिमृद्वन् निस्तेजस्त्वधर्मावाप्तिः । वारिणो नद्यादेश्च वंशीवाद्यादिना वह्न्यादितेजोवदुच्छूनताप्राप्तिः पाषाणादिमृद्वच्च स्तम्भप्राप्तिः । मृदश्च पाषाणादेस्तत्कान्तिकन्दलीच्छुरितत्वेन तेजोवदुज्ज्वलताप्राप्तिर्वंशीवाद्यादिना वारिवच्च द्रवताप्राप्तिरिति । तदेतत् सर्वं तस्य लीलावर्णने प्रसिद्धमेव ।
यत्र यस्यां च विद्यमानायां त्रिधासर्गः श्रीभूलीलेतिशक्तित्रयीप्रादुर्भावो वा द्वारकामथुरावृन्दावनानीति स्थानत्रयगतशक्तिवर्गत्रयप्रादुर्भावो वा वृन्दावन एव रसव्यवहारेण सुहृदुदासीनप्रतिपक्षनायिकारूपत्रिभेदानां सर्वासामपि व्रजदेवीनामेव प्रादुर्भावो वा मृषा वृथैव । यस्याः सौन्दर्यादिगुणसम्पदा तास्ताः कृष्णस्य न किञ्चिदिव प्रयोजनमर्हन्तीत्यर्थः ।
तद् धीमहीति यच्छब्दलब्धेन तच्छब्देनान्वयः । परमभक्तिशक्तिमत्त्वेनातिशयितमहाभावरसेन वा परस्परमभिन्नतां गतयोरनयोरैक्येनैव विवक्षितं तदिति । अत एव सामान्यतया परामर्शान् नपुंसकत्वं च ।
कथम्भूतम् ? स्वेन धाम्ना स्वप्रभावेन सदा निरस्तं स्वलीलाप्रतिपक्षजरतीप्रभृतीनां प्रतिपक्षनायिकानां च प्रतिबन्धकानां कुहकं माया येन तत् । तथा सत्यं तादृशत्वेन नित्यसिद्धम् । यद्वा परस्परं विलासादिभिरनवरतमानन्दसन्दोहदाने कृतसत्यमिव जातम् । तत्र निश्चलमित्यर्थः । अत एव परमन्यत्र कुत्राप्यदृष्टगुणलीलादिभिर्विश्वविस्मापकत्वात् सर्वतोऽप्युत्कृष्टम् ।
अत्रैकोऽपि धर्मो भिन्नवाचकतया वाक्ययोर्निर्दिष्ट इत्युभयसादृश्यावगमात् प्रतिवस्तूपमानामालङ्कारोऽयम् । इयं च मुहुरुपमितमिति मालाप्रतिवस्तूपमा । तेन तैस्तैर्मिथो योग्यतया निबद्धत्वात् समनामापि ।
एतदलङ्कारेण च—अहो परस्परं परस्मात् परमपि तन्मिथुनभूतं किमपि तत्त्वं मिथो गुणगणमाधुरीभिः समतामेव समवाप्तमिति सकलजीवजीवातुतमरसपीयूषधाराधाराधरतासम्पदा कस्मै वा निजचरणकमलविलासं न रोचयतीति स्वतःसम्भवि वस्तु व्यज्यते । तदाहुः (सा० द० ४।७-८)—

वस्तु वालङ्कृतिर्वापि द्विधार्थः सम्भवी स्वतः ।
कवेः प्रोढोक्तिसिद्धो वा तन्निबद्धस्य वेति षट् ॥ ५७६ ॥
षड्भिस्तैर्व्यज्यमानस्तु वस्त्वलङ्काररूपकः ।
अर्थशक्त्युद्भवो व्यङ्ग्यो याति द्वादशभेदताम् ॥ ५७७ ॥ इति ।

अतः सर्वतोऽपि सान्द्रानन्दचमत्कारकरश्रीकृष्णप्रकाशे श्रीवृन्दावनेऽपि परमाद्भुतप्रकाशः श्रीराधया युगलितस्तु श्रीकृष्ण इति । तदुक्तं श्रुत्या "राधया माधवो देवः" इत्यादिना । तदुक्तमादिपुराणे "वेदान्तिनोऽपि" इति पद्यानन्तरम् । यथा —

अहमेव परं रूपं नान्यो जानाति कश्चन ।
जानाति राधिका पार्थ अंशानर्चन्ति देवताः ॥ ५७८ ॥ इति ।

तयोर्नित्यविलासस्त्वित्थं यथा वर्णितोऽस्मदुपजीव्यचरणाम्बुजैः (भ० र० सि० २।१।२३१) —

वाचा सूचितशर्वरीरतिकलाप्रागल्भ्यया राधिकां व्रीडाकुञ्चितलोचनां विरचयन्नग्रे सखीनामसौ ।
तद्वक्षोरुहचित्रकेलिमकरीपाण्डित्यपारं गतः कैशोरं सफलीकरोति कलयन् कुञ्जे विहारं हरिः ॥ ५७९ ॥

तदेवं सन्दर्भचतुष्टयेन सम्बन्धो व्याख्यातः । तस्मिन्नपि सम्बन्धे श्रीराधामाधवरूपेणैव प्रादुर्भावस्तस्य सम्बन्धिनः परमः प्रकर्षः । एतदर्थमेव व्यतानिषमिमाः सर्वा अपि परिपाटीरिति पूर्णः सम्बन्धः ॥

गौरश्यामरुचोज्ज्वलाभिरमलैरक्ष्णोर्विलासोत्सवैर्
नृत्यन्तीभिरशेषमादनकलावैदग्ध्यदिग्धात्मभिः ।
अन्योन्यप्रियतासुधापरिमलस्तोमोन्मदाभिः सदा
राधामाधवमाधुरीभिरभितश्चित्तं ममाक्राम्यताम् ॥ ५८० ॥

इति कलियुगपावनस्वभजनविभजनप्रयोजनावतारश्रीश्रीभगवत् कृष्णचैतन्यदेवचरणानुचरविश्ववैष्णवराजसभासभाजनभाजनश्रीरूपसनातनानुशासनभारतीगर्भे षट्सन्दर्भात्मके श्रीश्रीभागवतसन्दर्भे श्रीकृष्णसन्दर्भो नाम चतुर्थः सन्दर्भः ॥

श्रीभागवतसन्दर्भे सर्वसन्दर्भगर्भगे ।
श्रीकृष्णसन्दर्भनामा सन्दर्भोऽभूच् चतुर्थकः ॥

समाप्तोऽयं श्रीश्रीकृष्णसन्दर्भः ॥